CC-0. In Public Domain. Digitization by eGangotri

श्री हरिकृष्णनिबन्धमणिमालायाः

सप्तमो (७) मणिः

॥ श्रीः ॥

वैयाकरणभूषणसारः

'सरला' व्याख्यया 'सुबोधिनी' टिप्पण्या च विभूषितः

व्याख्याकारः

श्री पं० गोपालशास्त्री नेने

श्रीहरिकृष्णनिबन्धभवनम्, वाराणसी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीहरिकृष्णनिबन्धमणिमालायाः
सप्तमो (७) मणिः

श्रीमत्कौण्डभट्टविरचितः

वैयाकरणभूषणसारः

'सरला' व्याख्यया 'सुबोधिनी' टिप्पण्या च विभूषितः

व्याख्याकारः–
श्री पं० गोपालशास्त्री नेने

टिप्पणीकारः–
श्री पं० रामप्रसाद त्रिपाठी

(चतुर्थं संस्करणम्)

प्रकाशक—
श्रीहरिकृष्णनिबन्धभवनम्
वाराणसी

[पुनर्मुद्रणादिकाः सर्वेऽधिकाराः प्रकाशकाधीनाः]

१९७९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुद्रक—
चौखम्बा प्रेस, वाराणसी
मूल्यं ६—००
वि० सं० २०३३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भूमिका

॥ श्रीगुरुः शरणम् ॥

इह खलु संसारे सर्वे प्राणिनः परमसुखावाप्तिपूर्वकात्यन्तदुःखनिवृत्तये स्वभावत एव सततं प्रयतन्ते। परं केनोपायेनैतादृशसुखावाप्तिर्भवति इति निश्चयमनासादयन्तो यत्र कुत्रचिदेवोपाये सुखसाधनत्वभ्रमेण प्रवर्तन्ते, निपतन्ति चानेकजन्ममरणपरम्परारूपे दुःखमहासागरे। तदेतदालोच्य पूर्वमेव दुःखसागरपतिष्यमाणानामेतेषामुत्तारयिषया मातृपितृसहस्रेभ्योऽप्यधिकतरवात्सल्यशालिनी भगवती श्रुतिः प्रादुरभूत्। सा च कर्मकाण्ड—उपासनाकाण्ड—ज्ञानकाण्डेति यथाधिकारि व्यभाजि भगवता बादरायणेन। निखिलपुरुषार्थमूर्धन्य आत्यन्तिकत्रिविधबन्धविलयश्च अर्थज्ञानपूर्वकाध्ययनपरिगृहीतस्वाध्यायमात्रायत्त इति निर्विवादम्।

सकलशब्दानां युगपदर्थज्ञानं च परमविदुषः सकलविद्यागरिष्ठस्य बृहस्पतेः सकाशादधीयानस्येन्द्रस्यापि न समभूदेकैकशः शब्दानामर्थग्रहणेनेति का कथा तत्र पामराणां मर्त्यानाम्? तदुक्तं पातञ्जलमहाभाष्ये—"इन्द्रश्चाध्येता, बृहस्पतिश्च प्रवक्ता, दिव्यं वर्षसहस्रमध्ययनकालः, नान्तं जगाम, किं पुनरद्यत्वे" इति। एवमालोच्य परमकारुणिको महेश्वरः प्रयागधाम्नि अक्षयवटाधःस्थले उग्रं तपस्तपस्यता पाणिनिना ढक्कानादेन चतुर्दशसूत्रीरूपमाक्षरसमाम्नायं प्रसादीकृत्य तन्मूलकान्यसुसूत्रयत "वृद्धिरादैच्" इत्यादीनि "अ अ" इत्येतदन्तान्यष्टाध्यायीसूत्राणि सर्वेषामल्पायासेन तदर्थावगमायेति।

प्रसिद्धमेव किल श्रीपाणिनिमहर्षिः पाणिननाम्नो महर्षेः दाक्ष्यामुदपद्यत, अगच्छत् च प्राप्य विद्याग्रहणयोग्यमायुर्नन्दराज्ये निवसतः पण्डितवरिष्ठस्य श्रीमदुपवर्षमहर्षेः समीपं विद्यामधिगन्तुम्। स कदाचित् स्वसतीर्थ्याभ्यां व्याडिवररुचिभ्यां वादे पराजितो निर्विण्णः सन् व्याकरणविद्यासाम्राज्याधिगमाय सर्वविद्याधिपमीशानमुग्रेण तपसाऽऽराधयामास, आससाद च श्रीमन्महेश्वरप्रसादमिति।

अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥

इत्येतल्लक्षणलक्षितानां सूत्राणां पाणिन्यादिशिष्यवरव्याघ्रभूतिश्वोभूत्यादिमहर्षिभिर्व्याख्यातानामपि यथावदर्थग्रहणं न सर्वसुशकमिति अपारीत् तानि वार्तिककरणेन कात्यायनः, अवीभवच्च भगवान् शेषावतारः पतञ्जलिरिति सूत्रवार्तिकभाष्यत्रिगुणात्मको व्याकरणमहोदधिः सम्पन्न इति सुविशदं तज्ज्ञानाम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्र च महता यत्नेन महासागरं मथित्वा कौस्तुभमणिमिव यथा कृतार्थाः शब्दकौस्तुभमुद्धृत्य श्रीमद्भट्टोजिदीक्षिता न तथाऽन्ये कृतपरिश्रमा अपि भर्तृहरि-सदृशा वैयाकरणधुरन्धरा विद्वांस इति। तत्रत्यकारिकामवलम्ब्यान्वग्रहीषुरिमे श्रीकौण्डभट्टाः सर्वतन्त्रस्वतन्त्राः स्फोटवाद—वैयाकरणसिद्धान्तदीपिका—बृहद्वैया-करणसिद्धान्तभूषण—वैयाकरणभूषणसारैश्च स्वकृतैर्मन्दमतीन् वैयाकरणसिद्धान्ता-नवगन्तुमिति सुविशदमिदं सर्वेषाम्।

तदत्र नायकमणिमिव देहलीदीपकमिव च प्रकाशमानमिमं वैयाकरणभूषण-सारमधिकृत्य किञ्चिदिवात्र प्रस्तावयामः। योऽयं शास्त्रीयमावरणं समूल-घातमुपघ्नन् यथार्थनामेति विश्वसिमः। यस्य च प्रणेतारः सारस्वतब्राह्मणजातीया सुगृहीतनामानः श्रीकौण्डभट्टा महाराष्ट्रदेशान्तर्गतदेवालये देवपूजनोपजीविनो दीक्षितोपाधिकस्य सारस्वतब्राह्मणस्य लक्ष्मीधरशर्मणस्तनूजाद् श्रीमद्रङ्गोजि-भट्टात् जन्म लेभिरे। श्रीरङ्गोजिभट्टस्य च सहोदरो भ्राता श्रीमद्भट्टोजिदीक्षित-नामधेयः सुप्रसिद्धो बभूव। अत्र च "पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजि-भट्टाभिधम्" "भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये" इति तदीये एव वाक्ये प्रमाणम्।

श्रीमद्भट्टोजिदीक्षितस्य समयः किल १६४६ षट्चत्वारिंशदधिकषोडश-शतको वैक्रमः संवत्सर आसीदिति श्रूयते। तदनुसारेण श्रीकौण्डभट्टस्य सप्त-दशशतकार्धाधिकसमयः स्यादित्यनुमीयते।

यद्यपि व्याकरणशास्त्रसिद्धान्तपरिदर्शका बहवो निबन्धा विराजन्ते, तथाऽपि वैयाकरभूषणसारस्तान् सर्वानपि निबन्धानतिशेते, यतः किलायं पदवाक्यघटक-प्रकृतिप्रत्ययभागान् तत्तदर्थान् ते कथं परस्परं सम्बद्धा इति च सुस्पष्ट प्रतिपाद-यति न तथेतरे प्रक्रियामात्रप्रदर्शयितारो निबन्धा इति। किञ्चास्य ग्रन्थस्य रचनापद्धतिरप्येतादृशी सुलभा मनाल्लासिनी च यत्पाठमात्रेणैवाल्पधियोऽपि तद्रहस्यं शक्नुवन्त्यधिगन्तुम्। प्रकृतिप्रत्ययादिपदभागार्थसम्बन्धप्रदर्शयितृणा-मन्येषां सत्त्वेऽपि तेषु केचिन्न्यायसिद्धान्तदर्शकाः केचिन्मीमांसासिद्धान्तप्रदर्शयि-तार इति न तैः सर्वथा व्याकरणसिद्धान्तावबोधो भवतीति कारुण्याद्दीक्षितेन्द्रैर-धिगतसकलग्रन्थतत्त्वैर्महता श्रमेण नानाग्रन्थानालोडच सुविचार्य च नवनीतमिव सारभूतं "वैयाकरणभूषणसार" इति यथार्थनामेदं ग्रन्थरत्नं विनिर्मितमिति पण्डितानां छात्राणां च सर्वेषामपि समुपादेयमेव। अत एव बहुषु स्थलेषु इदानीमस्य ग्रन्थस्य बाहुल्येन प्रचारः संलक्ष्यते इत्यत्र न किमपि चित्रम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किं चायं तमेवार्थमभिधत्ते यः किल सूत्राक्षरात्सहसैव प्रतीयते इति ग्रन्थपरिशीलनेनैव ज्ञातुं शक्यते, निरूपयिष्यामि च सुविशदं यथावकाशं वैयाकरणभूषण-तत्सारयोः समालोचनायामिति तद्व्यापारेणालम् ।

वैयाकरणभूषणसारस्य तिस्रष्टीकाः सन्ति, 'दर्पण'–'काशिका'–वैयाकरणतोन्मज्जिनी' इति नामधेयाः । तत्र तृतीया न समुपलभ्यते इदानीम्, द्वितीया चातिविस्तृता, प्रथमाऽपि न्यायघटितपदार्थबहुलेत्यतिकठिना वर्तते इति मया भूषणसारस्य तदीयाक्षरयोजनामात्रप्रदर्शयित्री 'सरला' इत्यन्वर्थाभिधेया टीका विरचिता । तां च श्रीहरिकृष्णनिबन्धभवनाधिपतयो द्वितीयसंस्करणप्रकाशनार्थमिदानीमेव मत्तो लब्धाधिकारा मुद्रापयित्वा प्रचारयन्तीति बहूपकृतोऽस्मि तदीयव्यापारेण ।

प्रार्थये च गुणैकदृशो महाशयानत्र दृष्टिपातानुग्रहेण सफलयन्तु मे श्रममनुभवन्तु च श्रीमद्व्याकरणसिद्धान्तभूषणधारणसुखम् ।

विदुषामनुचरो
नेने इत्युपाह्वो गोपालशास्त्री

तृतीयसंस्करणविज्ञापनम्

अथेदानीं श्रीकौण्डभट्टविरचितवैयाकरणभूषणसारस्याऽस्मद्गुरुवर—श्रीनेनेगोपालशास्त्रिविरचितसरलाटीकासमेतस्य तृतीयं संस्करणं सर्वाङ्गसुन्दरं श्रीमतां पुरतः प्रस्तूयते । एतत्संस्करणमुद्रणप्रारम्भसमयात्प्रागस्मिन् संस्करणे मदीया वसोधिनीनाम्नी विशदा सरलाटीका सन्निवेशयितुमुद्दिष्टाऽऽसीत्, तथापि समयप्रभावाद्व्याकरणशास्त्रे क्रमश आगतं पठनशैथिल्यमवधार्य छात्राणां तत्राभिरुचिर्न स्यादित्यालोच्य कर्गलानां महार्घतां दुर्लभतां चानुभवता प्रकाशकमहोदयेन ततः केवलं विषमस्थलभागानामेव व्याख्या समावेशिताऽस्ति ।

पूर्वसंस्करणभूमिकायां श्रीमद्भट्टोजिदीक्षितानां सारस्वतब्राह्मणत्वेनोल्लेखोऽस्मद्गुरुचरणैः कुतश्चिल्लेखादुद्धृत इति न तत्र तेषामनुबन्ध इति श्रीमद्भट्टोजिदीक्षितानां सारस्वतत्वमनभिमन्यमानैः सन्तोष्टव्यमिति ।

आशासे चेदमचिरसंस्करणं वैयाकरणच्छात्रोपयोगि भवेदिति ।

दीपावली
वै० संवत्सरः २००९

विदुषामनुचरो
रामप्रसादत्रिपाठी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma
11|1|80

विषयानुक्रमः

	पृष्ठ		पृष्ठ
मङ्गलाचरणम्	१	निपातद्योतकत्वनिर्णयः	११०
ग्रन्थादौ प्रतिज्ञा	३	भावप्रत्ययार्थनिर्णयः	११७
धात्वर्थाख्यातसामान्यार्थनिर्णयः	,,	देवताप्रत्ययार्थनिर्णयः	१२२
लकारविशेषार्थनिर्णयः	४८	अभेदैकत्वसंख्याया वृत्तौ माननिर्णयः	१२५
सुबर्थनिर्णयः	५८	उद्देश्यविधेययोः संख्याविवक्षानिर्णयः	१२७
नामार्थनिर्णयः	७७	क्त्वाद्यर्थनिर्णयः	१३०
समासशक्तिनिर्णयः	८५	स्फोटनिर्णयः	१३४
शक्तिनिर्णयः	९८		
नञर्थनिर्णयः	१०८		

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीगणेशाय नमः ॥

वैयाकरणभूषणसारः

सरलया सहितः ।

॥ श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।

गणेशगुरुपादाब्जसेवनाल्लब्धबुद्धिना ।
भूषणार्थाववोधाय क्रियते सरला मया ॥ १ ॥

प्रारिप्सितग्रन्थप्रतिबन्धकसकलदुरितोपशमनाय सकलप्रत्यवायाधारभूतश्रीमद्भगवत्स्तुत्यात्मकं कृतं मङ्गलं शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति—श्रीलक्ष्मीति । श्रिया लोकोत्तरशोभया सहिता या लक्ष्मीर्मा । शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदस्य सहितेत्यस्य लोपः । तस्या रमणं दयितं विष्णुमित्यर्थः । हरिहरयोरभेदप्रतिपादनायाह—गौरीरमणेति । गौर्याः पार्वत्या रमणो महादेवस्तेन रूपयति तदभेदेन प्राहयति तादृशम् । "सुप्यजातौ" इति णिनिः । एतेन गौर्या रमणस्य रूपमस्यास्तीत्यर्थस्य गौर्या रमणो रूपं यस्येति बहुव्रीहिणैव लाभात् लाघवमूलकेन 'न कर्मधारयान्मत्वर्थीयः' इति न्यायेन मत्वर्थीयेनिप्रत्ययानुपपत्तिरित्यपास्तम् । नौमीति । णुधातोः कर्तरि लट् । तदर्थश्चोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो व्यापारः । तत्र बोधे विष्णोर्निष्ठत्वेनाऽन्वयः । तथा च गौरीरमणाभिन्नश्रीसहितलक्ष्मीरमणनिष्ठोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो मदभिन्नाश्रयवृत्तिर्व्यापार इति बोधः । "भावप्रधानमाख्यातम्" इति

१. श्री लक्ष्मीति । अत्र श्रिया सहितो लक्ष्मीरमण इत्यपि समासः । यद्वा श्रीश्च लक्ष्मीश्चेति विग्रहे द्वन्द्वं कृत्वा तयो रमणमिति षष्ठीतत्पुरुषः । अत्र श्री—लक्ष्मीशब्दयोः पर्यायतया एकशेषेण बाधात् कथं द्वन्द्व इति न शङ्क्यम् । श्रीश्च ते लक्ष्मीश्च पत्न्याविति यजुर्वेदे (अ० ३१।२२) पत्न्याविति द्विवचननिर्देशेन तयोः पर्यायत्वाभावात् ।

२. गौरीरमणेति । गौरीरमणस्य रूपं नित्यमस्यास्तीति विग्रहे भूमनिन्दाप्रशंसासुनित्यादिश्लोकवार्तिकसहकारेण अत इनिठनाविति सूत्रेण नित्ययोगे इनिः । एवं च नित्यमेव गौरीरमणरूपस्य सम्बन्धो न तु कादाचित्क इति । एतेन "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः" इति न्यायेनात्रेनिप्रत्ययो न साधुरित्यपास्तम् । उक्तार्थस्य बहुव्रीहिणाऽलाभात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते ॥ १ ॥
*अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥ २ ॥
*पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधं
[२]द्वैतध्वान्तनिवारणादिफलिकां पुम्भावबाग्देवताम् ।

निरुक्तोक्तेः । स्फोटरूपमिति । स्फुटत्यर्थोऽस्मादिति स्फोटः शब्दः, रूप्यते बोध्यते इति रूपमर्थः । स्फोटश्च रूपं चानयोः समाहारः स्फोटरूपं तादृशं जगत् । यतो—यस्माद् । विवर्तते—अतात्त्विकान्यथाभावाश्रयो भवति इत्यर्थः । अपरित्यक्तपूर्वरूपस्य रूपान्तरप्रकारकप्रतीतिविषय इति यावत् ॥ १ ॥

अशेषेति । अशेषाणां सम्पूर्णानां फलानां दाता तादृशम् । शेषषष्ठ्या समासः । तेन दातेत्यस्य तृन्नन्तत्वस्वीकारे "न लोक"-इति, तृजन्तपक्षे "तृजकाभ्याम्"-इति षष्ठीसमासनिषेधो नेति बोध्यम् ।

भवाब्धीति । भवः संसारोऽब्धिरिव तस्य तरणं नाशस्तस्मिन् । तरिं—नौकाम्, साधनमिति यावत् । "तरति शोकमात्मवित्" इति श्रुतेः । शेषस्य पतञ्जलेरशेषा अर्था वाच्या ध्वनिताश्च, तेषां लाभस्तस्मै, शेषो भूषणमलङ्कारत्वेन, पर्यङ्कत्वेन वा यस्य तादृशं शिवं विष्णुं वा प्रार्थये । अन्यदीयार्थस्य लोकेऽन्यतो लाभादर्शनेऽपि भगवतोऽशेषार्थदत्वात्तन्मङ्गलम् । एतेन पतञ्जलीयार्थलाभाय तस्यैव प्रार्थनोचितेति शङ्काया अनवकाशः । किञ्च ततोऽपि तस्यैश्वर्यत्वेन प्रधानत्वात् तस्मिन् परब्रह्मणि भगवति संतुष्टे सति तत्सेवकीयार्थप्राप्तिः सुतरां भवितुमर्हति, संतुष्टे राजनि तदीयभृत्यवर्गेभ्य इव, इति तस्यैव प्रार्थनोचितेति बोध्यम् ॥ २ ॥

व्याकरणशास्त्रप्रवर्तकाचार्यपाणिन्यादिमुनित्रयादिनमस्कारात्मकं मङ्गलमाचरन् प्रेक्षावत्प्रवृत्तिप्रयोजकानुबन्धचतुष्टयमव्यन्येषामुन्नेयतां बोधयन् विषयं दर्शयति-पाणिन्यादीति । द्वैतेति । द्वयोरनेकस्य भावो द्विता, नानात्वमित्यर्थः । तत्सम्बन्धि

---

१. अशेषेति । अत्राशेषफलं दातेति द्वितीयासमासोऽपि बोध्यः, "गम्यादीनामुपसङ्ख्यानमि"ति वार्तिकात् । ग्रामं गमीतिवत् । न च गम्यादौ पाठाभावः, वार्तिकस्थादिशब्दस्य लक्षणपरत्वेनाऽऽकृतिगणत्वस्वीकारात् ।

२. नमस्कार्यताप्रयोजकं पितृविशेषणं दर्शयति-द्वैतेति । द्वाभ्यां प्रकाराभ्यामितः प्राप्तो द्वीतस्तत्र भवं द्वैतम् । यद्वा द्वौ इत आश्रयतया प्राप्तो द्वीतो भेदस्तस्येदं ज्ञानं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दुण्ढि गौतम-जैमिनीय-वचनव्याख्यातृभिर्दूषितान्
*सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये (१) ॥ ३ ॥

[२]प्रारिप्सितप्रतिबन्धकव्यूहोपशमनाय कृतं श्रीपतञ्जलिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबन्धनं चिकीर्षितं प्रतिजानीते—

[३]फणिभाषितभाष्याब्धेः [४]शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह[५] कथ्यते* ॥ १ ॥

द्वैतम् । तदेव ध्वान्तं—तमः । तस्य निवारणमेवाऽऽदि मुख्यं फलं यस्यास्तादृशीम् । पुमान् भावो यस्याः सा, पुरुषाकृतिकेत्यर्थः । पुम्भावा चासौ वागेव देवता ताम्, सरस्वतीरूपामिति यावत् । व्याख्यातृभिरिति । अनेन गौतमादीनां पाणिन्यादिभिः सह विरोधाभावो ध्वनित इति बोध्यम् । अस्मिन् ग्रन्थे प्रकाश्यत्वेन निर्दिष्टो वैयाकरणसिद्धान्तो विषयः । तदुक्त्यैव तज्जिज्ञासूनामधिकारित्वम्, तज्ज्ञानस्य प्रयोजनत्वम्, प्रतिपाद्यप्रतिपादकभावः सम्बन्ध इति सर्वैः सुज्ञेयम् ॥ ३ ॥

कथ्यते इति । हर्यादिनिबद्धकारिकाभिरिति शेषः ।

द्वैतं, तदेव ध्वान्तं तमो गाढाज्ञानं तस्य निवारणमेवादि मुख्यं फलं यस्याः सा ताम् । एवेनाद्वैतिनां मतमेवास्माकमपि मूर्धन्यभूतमिति सूचितम् ।

१. उपपत्तिभिः = युक्तिभिः । २. प्रारिप्सितेति । प्रारिप्सितस्य = प्रारब्धुमिच्छाविषयीभूतस्यास्य ग्रन्थस्य ये प्रतिबन्धकाः विघ्नास्तेषां व्यूहः समूहस्तस्योपशमनाय प्रशमनार्थम् । क्वचित्पुस्तके व्यूहशब्दरहित एव पाठो दृश्यते । ३. फणिभाषितेति—फणिना पतञ्जलिना भाषितं यद्भाष्यं तदेव अब्धिस्तस्मात् । एतेन महाभाष्यस्यार्थगाम्भीर्यं समुद्रोपममिति ध्वनितम् । ४. शब्देति । शब्द एव कौस्तुभः । ५. इहेति—ग्रन्थे कारिकावलीरूपे । अत्र प्रायशो हरिकारिका एव भट्टोजिदीक्षितेनाऽपि समादृताः, बह्वयस्तु स्वनिर्मिता एव । अत एव ग्रन्थान्ते "भट्टोजिदीक्षितैः श्रेष्ठैर्निर्मिता" इत्यादि ।

---

(१) वाग्देवी यस्य जिह्वाग्रे नरीनर्ति सदा मुदा ।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ॥ ३ ॥
नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम् ।
श्रीकौण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम् ॥ ४ ॥

इमौ श्लोकौ मुम्बापुरीस्थराजकीयग्रन्थमालायां मुद्रितपुस्तके तृतीयपञ्चमावधिकावुपलभ्येते । परं च बृहद्वैयाकरणभूषणस्थत्वादस्माभिरुपेक्षितौ ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उद्धृत इति। अत्र अस्माभिरिति शेषः। भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्तिस्तु शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय। अन्यथा॥ तन्मूलकस्यास्य ग्रन्थस्याप्याधुनिकोत्प्रेक्षितसारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः॥। तत्र निर्णीत इत्युक्तिरितोऽप्यधिकं जिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुम् ॥ १ ॥

[1]प्रतिज्ञातमाह—

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ २ ॥

धातुरिति। अत्र स्मृत इति ॥वचनविपरिणामेनान्वयः। फलं विक्लित्त्यादि[2]। व्यापार[3]स्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया। उक्तञ्च वाक्यपदीये—

अन्यथा-शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वानिरासे। **अनुपादेयतापत्तेरिति**। अयं ग्रन्थ आधुनिकोत्प्रेक्षितशब्दकौस्तुभसारतया वैयाकरणैरुपादेयो न स्यादिति तन्निराकरणेन सर्वैरपि वैयाकरणैरवश्यमयमुपादेय इति ध्वनितम् ॥ १ ॥

विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षायां विशेष्यविशेषणवाचकपदयोः समानवचनत्वनियमेन धातुरित्यत्र बहुवचनान्तस्यान्वयासम्भव इत्याह—**वचनविपरिणामेति**। तद्विवक्षायां तु वेदाः प्रमाणमित्यादि भवत्येवेति

---

१. प्रतिज्ञातमिति। प्रतिज्ञाविषयीभूतमित्यर्थः। स्वकर्तव्यत्वप्रकारकबोधाऽनुकूलव्यापारः प्रतिज्ञा। स च व्यापार इदं ममावश्यं कर्तव्यमित्यादि शब्दप्रयोगरूपः।

२. ननु यथा स्वरितञित इत्यत्र फलपदेनोद्देश्यभूत गृह्यते न तु धातुवाच्यं विक्लित्युत्पत्त्यादि, तथैव अत्राऽपि चेत्तदोद्देश्यभूतस्य वाच्यत्वे पाकक्रियोद्देश्यबुभुक्षानिवृत्तेः पूर्वमपाक्षीदित्यादि प्रयोगाः कथं सङ्गच्छन्ते, फलानिष्पादादत आह—फलं विक्लित्त्यादीति। विक्लित्तिः क्लेदनम् (अवयवानां शिथिलीभवनम्) ननु यदि धातुवाच्यत्वमेव फलत्वं तर्हि व्यापारस्याऽपि फलत्वाऽऽपत्तिरिति चेन्न, धातुविशिष्टत्वं फलत्वं, वैशिष्ट्यञ्च स्वनिष्ठशक्तिप्रयोज्योपस्थितिविषयत्व, स्वनिष्ठशक्तिप्रयोज्योपस्थितिविषयनिष्ठजनकतानिरूपितजन्यत्वनिष्ठ-प्रकारतानिरूपकप्रतीतिविशेष्यत्वोभयसम्बन्धेनेति परिष्कारेणादोषात्। परे तु—धातुवाच्यत्वे सति धातुवाच्यव्यापारजन्यत्वमेव फलत्वं परिष्कुर्वन्ति।

३. व्यापारस्त्विति। मीमांसकनये लिङादिवाच्या शाब्दी भावना, तिङ् वाच्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यावत्सिद्धम्[1]असिद्धं[2] वा साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ॥ इति ।

न च साध्यत्वेनाभिधाने मानाभावः । पचति, पाकः, करोति, कृतिः इत्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराऽऽकाङ्क्षाऽनाकाङ्क्षयोर्दर्शनस्यैव मानत्वात् । तथा च क्रियान्तराऽऽकाङ्क्षानुत्थापकतावच्छेदकरूपं साध्यत्वम् । तद्रूपवत्त्वमसत्त्वभूतत्वम् । एतदेवादाय—

असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते ।

इति वाक्यपदीयमिति द्रष्टव्यम् । अयञ्च व्यापारः फूत्कारत्वाऽधः-सन्तापनत्व-यत्नत्वादितत्तद्रूपेण वाच्यः । पचतीत्यादौ तत्तत्प्रकारकबोध-

---

निरूपितं व्युत्पत्तिवादे विस्तरेणेति ततोऽवगन्तव्यम् । वाचकत्वेनेति शेषः । फलव्यापारयोरिति द्विवचनेनोभयोः पृथक् धातुशक्तिरिति सूचितम्

नागेशास्तु—पृथक्शक्तिस्वीकारे फलव्यापारयोरुद्देश्यविधेयभावेनान्वयापत्तिः । पृथगुपस्थितयोरर्थयोस्तथाऽन्वयस्यौत्सर्गिकत्वात् । किञ्च तत्पक्षे फलविशेषणकव्यापारबोधे कर्तृ-भाव—प्रत्ययसमभिव्याहृतधातुजन्योपस्थितेः व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्योपस्थितेः कारणत्वमिति कार्यकारणभावद्वयकल्पनम् , धातोरर्थद्वये शक्तिद्वयकल्पनं, धातोर्बोधजनकत्वसम्बन्धद्वयकल्पनं चेत्यतिगौरवम् । तस्मात् फलावच्छिन्ने व्यापारे, व्यापारावच्छिन्ने फले च शक्तिः । कर्तृकर्मार्थकतत्तत्प्रत्ययसमभिव्याहारश्च तत्तद्बोधे नियामकः । न च फलावच्छिन्नव्यापारत्वस्य, व्यापारावच्छिन्नफलत्वस्य च शक्यतावच्छेदकद्वयकल्पनप्रयुक्तं गौरवमेतेषामिति वाच्यम् , भिन्नशक्तिवादिनां फलविशेषणकव्यापारविशेष्यकावान्तरवाक्यार्थबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्यसमूहालम्बनात्मकोपस्थितिः कारणम् , व्यापारविशेषणकफलविशेष्यकबोधे कर्मप्रत्ययसमभिव्याहृतधातुजन्यसमूहालम्बनात्मकोपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पनेऽतिगौरवात् । विशिष्टशक्तिवादिनां तु तत्तत्समभिव्याहारवशादवान्तरवाक्यार्थबोधस्थानीयविशिष्टोपस्थितिरेकैवेति न तेषामुक्तकार्यकारणभावद्वयम् । एवं धातोः फलव्यापारसमूहार्थे उपस्थितिशक्तिकल्पनं, विशिष्टार्थे शाब्दबोधशक्तिक-

---

चार्थो भावना । सैवाऽर्थो भावना चास्माकं शाब्दिकानां व्यापारः । स च धात्वर्थ एव न तिङर्थ इति गूढाभिप्रायः । १ सिद्धमिति । भूतकालावच्छिन्नम् , अपाक्षीदित्यादौ । २ असिद्धमिति । वर्तमान भविष्यत्कालावच्छिन्नम् , पचति पक्ष्यतीत्यादौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्यानुभवसिद्धत्वात् । न च नानार्थताऽऽपत्तिः[1] । तदादिन्यायेन[2] बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्त्वात् । आख्याते क्रियैकत्वव्यवस्थाऽपि अवच्छेदकबुद्धिविशेषैक्यमादायैव । उक्तञ्च वाक्यपदीये-

गुणभूतैरवयवैः समूहः क्रमजन्मनाम् ।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥ इति ।

धात्वर्थं निरूप्य तिङर्थमाह—आश्रये त्विति । फलाश्रये, व्यापाराश्रये चेत्यर्थः । फलाश्रयः कर्म्म । व्यापाराश्रयः कर्त्ता । तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिः, अन्यलभ्यत्वात् । शक्यतावच्छेदकं चाऽऽश्रयत्वं तत्तच्छक्तिविशेषरूपमिति सुबर्थनिर्णये वक्ष्यते ।

ल्पनं, शक्तेर्बोधजनकतायाश्चासंबद्धे धातावनुपपत्त्या विशिष्टार्थनिरूपितसंबन्धद्वयकल्पनं च विशिष्टधाताविस्यतिगौरवमित्याहुः ।

वस्तुतस्तु एवं विशिष्टशक्तिस्वीकारे "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति न्यायाद् द्वितीयादिपदार्थान्तरस्य व्यापारविशेषणीभूतफलेन सहान्वयानुपपत्तिः, पदार्थैकदेशत्वात् । अतः खण्डशः शक्तिः स्वीकार्येति मूलाशयः । तत्र च एकत्वन्ता-

---

१. न च नानार्थतेति । वाच्यत्वं शक्तिरिति मतेन नानाधर्मावच्छिन्नशक्तिनिरूपकताऽऽवच्छेदकैकधर्मवत्त्वं नानार्थत्वमिति तात्पर्येणाय पूर्वपक्षः । २ उक्तस्थले नानार्थत्वं परिहरति—तदादिन्यायेनेति यथा स घट इत्युक्ते बुद्धिस्थो (बुद्धिविषयो) घट इत्यर्थः प्रतीयते, तत्र बुद्धिस्थत्वं घटेऽपि घटत्वेऽपि । तेनैव बुद्धिस्थत्वेन (विषयतासम्बन्धेन बुद्धिविशेषेण) उपलक्षणीभूतेन घटत्वादीननुगमय्य बुद्धिस्थत्वोपलक्षितघटत्वाद्यवच्छिन्ने घटादौ तदादीनां शक्तिः स्वीक्रियते । सा चैकैव, शक्यतावच्छेदकानां घटत्वादीनामनुगमकस्य (अवच्छेदकस्य) बुद्धिविशेषस्यैक्यात् । तथैवाऽत्राऽपि एकबुद्धिविषयत्वेनाऽनुगतीकृता ये फूत्कारत्वादयस्तदवच्छिन्ने व्यापारे पच्धातोः शक्तिरतस्तस्या एकत्वान्न नानार्थत्वम् नन्वेवं हर्यादिपदेऽपि नानार्थत्वं न स्यादिति चेन्न, अननुगतनानाधर्मावच्छिन्नशक्तिनिरूपकताऽवच्छेदकैकधर्मवत्त्वं नानार्थत्वमिति परिष्कारेणादोषात् । मान्यास्तु–विक्लित्तिजनकतावच्छेदकत्वेन रूपेण फूत्कारत्वादीननुगमयन्ति । वस्तुतस्तु स्वाश्रयनिरूपितविषयतावच्छेदकत्वसम्बन्धेन बुद्धित्वरूपजातेरनुगमकत्वे न कोऽपि दोषोऽस्त आह–आदेरिति ।

३. नन्वाश्रयत्वस्य निरूपकाश्रयभेदाभ्यां भेदे (अनेकत्वे) अनुगमाभावात्कथमवच्छेदकत्वमिति चेत्तत्रोच्यते–तत्तच्छक्तिविशेषेति–शक्तिधर्मं, एवं च तत्तत्कर्तृत्वादिधर्मविशेषरूपं तच्चाखण्डोपाधिरूपमतस्तस्य घटत्वादिजातिवदेकत्वमवच्छेदकत्वं च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

[1]नन्वनयोराख्यातार्थत्वे किं मानम्, ❀प्रतीतेः–लक्षणया[2]❀, आक्षेपात्❀, प्रथमान्तपदाद्❀ वा सम्भवादिति चेत् ?

अत्रोच्यते—"लः कर्मणि च भावे चाकर्म्मकेभ्यः" इति सूत्रमेव मानम्[3] । अत्र हि चकारात् "कर्त्तरि कृत्" इति सूत्रोक्तं कर्त्तरीत्यनुक्-

---

वलम्बिफलद्वयवत् उभयोरपि पर्यायेण कर्तृकर्मादिसमभिव्याहारे विशेष्यत्वं विशेषणत्वं च सूपपादम् । अस्मिंश्च पक्षे नोद्देश्यविधेयभावेनान्वयापत्तिः, तयोरेकशक्त्योपस्थितेः । नापि कार्यकारणभावद्वयकल्पनादिगौरवमित्यन्यत्र विस्तरः ।

प्रतीतेरिति । अस्य संभवादित्यनेनाऽन्वयः । फलाश्रयव्यापाराश्रयप्रतीतेरित्यर्थः । लक्षणयेति । ननु आख्यातस्याश्रयलक्षकत्वे भावनाप्रतीतिर्न स्यात्, अतः तत्प्रतीतिः शक्त्या वाच्या । तस्यां चावस्थायां लक्षणाया असंभवो युगपद्वृत्तिद्वयविरोधात् । भावनाश्रयत्वेन भावनाश्रये लक्षणायां भावनाप्रतीतावपि भावनायाः प्राधान्यं न स्यात्, तस्या विशेषणतयोपस्थितेः, इत्यरुचेराह—आक्षेपादिति । मीमांसकमते अर्थापत्तेर्न्यायमते च अनुमानादित्यर्थः । तत्राद्ये दिवाभोजनाभाववद्देवदत्तनिष्ठेन भोजनं विनाऽनुपपन्नेन पीनत्वेन रात्रिभोजनकल्पनवत् कर्तारं विनाऽनुपपन्नेन व्यापारेण कर्तृरूपाश्रयः कल्प्यते । अन्त्ये भावना आख्यातपदबोध्या क्वचिदाश्रिता, विशेषणत्वेन गृहीतशक्तिकत्वात्, घटत्ववत् इति ।

ननु मीमांसकमते आक्षिप्तस्य शाब्दबोधे भानेऽपि तस्य विशेषणत्वेनैवोपस्थितेः प्रकृते भावनायाः प्राधान्यानुपपत्तिः, न्यायमते च व्याप्त्यादिप्रतिसंधानं विनाऽप्याश्रयबोधस्यानुभवसिद्धत्वान्नाक्षेपादाश्रयभानोपपत्तिः, इत्यरुचेराह—प्रथमान्तपदाद्धेति । 'चैत्रः पचति' इत्यादौ चैत्रादिपदादेव तदाश्रयप्रतीतेरित्यर्थः ।

निर्वहति । यथा क्षितीयादीनामाश्रयोऽर्थस्तत्राऽपि आश्रयत्वस्य तत्त्वम् । यदि तु "सप्तमीपञ्चम्यौ" इति सूत्रस्थभाष्यात्कर्तृत्वादिशक्तेर्भेद एव, तदा तु आश्रयतात्वेन सर्वा आश्रयस्वरूपकर्तृत्वादिशक्तीरनुगतीकृत्याश्रयत्वस्य शक्यतावच्छेदकता निर्वाह्येति सङ्क्षेपः । १ मीमांसकमतं निराकुर्वन् स्वमतं युक्त्या स्थापयन् शङ्कते नन्विति ।

२. ननु कैरुपायैः प्रतीतिः सम्भवतीत्यत आह–लक्षणयेत्यादि । एवं च लक्षणया, आक्षेपात्, प्रथमान्तपदाद्वेति त्रिभिः प्रकारैः कर्तृकर्मोभयविषयिणी प्रतीतिः सम्भवत्येव, किमित्यनयोस्तिङर्थत्वं स्वीक्रियते शाब्दिकैरिति पूर्वपक्षिणां मीमांसकादीनामाशयः ।

३. मानमिति–अनुमापकमित्यर्थः, अनुमितिहेतुघटकमिति यावत् । तथा हि–

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ध्यते। बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्म्मणि, कर्त्तरि चानेन विधीयन्ते। नकारविसर्गादिनिष्ठां कर्म्मकरणादिबोधकताशक्तिमादाय शसादिविधानवत्। न[1] च सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे। तथा च कर्तृत्वं कृतिः, कर्म्मत्वञ्च फलमेवार्थोऽस्तु, इति शङ्क्यम्, फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पनाऽयोगात्।

अथ[2] दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकारविधिः स्यादिति चेत्? तर्हि कृतामपि कर्तृकर्म्मादिवाचित्वं न सिध्येत्। "कर्त्तरि कृत्" इति च "लः कर्म्मणि" इत्यनेन तुल्ययोगक्षेमम्[3]। अपि च मीमांसकानां कृतामिवाख्यातानामपि कर्तृवाचित्वमस्तु, भावनाया एवाक्षेपेण कृदादिवत्प्रतीतिसम्भवे वाच्यत्वं माऽस्तु। तथा सति प्राधान्यं तस्या न स्यादिति चेत्? न, 'घटमानय'[4]इत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः। 'पचति'इत्यादौ'पाकं करोति' इति भावनाया विवरणदर्श-

---

तिरूपदम्, आश्रयनिरूपितशक्तिमत्, लः कर्मणीतिसूत्रगृहीतशक्तिकत्वात्, यद् यद्धर्मावच्छिन्नगृहीतशक्तिकपाणिनीयसूत्रकं, तत् तद्धर्मावच्छिन्ननिरूपितशक्तिमद्, यथा तृजादयः कर्तरि कृदिति सूत्रेण कर्तृत्वाऽवच्छिन्ने गृहीतशक्तिका अतस्तत्र शक्ता इति।

१. मीमांसकमतं पुनरुत्थापयति- न च सूत्रे इत्यादिना।

२. पुनरपि मीमांसकोक्तां शङ्कामवतारयति–अथ दर्शनेत्यादिना। अन्यद् = न्यायादिभिन्नं दर्शनं–दर्शनान्तरं मीमांसादर्शनं तत्र भवा रीतिरित्यर्थः।

३. तुल्ययोगक्षेममिति। अलभ्यलाभो योगः, यथा प्रकृते "लः कर्मणि" इति सूत्रे कर्तृपदस्य न तावत्स्वारसिकोऽर्थः कर्तृत्वरूपः किन्तु तस्य लक्षणया लाभरूपयोगः परैः क्रियते, तादृशस्यैव योगस्य कर्तरि कृदिति सूत्रेऽपि अवार्यमाणत्वाऽपत्तिः। लब्धस्य परिरक्षणं–क्षेमं यथा कर्तरि कृदिति सूत्रं कर्तृपदलब्धो यः कर्तृरूपोऽर्थस्तस्य परिरक्षणं–विधत्ते चेल्लः कर्मणीत्यपि तादृशं क्षेमं विदधीतेति तुल्यत्वमिति संक्षेपः।

४. घटमानयेति। जातौ शक्तिं स्वीकुर्वन्तोऽपि मीमांसका आश्रयमन्तरा जात्यन्यथाऽनुपपत्त्या समवायेन स्वाश्रयीभूतां व्यक्तिमाक्षिप्य तस्याः शाब्दविषयत्वं प्राधान्यं च मन्वतेऽन्यथा (प्रकारतया भाने) घटनिष्ठं यद् घटत्वं तत्कर्मकमानयनमिति बोधे प्रसक्तेऽयोग्यत्वाऽऽपत्तेः। तद्वत् प्रकृते भावनाया आक्षेपेऽपि प्राधान्यं सम्भवेत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाद् वाच्यत्वमिति चेत्? पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषयत्वाविशेषात्। न च कर्तुर्विवरणं, तात्पर्यार्थविवरणं, 'पाकं करोति' इति अशब्दार्थकर्मत्वविवरणवत्, इतरेतरयोगद्वन्द्वे समुच्चयांशविवरणवद्वा न तदर्थनिर्णायकमिति वाच्यम्, भावनायामपि तुल्यत्वात्।

किञ्च 'पचति देवदत्तः' इत्यत्राभेदान्वयदर्शनात् तदनुरोधेन कर्तुर्वाच्यत्वमावश्यकम्, 'पक्ता देवदत्तः' इतिवत्। न चाभेदबोधे समानविभक्तिकत्वं नियामकम्, तच्च तत्र नास्तीति वाच्यम्, 'सोमेन[1] यजेत' 'स्तोकं[2] पचति' 'राजपुरुषः[3]' इत्यादावप्यभेदबोधानात्तेः। न च लक्षणया कर्तुरुक्तत्वात् सामानाधिकरण्यम्, पिङ्गाद्यादियौगिकानामपि द्रव्यवाचित्वानापत्तेः। एवं वैश्वदेवीत्यादितद्धितानामपि, "अनेकमन्यपदार्थे" "साऽस्य देवता" इत्यनुशासनेन पिङ्गे अक्षिणी यस्याः, विश्वेदेवा देवता अस्या इति विग्रहदर्शनात्प्रधानषष्ठ्यर्थे एव अनुशासनलाभात्। तथा च "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति वाक्ये द्रव्यानुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्ये एवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तिः। द्रव्यवाचकत्वसाधकमूलयुक्तेः सामानाधिकरण्यरयोक्तरीत्योपपत्तेरिति प्रपञ्चितं विस्तरेण बृहद्वैयाकरणभूषणे*।

---

*बृहद्वैयाकरणभूषणे इति। तत्र हि 'देवदत्तः पचति' 'पच्यते तण्डुलः' इत्यादिसामानाधिकरण्यादाख्यातस्य कर्तृकर्मवाचकत्वम्। न चेदमसिद्धम्, अन्यस्मिन् पचति सति 'देवदत्तः पचति' इत्यप्रयोगेण तस्यानुभवसिद्धस्य विना हेतुं कर्तृवाच्यत्वभीत्यैवापलापायोगात्। 'त्वं पचसि' इत्यादौ युष्मच्छब्दसामानाधिकरण्यस्यानुभवमनुसरता सूत्रकृताऽनूद्य तदनुसारेण पुरुषव्यवस्थाया "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" इत्यादिना कृतत्वाच्च। अन्यथा 'नीलो घटः' देवदत्तः पक्ता' 'चित्रगुर्देवदत्तः' 'पिङ्गाक्षी गौः' 'स्तोकं पचति' 'ज्योतिष्टोमेन यजेत' इत्यादावपि

---

१. सोमेनेति। अत्र सोमस्य सोमवति लक्षणायां लक्ष्यार्थस्य धात्वर्थयागेऽभेदेनाऽन्वये "सोमवता यागेन इष्टं (स्वर्गादि) भावयेदिति बोधो मीमांसकैः स्वीक्रियते, तत्र क्व समानविभक्तिकत्वम्? । २. स्तोकमिति। अत्राऽपि स्तोकस्य पचधात्वर्थे विक्लित्तिरूपे फलेऽभेदाऽन्वयः। ३. राजपुरुष इति। अत्राऽपि राजपदस्य स्वसम्बन्धिनि लक्षणायां तस्य पुरुषेऽभेदान्वयो मीमांसकसम्मतस्तत्राऽपि क्व समानविभक्तिकत्वमिति तत्त्वम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तिङ इति । बोधक[1]तारूपा शक्तिस्तिङ्क्ष्व[2]वेत्यभिप्रेत्येदम् । पदार्थं[3] निरूप्य वाक्यार्थं निरूपयति—फलेत्यादि । विक्लित्त्यादि फलं प्रति ।

तदपलापापत्तेः । न च पदार्थानामभेदबोधे समानविभक्तिमत्पदोपस्थाप्यत्वं तन्त्रम्, तच्चात्र नास्तीति कारणबाधान्न सामानाधिकरण्यमिति वाच्यम्, 'राज्ञः सुतस्य धनम्' इत्यादावतिप्रसक्तत्वेन 'राजपुरुषः' 'धान्येन धनी' 'स्तोकं पचति' 'ज्योतिष्टोमेन यजेत' इत्यादावतिप्रसक्तेश्चास्यातन्त्रत्वात् ।

अथ विरुद्धार्थकविभक्तिराहित्यं तन्त्रम् । सुप्तिङोश्च न विरोधः । एवञ्च विशेष्यतासम्बन्धेनाभेदसम्बन्धकतन्नामार्थप्रकारकशाब्दबोधं प्रति तन्नामोत्तरसार्थकविभक्त्युपस्थित्यकालिकतन्नामोत्तरविभिन्नविजातीयसुबसमभिव्याहृतपदजन्योपस्थितिः कारणमिति कार्यकारणभावः फलितः । स्तोकमित्यादौ द्वितीयात्वभेदार्था, साधुत्वमात्रार्था वा । यद्वा विरुद्धरूपेणानुपस्थितिस्तत्र तन्त्रमिति चेत्? तर्हि 'देवदत्तः पचति' इत्य, त्राप्यभेदबोधो दुर्वार इति सिद्धं नः समीहितम् । आख्यातस्य शक्तिकल्पना च कृतां कर्तृशक्या तुल्या, परं तु आख्यातार्थभावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तकार्यकारणभावान्तरस्य, भावनाविशेष्यककर्तृविशेषणकबोधाय मीमांसकीयस्य च तस्याकल्पनाल्लाघवमस्माकमतिरिच्यते ।

अथास्तु सामानाधिकरण्यम्, परं तु तद् भावनाक्षिप्तकर्ता भविष्यतीत्यसकृद्वार्तिक एवोद्घोषितमिति चेत्? न, आक्षेपो हि यद्याख्यातार्थभावनयाऽनुमानं तर्हि 'धूमोऽयं ज्वलति' इत्यादाविव तदसम्भवात् । मैत्रादिपदयोगे तदसम्भवाच्च । लक्षणा चेत्? पिङ्गाक्ष्यादियौगिकेष्वपि द्रव्यवाचित्वं न स्यात् । मूलयुक्तेः सामानाधिकरण्यस्योक्तरीत्यैवोपपत्तेः । द्रव्यवाचकत्वसाधकान्तरस्याभावाच्च इति कर्तुराख्यातवाच्यत्वं प्रपञ्चितम् । किञ्च "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति" इति श्रूयते । तत्रारुणाशब्दो गुणविषयतया प्रयुज्यमानोऽपि अरुणं गुणमाचष्टे । 'नाप्रतीतवि-

---

१. ननु लः कर्मणीति सूत्रेणाश्रयार्थनिरूपितशक्तेर्लकारे एव बोधनात्तिङ इत्यनुचितम्, "आश्रये तु लडादयः" इत्युचितम्मूलकारिकायामित्यत आह—बोधकतेति । लोके आश्रयार्थविषयकबोधजनकता तिङ्क्ष्वेवेत्यर्थः । २. तिङ्क्ष्वेवेति-एवकारेण लकारव्यावृत्तिः ।

२ पदार्थं निरूप्येति । वाक्यार्थज्ञाने पदज्ञानं पदार्थज्ञानं च कारणमिति नियममनुसृत्य कारणीभूतं पदार्थनिरूपणं कृत्वा तत्कार्यभूतवाक्यार्थनिरूपणेन प्रसङ्गरूपसङ्गतिर्दर्शिता, सा च स्मृतत्वे सत्युपेक्षाऽनर्हत्वरूपा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लिङर्थः कर्तृ-कर्म्म-संख्या-कालाः। तत्र कर्तृकर्म्मणी फलव्यापारयोर्विशेषणे, संख्या-कर्तृप्रत्यये कर्त्तरि, कर्मप्रत्यये कर्म्मणि, समानप्रत्ययोपात्तत्वात्[1]।

षेणा विशिष्टबुद्धिः' इति न्यायाद्, अन्वयव्यतिरेकाभ्यां तत्रैव व्युत्पत्तेश्च। तस्य च तृतीयाश्रुत्या क्रयसाधनत्वं प्रतीयते। तच्चानुपपन्नम्, अमूर्त्तस्य तस्य वासोहिरण्यादिवत् क्रयसाधनत्वासम्भवात्। उक्तं च—

अमूर्त्तत्वाद् गुणो नैव क्रियां साधयितुं क्षमः।
तस्मात् क्रीणातिना नास्य सम्भवत्येकवाक्यता॥ इति।

अतश्च तृतीयाश्रुतेरविनियोजकतया तया ज्योतिष्टोमप्रकरणगतग्रहचमसादीन् करणतयोपदिष्टाननूद्यारुण्यरूपो गुणो विधीयताम्। तथा च अरुणया इति भिन्नं वाक्यं, पिङ्गाक्ष्येति च। तत्रायस्य येन द्रव्येण किञ्चित् क्रियते, तदरुणेन इत्यर्थः। एवं च प्राकरणिकद्रव्यमात्रे आरुण्यनिवेश इति पूर्वपक्षे सिद्धान्तसूत्रम्—"अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्" इति (अ० ३ पा० १ अधि० ६ सू० १२)। अयमर्थः—द्रव्यगुणयोरेकक्रियान्वयित्वरूपार्थैकत्वे सम्भवति तयोः परिच्छेद्यपरिच्छेदकभावनियमः। ऐककर्म्याद्—एकार्थप्रतिपादकत्वरूपैकवाक्यत्वात्। अयम्भावः—उदाहृतवाक्येन भावार्थाधिकरणन्यायेन (अ० २ पा० १ अधि० ५ सू० १ द्वितीयवर्णकम्) क्रयो विधीयते। तस्मिंश्च तृतीयाश्रुत्या पिङ्गाक्ष्यादेर्यथा करणत्वं, तथा आरुण्यगुणस्यापि। तच्च स्वसाध्यक्रियापेक्षिततया पिङ्गाक्ष्यादिद्रव्यमनपेक्ष्यैव वाक्येन साक्षात् क्रयेऽन्वेति। खलेकपोतन्यायेन सर्वकारकाणां साक्षात् क्रियान्वयनियमात्। उक्तं च वार्तिके—

कारकं ह्युच्यते कुर्वन्नाक्रियां तत्करोति च।
तस्मान्न द्रव्यसम्बन्धः कारकस्यास्ति कस्य चिद्॥ इति।

यदि तस्यामूर्त्तत्वात् साक्षात् क्रियासाधनत्वं न सम्भवति इति विभाव्यते, तर्हि क्रयसाधनद्रव्यपरिच्छेदमुखेनान्वीयताम्। तदुक्तं वार्तिके—

तृतीयया गुणस्यैव करणत्वं क्रयं प्रति।
विस्पष्टं गम्यते तत्र द्रव्यद्वारेण युज्यते॥ इति।
द्रव्येण साधनीयेयमिति ज्ञाता यदा क्रिया।
कीदृशेनेत्यपेक्षास्य गुणोऽप्युत्पद्यते तदा॥ इति च।

---

१. समानप्रत्ययोपात्तत्वादिति। स्ववाचकप्रत्ययवाच्यत्वादित्यर्थः। अत्र एव सङ्ख्या तद्वाचकः प्रत्ययस्तिवादिस्तद्वाच्यत्वं कर्त्रादौ सङ्ख्यायामपि। इयमेव मीमांसकैः समानाभिधानश्रुतिरिति व्यवह्रियते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथा चाऽऽख्यातार्थसंख्याप्रकारकबोधं प्रत्याऽऽख्यातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः । नैयायिकादीनामाख्यातार्थसंख्या-

---

द्रव्यमप्यपरिच्छिन्नं न क्रियां साधयितुमलमिति परिच्छेदकमपेक्षते । गुणश्च साधनत्वेनोच्यमानः, तां च स्वतः साधयितुमक्षमस्तदर्थं परिच्छेद्यं द्रव्यमपेक्षते इति द्रव्यगुणयोः परस्परमपेक्षित्वात् सुनिरूपितः पार्ष्णिकः परिच्छेद्यपरिच्छेदकभावेनान्वयः । युक्तं च गुणस्य तत्परिच्छेदकत्वात् क्रियासाधनत्वाभिधानम् । एवं च साधनत्वेन गुणं विदधती श्रुतिः यथैतेन शक्यते क्रियां साधयितुं तथा कुर्यादित्याह । स च द्रव्यपरिच्छेदेनैव शक्नोति साधयितुं, नान्यथा । तथा च अरुणपरिच्छिन्नेन पिङ्गाक्षीद्रव्येण क्रयं कुर्यादित्यर्थस्य पर्यवसानेन वाक्यभेदाभावेन च न चमसादिषु गुणो निविशते । किञ्च प्रकरणेन चमसादिषु गुणनिवेशं वदता वक्तव्यमिदं—'केन तत्र गुणो विधीयते' इति । न च श्रूयमाणविधिना क्रीणातिना त्वया सम्बन्धस्य नेष्यमाणत्वात् । नाप्यरुणपदस्य विधिशक्तिरस्ति । प्रयोगवचनं त्वक्रियात्मकं दूरादुपेक्षते । मम तु क्रीणातिना सम्बन्धस्येष्टत्वात् सुलभं विधानम् । न चैवं वासोहिरण्यादिषु क्रयसाधनत्वात्तन्निवेशः स्यादिति वाच्यम्, तेषां क्रयान्तरसाधनत्वात् । न हि स्ववाक्यगतं पिङ्गाक्षीद्रव्यमुपेक्ष्य वाक्यान्तरोपात्तस्याथयच्छेदो युक्तः । तस्मादारुण्यगुणः क्रयहेतुपिङ्गाक्षीमेव भजते । विस्तरस्त्वस्मत्कृतलघुपूर्वमीमांसाऽधिकरणकौमुदीपरिशिष्टाधिकरणे द्रष्टव्यः । तथा च प्रकृते पिङ्गाक्ष्यादियौगिकपदानां—मतुबर्थे समासस्य विधानात् मतुपश्च "तदस्यास्त्यस्मिन्" इति षष्ठ्यर्थेऽनुशासनेन प्रत्ययार्थत्वात् पिङ्गे अक्षिणी यस्याः, विश्वे देवा देवता अस्या, इत्यादौ प्रत्ययार्थसम्बन्धप्राधान्येन विवरणदर्शनाच्च संसर्गवाचित्वात् । उक्तं चारुणाधिकरणवार्तिके—

बहुव्रीहिः समासोऽयं मतुबर्थे विधीयते । अस्यात्रेति च सम्बन्धे मत्वर्थीयः प्रवर्तते ॥
यस्मिन्नन्यपदार्थे च बहुव्रीहिर्विधीयते । तत्रापि प्रत्ययार्थत्वात् सम्बन्धस्य प्रधानता ॥ इति ।

---

१. कार्यकारणभावः फलित इति । सर्वत्रैव शाब्दबोधीयकार्यकारणभावस्थले द्वयीविधा । आत्मनिष्ठप्रत्यासत्त्या (समवायसम्बन्धेन) विषयनिष्ठप्रत्यासत्त्या (विषयतासम्बन्धेन) वा । प्रथमे प्रकारे समवायसम्बन्धेन ज्ञानमात्मनि उत्पद्यते तत्रैव समवायेनोपस्थित्यादिकारणानामप्यपेक्षा द्वितीये प्रकारे विषयतासम्बन्धेन तद्व्याप्यविशेष्यत्वादिसम्बन्धेन ज्ञानं विषये घटपटादौ जायते, तत्रैव तत्सम्बन्धेन उपस्थित्यादिकारणापेक्षा । एव च कार्यतायाः कारणतायाश्चावच्छेदकं समवायं विषयतासम्बन्धं वा गृहीत्वा कार्यकारणभावः प्रकृते स्वयमूहनीयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

याः प्रथमान्तार्थ एवान्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्य्यकारणभावो वाच्यः* । सोऽपि—चन्द्र इव मुखं दृश्यते, 'देवदत्तो भुक्त्वा व्रजति, इत्यादौ चन्द्रक्त्वाऽर्थयोराख्यातार्थानन्वयाद् इतराविशेषणत्वघटित इत्यतिगौरवम्* ।

*इदमपि कर्तृकर्म्मणोराख्यातार्थत्वे मानमिति स्पष्टं बृहद्भूषणे ।

सम्बन्धिप्रतीतिस्तु लक्षणयैव सिद्धेः तदर्थं तच्छक्तेरनावश्यकतया तैः पदैर्द्रव्यस्यानुपादानात् स्ववाक्योपात्तपिङ्गाक्ष्यादिद्रव्यपरिच्छेदकत्वमेवाऽरुण्यस्य, न वस्त्रहिरण्यादिपरिच्छेदकत्वं वाक्यान्तरोपात्तत्वात् इति सिद्धान्तानुपपत्तिः । किञ्च पूर्वपक्षोऽपि नोपपद्यते । पिङ्गाक्ष्येकहायनीशब्दार्थसम्बन्धस्याप्यमूर्त्तत्वात् क्रयकरणत्वासम्भवेन क्रयकरणत्वस्यैतद्वाक्यादलाभादरुणस्यैव वाक्यभेदशङ्कायां हेतोः शैथिल्यात् । एवं च तदधिकरणं सर्वथाऽनुपपन्नं स्यादिति । अधिकविस्तरस्तु बृहद्भूषणतोऽवगन्तव्यः ।

*कार्यकारणभावो वाच्य इति—आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति प्रथमान्तपदजन्यकर्तृविषयिण्युपस्थितिः कारणमित्यर्थः ।

*अतिगौरवमिति—अयम्भावः—आख्यातार्थसंख्यानिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति प्रथमान्तपदजन्योपस्थितेः कारणत्वे चन्द्र इव मुखं दृश्यते, 'देवदत्तो भुक्त्वा व्रजति, इत्यादौ चन्द्रादेरपि प्रथमान्तार्थतया तत्राप्याख्यातार्थसंख्याया अन्वयापत्तिः । न चेष्टापत्तिः चन्द्र इव मुखे दृश्येते इत्यत्र चन्द्रस्यैकत्वेन द्वित्वान्वयासम्भवात् । अतोऽन्यार्थनिष्ठप्रधानतानिरूपितप्रकारतानाश्रयत्वेन प्रथमान्तपदजन्योपस्थितेः कारणत्वं वाच्यम् । अत्र तु चन्द्रस्य इवार्थसादृश्यप्रतियोगितयोपस्थितेर्नैतादृशोपस्थितिरिति । अस्माकं तु चन्द्रक्त्वार्थयोस्तत्राख्यातार्थत्वविरहेणैवोक्तापत्त्यभावेन नोक्तनिवेशापेक्षेति लाघवम् ।

इदमपि—उक्तनिवेशगौरवमपि । लाघवमपीत्यर्थो वा ।

---

१. इतराविशेषणत्वेति । प्रथमान्तार्थेतरार्थनिष्ठविशेष्यतानिरूपितप्रकारत्वाघटित इत्यर्थः । एवं चेतरविशेषणताऽनापन्नार्थविषयिणी प्रथमान्तपदजन्योपस्थितिः कारणमिति तत्त्वम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कालस्तु व्यापारे विशेषणम् । तथा हि—"वर्तमाने लट्" इत्यत्रा-धिकाराद्धातोरिति लब्धम् । तच्च धात्वर्थं वदत्प्राधान्याद् व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः । न च संख्यावत्कर्तृकर्मणोरेवान्वयः शङ्क्यः, अतीतभावनाके कर्तरि 'पचति' इत्यापत्तेः, 'अपाक्षीत्' इत्यनापत्तेश्च । पाकानारम्भदशायां कर्तृसत्त्वे 'पक्ष्यति' इत्यनापत्तेश्च । नापि फले तदन्वयः, फलानुत्पत्तिदशायां व्यापारसत्त्वे 'पचति' इत्यनापत्तेः, 'पक्ष्यति' इत्यापत्तेश्चेत्यवधेयम् । न चामवातजडीकृतकलेवरस्योत्थाना-नुकूलयत्नसत्त्वाद् 'उत्तिष्ठति' इति प्रयोगापत्तिः, परयत्नस्याज्ञानादप्रयो-गात् । किञ्चिच्चेष्टादिनाऽवगतौ च 'अयमुत्तिष्ठति, शक्त्यभावात् फलं तु न जायते' इति लोकप्रतीतेरिष्टत्वात् । एवञ्च तिङर्थो विशेषणमेव, भावनैव प्रधानम् ।

यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र[1] दृष्टं, तथापि "भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि" इति निरुक्ताद् भूवादि-सूत्रादिस्थक्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमध्यवसी-यते । अपि च आख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः समभेदान्वया-त्प्रथमान्तस्य[2] प्राधान्यापत्तिः, तथा च 'पश्य मृगो धावति' इत्यत्र भाष्य-सिद्धैकवाक्यता[3]* न स्यात्, प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य

---

*एकवाक्यतेति । तल्लक्षणं तु गुरुचरणैर्हलन्तप्रकरणे शब्देन्दुशेखरटिप्पण्यामुक्तं, तत एवावगन्तव्यम् ॥ २ ॥

---

१. अन्यत्र दृष्टमिति । तिङ्स्थलादन्यत्रेत्यर्थः । यथा पाचकः, औपगव इत्यादिकृत्तद्धितान्तस्थले । आद्ये ण्वुलर्थाश्रयस्य अन्त्येऽणप्रत्ययार्थापत्यस्य च प्राधान्यम् । २. प्रथमान्तस्येति । प्रथमान्तार्थस्येत्यर्थः । ३. भाष्यसिद्धेति । एकार्थमुख्यविशेष्यकबोधजनकत्वमेकवाक्यत्वं यथा—देवदत्त ओदनं पचतीत्यत्र देवदत्ताभिन्नैकत्ववदाश्रयवृत्तिर्वर्तमानकालिक ओदननिष्ठविक्लित्त्यनुकूलव्यापार इति बोधस्तत्र व्यापारस्य सर्वापेक्षया प्राधान्यादेकार्थमुख्यविशेष्यकबोधजनकत्वरूपैकवा-क्यता उक्तवाक्यस्य सङ्गच्छते । एवमेव पश्य मृगो धावतीत्यत्र "मृगकर्तृकधावनानु-कूलव्यापारकर्मकं त्वत्कर्तृकं दर्शनमिति बोधे भाष्यसिद्धैकवाक्यता निर्वहति । सा च प्रथमान्तार्थमुख्यविशेष्यकबोधवादिनां तार्किकाणाम्मते नोपपद्येत, धावनानुकूल-कृतिमान् मृग इति बोधस्य मृगो धावतीत्यतः, तत्कर्मकदर्शनाश्रयस्त्वमिति बोधस्य पश्येत्यस्माद्वाक्याच्च प्रसङ्गेनैकार्थमुख्यविशेष्यकबोधाभावात् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः । न चैवमप्रथमासामानाधिकरण्यात् शतृप्रसङ्गः, एवमपि द्वितीयाया दुर्वारत्वेन 'पश्य मृग' इत्यादिवाक्यस्यैवासंभवापत्तेः[1] । न च 'पश्य' इत्यत्र 'तम्' इति कर्माध्याहार्य्यम्, वाक्यभेदप्रसङ्गात्, [2]उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्म्मतयाऽन्वयस्य प्रतिपिपादयिषितत्वाद्, अध्याहारे अनन्वयापत्तेश्च[3] । एवञ्च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयम् । किन्तु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्य्यकारणभावो द्रष्टव्यः । भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद् धात्वर्थभावनोपस्थितिरपि हेतुः, 'पश्य मृगो धावति' 'पचति भवति' इत्याद्यनुरोधादिति दिक् ।

इत्थञ्च 'पचति' इत्यत्र एकाश्रयिका पाकानुकूलाभावना, 'पच्यते' इत्यत्र एकाश्रयिका या विक्लित्तिस्तदनुकूला भावनेति बोधः । देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः । 'घटो नश्यति' इत्यत्रापि घटाभिन्नाश्रयको नाशानुकूलो व्यापार इति बोधः[4] । स च व्यापारः [5]प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम् । अत एव तस्यां

"सकृदुच्चरितः शब्दः सकृदर्थं गमयति" इत्येतन्मूलकेन 'एकशक्तिनिरूपकार्थविषयकशाब्दबुद्धित्वावच्छिन्नं प्रत्यपरशक्तिनिरूपकार्थविषयकतात्पर्यज्ञानं प्रतिबन्धकम्' इति प्रतिबध्यप्रतिबन्धकभावेन हरिपद इव प्रकृतेऽपि एकस्मात्प्रत्ययादेकस्यै-

---

१. असम्भवापत्तेरिति । वस्तुतो धावनविशिष्टमृगस्य कर्मत्वे मृगपदात्र द्वितीयापत्तिस्तन्मात्रस्य कर्मत्वाऽवाचकत्वात् । २. ननु "अर्थैक्यादेकं वाक्यं साकाङ्क्षं चेद् विभागे स्यात्" इति जैमिनिसूत्रेण 'विभागे भेदे सत्यपि साकाङ्क्षं चेत्तर्हि एकार्थप्रतिपादकत्वादेकमेव वाक्यमित्यर्थकेन प्रकृते तमित्यध्याहारे कर्मस्याकाङ्क्षासत्त्वेन धावन्तविशिष्टमृगस्य बोधेन चैकवाक्यत्वं निर्वहत्येवेति चेत्तत्राह—उत्कटेति । ३. अनन्वयेति । धावनक्रियायाः कर्मतया दर्शनेऽन्वयो न स्यादित्यर्थः ।

४. ननु नश्यतीत्यादौ व्यापारानुभवाभावात्सकलधातूनां व्यापारार्थकत्वं दुर्घटमत आह-घटो नश्यतीति । ५. प्रतियोगित्वेति । प्रतियोगित्वविशिष्टा या नाशसामग्रीतस्याः समवधानं वर्तमानता । प्रतियोगित्ववैशिष्ट्यं सामग्र्यां सामानाधिकरण्यसम्बन्धेन । प्रकृते घटो नाशप्रतियोगी, प्रतियोगिता च स्वरूपसम्बन्धेन घटे, नाशसामग्री दण्डाद्यभिघातरूपाऽपि तत्रैव, अतो द्वयोः सामानाधिकरण्यं सम्पन्नम् । अत्र नाश-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सत्यां 'नश्यति,' तदत्यये 'नष्टः,' तद्भावत्व 'नङ्क्ष्यति' इति प्रयोगः। 'देवदत्तो जानाति, इच्छति' इत्यादौ च देवदत्ताभिन्नाश्रयको ज्ञानेच्छाद्यनुकूलो वर्त्तमानो व्यापार इति बोधः। स चान्ततः आश्रयतैवेति रीत्योह्यम् ॥ २ ॥

नन्वाख्यातस्य कर्तृकर्मशक्तत्वे 'पचति' इत्यत्रोभयबोधापत्तिः, *कर्तृमात्रबोधवत् कर्ममात्रस्याऽपि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह—

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।

व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयाऽन्वयम् ॥ ३ ॥

तङादयः फले आश्रयाऽन्वयं द्योतयन्ति। फलान्वय्याश्रयस्य कर्मत्वाद्, तद्द्योतकाः—कर्मद्योतकाः। व्यापारान्वय्याश्रयस्य कर्तृत्वात्, तद्द्योतकाः कर्तृद्योतका इति समुदायार्थः। द्योतयन्ति—तात्पर्यं ग्राहयन्ति ॥ ३ ॥

नन्वेवं 'क्रमादमुं नारद इत्यबोधि सः' इत्यादौ 'पच्यते ओदनः स्वयमेव' इत्यादौ च व्यभिचारः, कर्मणः कर्तृत्वविवक्षायां कर्त्तरि लकारे सति 'कर्मवत् कर्मणा तुल्यक्रियः' इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटामतिदेशाद्यगादिसत्त्वेऽपि कर्तुरेव बोधाद्, व्यापार एवाऽऽश्रयान्वयाच्च। 'अबोधि' इत्यत्रापि बुध्यतेः कर्त्तरि लुङ्, तस्य 'दीपजन' इति चिण्, 'चिणो लुक्' इति तस्य लुक् इति साधनात्, इत्याशङ्कायामाह—

²उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात्।

वार्थस्य बोधसम्भव इति नोक्तापत्तिरित्यरुचेराह—कर्तृमात्रेति। 'पचति' इत्यत्र कर्तृबोधवत् कर्मबोधस्यापि विनिगमनाविरहादापत्तिरिति भावः ॥ ३ ॥

स्मकफलस्याऽपि प्रतियोगित्वसम्बन्धेन घटे एव विद्यमानत्वेनाकर्मकत्वमितिध्येयम्। णश अदर्शने इत्यनुशासनाद् दर्शनं ज्ञानं तदविषयीभवनमपि नशेरर्थं इत्यपि न विस्मर्तव्यम्। १. स चान्तत इति। अन्ततो गत्वा आश्रयता एव, समवायेनात्मनि ज्ञानादीनां स्थितिरेव (भवनमेव) ॥ २ ॥

२. उत्सर्गोऽयमिति। अयं पूर्वोक्तस्तङ्यगादीनां कर्मद्योतकत्वनियमः, उत्सर्गः प्रायिको न तु सार्वत्रिक इति भावः ॥ ४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ॥ ४ ॥

कर्म्मकर्तृविषयादौ—'पच्यते ओदनः स्वयमेव' इत्यादौ। अत्र ह्येकौदनाभिन्नाश्रयकः पाकानुकूलो व्यापार इति बोधः। 'क्रमात्' इति आदिपदग्राह्यम्। अत्र सामान्यविशेषज्ञानपूर्वक एकनारदविषयकज्ञानानुकूलः कृष्णाभिन्नाश्रयकोऽतीतो व्यापार इति बोधः। यथोचितमिति। *सकर्म्मकधातुसमभिव्याहृतभावसाधारण*विधिविधेयचिण्यगादि कर्मद्योतकमिति भावः ॥ ४ ॥

एवं *सूचीकटाहन्यायेन[1] सोपपत्तिकं वाक्यार्थमुपवर्ण्य, 'फलव्यापारयोः' इति प्रतिज्ञातं धातोर्व्यापारवाचित्वं लडाद्यन्ते[2] भावनाया अवाच्यत्वं वदतः प्राभाकरादीन् प्रति व्यवस्थापयति—

सकर्मकधातुसमभिव्याहृतेति। तेन पच्यते तण्डुलः स्वयमेव' इत्यादौ "कर्मवत्कर्मणा तुल्यक्रियः" इत्यत्र शास्त्रातिदेशपक्षे 'भावकर्मणोः' इति शास्त्रेणैव तङो विधानात्तत्र भावसाधारणविधिविधेयत्वस्य यकि सत्त्वेऽपि सौकर्यातिशयद्योतनाय तण्डुलादिकर्मगताग्निसंयोगादिरूपव्यापारस्य फलजनकतया धात्वर्थत्वेन, तत्रत्यविक्लित्तिरूपफलस्यैव वा व्यापारत्वेन विवक्षायां कर्मण एव कर्तृत्वनिर्वृत्तेः पच्धातोः सकर्मकत्वाभावेन नातिप्रसङ्गः। भावसाधारणेति—भावकर्मोभयार्थकप्रत्ययनिमित्तका ये विधयः "सार्वधातुके यक्" "चिण् भावकर्मणोः" इत्यादयस्तैर्विधेयं यद् यक्चिणादि, तत् कर्मद्योतकमिति 'क्रमादमुं नारद इत्यबोधि सः' इत्यत्र कर्तरि लुङि "दीपजन" इति चिणो विधानात् तादृशचिणोऽभावेन न दोष इति बोध्यम् ॥ ४ ॥

सूचीकटाहेति। फलव्यापारयोर्धात्वर्थत्वे आश्रयस्य तिङर्थत्वे च ज्ञाते, वाक्यार्थे निरसनीयवादिविप्रतिपत्तीनामल्पतया धात्वर्थत्वे च निरसनीयवादिविप्रतिपत्तीनां बहुत्वेन प्रथमं वाक्यार्थे एव शिष्यजिज्ञासोदयात् स एवादौ वर्णितः। एतेन

---

१. सूचीकटाहन्यायेनेति—सूचीकटाहोभयापेक्षकयोर्युगपदेव लौहकारसमीपमुपस्थितयोर्मध्ये सूच्यपेक्षकस्याल्पकालायाससाध्यं सूचीनिर्माणात्मकं कार्यं लौहकारेण पूर्वं क्रियते, बहुकालायाससाध्यं कटाहनिर्माणं पश्चात्क्रियते इति लघुगुरुकार्ययोः सहोपस्थितयोर्लघु कार्यं पूर्वं सम्पाद्यमिति न्यायार्थः। प्रकृते तु न्यायसङ्घटनं सरलायां गुरुचरणैः कृतं तत्रैव द्रष्टव्यम्। २. लडाद्यन्ते इति—लडादिरन्तो यस्येत्यतद्गुणसंविज्ञानबहुव्रीहिणा धातुपरत्वमत्र, अन्तशब्दस्य परसमीपवाचकत्वात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यापारो भावना [1]सैवोत्पादना सैव च क्रिया ।
कृञोऽकर्म्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते ॥ ५ ॥

'पचति—पाकमुत्पादयति' 'पाकानुकूला भावना' 'तादृश्युत्पादना' इत्यादिविवरणाद्विव्रियमाणस्यापि तद्वाचकतेति भावः । व्यापारपद फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम् । अत एव 'पचति' इत्यत्राधः-सन्तापनत्व-फूत्कारत्व-चुल्ल्युपरिधारणत्व-यत्नत्वादिभिर्बोधः सर्वसिद्धः । नचैवमेषां शक्यतावच्छेदकत्वे गौरवा[2]पत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम्, '[3]रथो गच्छति' 'जानाति' इत्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति [4]नैयायिकरीतिः साध्वी, शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद् गुरुणि संभवात् । तयोर्वैषम्ये बीजाभावात् । न च 'पचति—पाकं करोति' इति यत्नार्थक-करोतिना विवरणाद्यत्नएवाऽऽख्यातार्थ इति वाच्यम्, 'रथो गमनं करोति' 'बीजादिना अङ्कुरः कृतः' इति दर्शनात् कृञो यत्नार्थ-कताया असिद्धेः ।

किञ्च भावनाया अवाच्यत्वे 'घटं भावयति' इत्यत्रेव 'घटो भवति' इत्यत्रापि द्वितीया स्यात् । न चात्र घटस्य कर्तृत्वेन तत्संज्ञया कर्म्म-संज्ञाया बाधान्न द्वितीयेति वाच्यम्, अनुगतकर्तृत्वस्य त्वन्मते दुर्व-

---

*फलव्यापारवाचकत्वप्रतिज्ञातस्योत्तरक्षण एवोपपत्तिभिस्तद्व्यवस्थापनं कर्तुमुचितं न तु वाक्यार्थनिरूपणानन्तरं. तेन जिज्ञासाविच्छेदादित्यपास्तम् ।

---

१. सैवेति—ननु सैवेत्यत्र तच्छब्देन व्यापारपरामर्शात् "सा" इति स्त्रीलिङ्गनिर्देशोऽसङ्गत इति चेन्न, उद्देश्यविधेययोरैक्यमापादयत्सर्वनाम तत्तल्लिङ्गभाग् भवतीति नियमेन विधेयभूतभावनागतस्त्रीत्वाऽनुरोधेन तत्सङ्गतेः । यद्वा—सोऽचि लोपे इत्यनेन सुलोपे सति स एवेत्येव पदच्छेदस्ततश्च व्यापारस्यैव तत्पदेन बोध इति तत्त्वम् ।

२. गौरवापत्त्येति—सकलकृतिसमवेतस्य कृतित्वस्य जातित्वं तदपेक्षया फूत्कारत्वादीनामुपाधिरूपत्वादनेकत्वाच्च गौरवमिति भावः । ३. ननु रथो गच्छतीत्यादौ रथाद्यचेतने कृतेर्बाधात् सर्वाऽनुभूतव्यापारप्रतीतिः कथं स्यादत आह रथो गच्छतीति । ४. नैयायिकरीतिरिति—यथा तिङर्थः कृतिरिति सिद्धान्ति-यताऽपि तार्किकेण रथो गच्छतीत्यादौ तिङो व्यापारे लक्षणां कृत्वैवायंप्रयोगः सम

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वेन घटस्याकर्तृत्वात् । कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात् । धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात् ।

अपि च भावनाया अवाच्यत्वे धातूनां सकर्म्मकत्वाकर्म्मकत्वविभाग उच्छिन्नः स्यात् । स्वार्थफलव्यधिकरणव्यापारवाचित्वं[1] स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनाया अवाच्यत्वमन्तरेणासंभवि । अन्यतमत्वं[2] तत्त्वमिति चेत् ? न, एकस्यैवार्थभेदेनाकर्म्मकत्वसकर्मकत्वदर्शनात् । तदेतदभिसन्धायाह—कृञ इति । अयं भावः । व्यापारावाच्यत्वपक्षे फलमात्रमर्थ इति फलितम् । तथा च 'करोति' इत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम् । तथा च 'यती प्रयत्ने' इतिवत् फलस्थानीययत्नवाचकत्वाविशेषादकर्मकतापत्तिरुक्तरीत्या दुर्वारेति । तथा च "न हि यत्नः" इत्यत्र फलस्थानीयत्वेनेति शेषः । 'कृञ' इति धातुमात्रोपलक्षणम् । सर्वेषामप्यकर्मकता सकर्मकता वा स्यादिति भावः* ।

इति भाव इति । इदमत्रावधेयम्—पचत्यादौ फूत्कारत्व-अधःसन्तापनत्व-चुल्ल्युपरिधारणत्वादितत्तद्विशेषरूपेण बोधे तेषां नानात्वात् शक्यतावच्छेदकनानात्वे शक्तिनानात्वस्य हर्यादिपदे सर्वसिद्धतया नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वरूपनानार्थत्वस्य प्रकृतेऽपि सत्त्वेनैकशक्तेर्वक्तुमशक्यत्वान्नानार्थत्वापत्तिस्तु न शङ्क्या, बुद्धिविशेषविषयतावच्छेदकत्वोपलक्षिततत्तद्धर्मावच्छिन्ने पचत्यादीनां शक्तेः स्वीकारेणोपलक्षकबुद्धिविशेषविषयतावच्छेदकत्वधर्मस्यैकस्यैवानुगमकतया अननुग-

---

म्यंते, तथैव पूर्वपक्षिणा धात्वर्थविचारे धातोः कृतौ शक्तिर्व्यापारादौ लक्षणेति स्वीकृत्योक्तप्रयोगाः समर्थयिष्यन्ते इत्येतावन्मात्रांशे दृष्टान्तदार्ष्टान्तिकतेति संक्षेपः ।

१. विनिगमनाविरहादाह—स्वार्थव्यापारेति । फले व्यापारव्यधिकरणत्वं व्यापारानधिकरणवृत्तित्वमेव । व्यापारतावच्छेदकसम्बन्धेन व्यापाराधिकरणता, तदधिकरणनिरूपितवृत्तित्वं च फलताऽवच्छेदकसम्बन्धेनेति तत्त्वम् । एवं च ग्रामं गच्छतीत्यादौ ग्रामस्य कालिकसम्बन्धेन व्यापाराधिकरणत्वेऽपि संयोगादिफलस्य तद्वृत्तित्वेऽपि न सकर्मकताहानिः । कालिकस्य व्यापारताऽवच्छेदकसम्बन्धत्वविरहात् । फलताऽवच्छेदकसम्बन्धेन तद्वृत्तित्वनिवेशान्नाकर्मकेष्व तिप्रसक्तिरिति सङ्क्षेपः ।

२. अन्यतमत्वमिति—गमिपचियजिप्रभृतीनां परिगणनं कृत्वा एतदन्यत-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ वा 'व्यापारो भावना' इत्यर्थेन व्यापारस्य वाच्यत्वं प्रसाध फलांशस्यापि तत् साधयन् नैयायिकाभ्युपगतं जानातिकरोत्यादेः केवल ज्ञान-यत्नादिक्रियामात्रवाचित्वं दूषयति—कृञ इति। अयं भावः ते फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्। तथा च स्वार्थफलव्य धिकरणव्यापारवाचित्वादिरूप*सकर्मकत्वोच्छेदापत्तिः। न च कृञा

तनानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वस्यैव नानार्थत्वमिति तच्छक्ति शक्तिनिरूपणे निर्णेष्यमाणत्वात्तस्यात्राभावात्। नापि क्षणनश्वरक्रमिकानेकव्यापारा युगपदवस्थानासम्भवेन "प्रशंसायाम्" इति सूत्रस्थ–'एका च क्रिया' इति भाष्या सङ्गतिः, समूहगतैकत्वमादाय तदुपपत्तेः। तदुक्तं वाक्यपदीये—

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।

बुद्धया प्रकल्पिताभेदः क्रियेति व्यपदिश्यते॥ इति।

न चैषां शक्यतावच्छेदकत्वे उक्तदोषाभावेऽपि अनेकेषां तत्त्वकल्पने गौरवे लाघवात्कृतित्वस्यैव तत्त्वं, कृतौ च धातोः शक्तिरस्तु; यत्र चाचेतने रथादौ कृति र्नास्ति, तत्र व्यापारे लक्षणा इति वाच्यम्, गङ्गायां घोष इत्यादौ गङ्गातीरत्वादिगुरु धर्मे लक्ष्यतावच्छेदकत्वस्वीकार इव गुरुधर्मे शक्यतावच्छेदकत्वस्वीकारे बाधकाभावात्।

भूप्रभृतेरपि पच्यादिधात्वर्थफलव्यधिकरणव्यापारवाचित्वादतिप्रसङ्गवारणाय फले स्वार्थत्वं निवेशितम्। फलव्यधिकरणत्वं च फलतावच्छेदकसम्बन्धेन फलाश्रयभिन्न वृत्तित्वं, तेन गम्यादेर्नासंग्रहः। गम्यादिधातुस्थले अनुयोगित्वादयः फलतावच्छेदक नियता एवेति कारकशेखरटिप्पण्यां गुरुचरणैर्निरूपितम्। तथा च अनुयोगित्वसम्ब न्धेन संयोगाश्रयो ग्राम इति, तद्भिन्नो देवदत्तस्तद्वृत्तिव्यापारवाचकत्वं गमधा तोरक्षतम्।

सकर्मकत्वोच्छेदापत्तिरिति। इदमुपलक्षणम्, त्यजिगम्योः पर्यायतापत्ति द्वयोरपि व्यापारवाचकत्वाविशेषात्। किं च पचादिषु सकर्मकत्वव्यवहारानुरोधे द्वितीयादिकर्मप्रत्ययानां फलांशे शक्तिकल्पनमावश्यकम्। तथा च प्रयागात् काशीं

मत्वं सकर्मकत्वमिति भावः। १. तत्साधयन्निति—धातुवाच्यत्वं साधयन्नित्यर्थः एतेन व्यापारो भावनेति कारिकया व्यापारस्य धातुवाच्यत्वसाधनेऽपि फलांशस्य तदसाधनेन न्यूनतेत्यपास्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सकर्मकत्वव्यवहारो भाक्तः इति नैयायिकोक्तं युक्तम् , व्यवहारस्य भाक्तत्वेऽपि कर्मणि लकारासम्भवात् । न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादिकार्यं कर्तुं शक्यम् । एवञ्च 'न हि यत्न' इत्यत्र यत्नमात्रमित्यर्थः ॥ ५ ॥

अत एवाह—

किन्तूत्पादनमेवातः कर्मवत् स्याद् यगाद्यपि ।
कर्मकर्तर्यन्यथा तु न भवेत् तद् दृशेरिव ॥ ६ ॥

उत्पादनम्—उत्पत्तिरूपफलसहितं यत्नादि कृञर्थ इत्यर्थः । फलस्य वाच्यत्वे युक्त्यन्तरमाह–अत इत्यादि । यतः कृञो यत्नमात्रमर्थो नेष्यते, अतः । कर्मवत्स्यादिति पदेन "कर्मवत्कर्मणा तुल्यक्रियः" इति सूत्रं

च्छति चैत्रं प्रयागं गच्छति, काशीं त्यजति चैत्रः' इति प्रयोगापत्तिः, एकस्यैव व्यापारस्य गम्यादिवाच्यस्य पूर्वापरदेशनिष्ठविभागसंयोगजनकत्वात् । तत्तत्फलविशेषाविषयबोधे तत्तद्धातुजन्योपस्थितेर्हेतुत्वकल्पनयोक्तप्रयोगापत्तिवारणं तु न युक्तम् , गौरवात् । त्यजिगम्योः पर्यायताभ्रमदशायां गच्छति ग्रामम्' 'त्यजति ग्रामम् इति वाक्याद्विलक्षणबोधोत्पत्त्या तथाविधहेतुहेतुमद्भावस्य व्यभिचाराच्च । तत्पुरुषीयतथाविधभ्रमशून्यकालिकतत्पुरुषीयतत्तत्फलान्वयबुद्धित्वस्य कार्यतावच्छेदकत्वं स्वीकृत्य व्यभिचारवारणे त्वतिगौरवम् । तथाविधभ्रमदशायामपि तादृगन्वयबोधो नाभ्युपेत इति तु न युक्तम्, अनुभवसिद्धस्यापलापानर्हत्वात् ।

न च तत्र फलविशेषावच्छिन्नव्यापारे लक्षणास्वीकारान्नोक्तापत्तिरिति वाच्यम्, अनेककर्मप्रत्ययानां तत्तत्फलविशेषे शक्तिकल्पनां, कर्मप्रत्ययासमभिव्याहृतगम्यादेस्तत्तत्फलावच्छिन्ने लक्षणाकल्पनां चापेक्ष्य गम्यादेरेव विशिष्टवाचकत्वस्योचितत्वादिति दिक् ॥ ५ ॥

१. भाक्त इति—भज्यते सेव्यतेऽन्वयाऽनुपपत्तौ या सा भक्तिर्लक्षणा, तत आगतो भाक्त इति । लाक्षणिक इत्यर्थः । २. यत्नमात्रमिति–मात्रपदेनोत्पत्तिरूपफलांशव्यवच्छेदः । एवं चोत्पत्तिरूपफलसहितयत्नार्थक एव कृञ्धातुर्न तु केवलयत्नार्थक इति तत्त्वम् ॥ ५ ॥

३. अत एवेति—पूर्वोक्तदोषनिरासाय पूर्वकारिकया फलव्यापारोभयांशस्य धातुवाच्यत्वस्य साधनादेव । ४. मूले किन्त्विति—अकर्मकतापत्तेः कृञो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्यते । अयमर्थः—यत एवास्योत्पादनार्थकता, अतः 'पच्यते ओद स्वयमेव' इति वत् 'क्रियते घटः स्वयमेव' इति यगादयोऽप्युपपद्यन्ते अन्यथा यत्नस्य कर्मनिष्ठत्वाभावात्तन्न स्यात्, दृशिवत् । यथा 'दृश्य घटः स्वयमेव' इति न, दर्शनस्य *घटावृत्तित्वात्, तथा यत्नस्या इति तथा प्रयोगानापत्तेरिति ॥ ६ ॥

नन्वेवं कृञादेरिव 'जानाति' इत्यादेरपि विषयावच्छिन्नावरण ज्ञादिफलवाचित्वमावश्यकम् । अन्यथा सकर्मकतानापत्तेः । तथा 'ज्ञायते घटः स्वयमेव' इति किं न स्यात् । एवं 'ग्रामो गम्यते स्वयमे इत्याद्यपि, इत्याशङ्कां मनसिकृत्याह—

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते ।
न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः ॥ ७ ॥

ईप्सितं कर्म त्रिविधम्—निर्वर्त्यं, विकार्यं, प्राप्यञ्च । तत्राद्ये कर्मवद्भावो, नान्त्ये । प्राप्यत्वञ्च क्रियाकृतविशेषानुपलभ्यमानत्वमि सुबर्थनिर्णये वक्ष्यते* । न हि–अयं घटः केन चिद् दृष्टो, ग्रामोऽयं के चिद्गत इति शक्यं कर्मदर्शनेनावगन्तुम् । 'घटं करोति' इति निर्वर्त्ये 'सोमं सुनोति' इति विकार्ये च तज्ज्ञातुं शक्यमिति न तत्प्राप्यम् । त च घटादेर्दृश्यादौ प्राप्यकर्मत्वान्नोक्तातिप्रसङ्ग इति भावः । धातूनां फल

घटावृत्तित्वादिति । घटमात्रवृत्तित्वाभावेन कर्मस्थक्रियकत्वाभावा त्यर्थः । ज्ञानस्य समवायेन विषयतया च कर्तृकर्मोभयनिष्ठतया कर्तृस्थभावकत्वे "कर्मवत्कर्मणा" इति सूत्रे 'कर्मणा' इत्युपादानात् कर्मस्थक्रियकाणां कर्म स्थभाव नामेव धातूनां ग्रहणेन तस्यात्राप्रवृत्तेरिति यावत् ॥ ६ ॥

वक्ष्यते इति ।

क्रियाकृतविशेषाणां सिद्धिर्यत्र न दृश्यते ।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते ॥

यत्नोऽर्थो नेष्यते, किन्तु उत्पादनम् (उत्पत्तिरूपफलसहितयत्नादिकम्) एव इष्यते इति पूर्वकारिकया योजना कार्या ॥ ६ ॥

१. क्रियाकृतविशेषेति—क्रियाकृतो विशेषो वैलक्षण्यं तेनाऽनुपलभ्यमाने

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वाचकत्वे त्यजिगम्योः पर्यायतापत्तिः, क्रियावाचकत्वाविशेषात्। फल-[1] स्योपलक्षणत्वेऽप्येकक्रियाया एव पूर्वदेशविभागोत्तरदेशसंयोगजनकत्वा-द्युक्तदोषतादवस्थ्यमित्यपि वदन्ति। तस्मादावश्यकं सकर्मकाणां फलवा-चकत्वम्। अकर्मकाणान्तु तन्निर्विवादमेव*। "भू सत्तायाम्" इत्याद्य-नुशासनाच्च। अत एव 'द्व्यर्थः पचिः' इति भाष्यं संगच्छते इति दिक्॥ ७॥

एवं सिध्यतु फलव्यापारयोर्वाच्यत्वम्। किन्तु आख्यातवाच्यैव सा भावना, न धातोः, प्राधान्येन प्रतीयमानव्यापारस्य धात्वर्थताया: "प्रकृ-तिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्" इति न्यायविरुद्धत्वात्। 'तदागमे हि दृश्यते' *इति न्यायविरुद्धत्वाच्च।

इत्यादिनेति शेषः। निर्विवादमेवेति। 'भवति'इत्यादितः सत्तादिबोधस्य सर्वमतसिद्धत्वादित्यर्थः। 'पचति' इत्यादित एव फलबोधे विवादः, तत्र फलबोधो द्वितीयादित एवेति पराभ्युपगतत्वात्॥ ७॥

इति न्यायेति। "शब्दवत्तूपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथा-ऽन्येषाम्" (अ० ४ पा० १ सू० १५ जै०) इति सूत्रम्। "पशुना यजेत" इत्यत्र पशुनेत्येकवचनोपात्तैकत्वस्य करणत्वेन न क्रियायामन्वयः, तस्या 'यजेत' इति पदा-न्तरोपात्तत्वात्। किन्तु समानपदोपात्तत्वेन श्रुत्या पश्वर्थे, "प्रत्ययानां प्रकृत्यर्थान्वि-तस्वार्थबोधकत्वम्" इति व्युत्पत्तेश्च, इति यागाङ्गत्वाभावेन तदविवक्षितमेव स्यादिति पूर्वपक्षे इदमुत्तरसूत्रम्। तदर्थस्तु शब्दवत्—शब्दवाच्यं यथा भवति तथा उपल-भ्यते। एकत्वं हि—यतः तदागमे—एकवचनश्रवणे दृश्यते, अतस्तस्याङ्गत्वज्ञानं यथा-न्येषां पशुत्वलौहित्यादीनामिति। तथा च विशिष्टस्य श्रुत्याऽङ्गत्वबोधनेन पशुत्वव-च्छब्दबोध्यस्यास्य विशेषणस्याङ्गत्वोपपत्तिरिति भावः' एवं च तत्र यथा एकवचना-गमे एकत्वं दृश्यते अतस्तदर्थत्वम्। एवं 'पचति'इत्यादावाख्यातश्रवणे सत्येव व्यापारबोधात् तस्य तदर्थत्वमङ्गीकरणीयम्। अन्यथोक्तन्यायविरोधापत्तेरित्यर्थः।

प्राप्यमाणः क्रियाकृतवैलक्षण्यरहित इति यावत्। तस्य भावस्तत्त्वम्। 1. फल-स्योपलक्षणत्वेऽपीति—फलांशे धातोः शक्त्यभावेऽपि विभागोपलक्षिते व्यापारे त्यजेः, संयोगोपलक्षिते व्यापारे गमेः शक्तिरिति रीत्या विभागादेरुपलक्षणत्वस्वीकारेण उपलक्षणत्वस्य च अशक्यत्वे सति शक्यव्यावर्तकत्वान्न पर्यायतापत्तिरिति भावः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवञ्च "*स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्, आख्यातार्थव्यापाराश्रयत्वञ्च कर्तृत्वं वाच्यम्" इत्यादि वदन्तं मीमांसकंमन्यं प्रत्याह—

तस्मात्करोतिर्धातोः स्याद्व्याख्यानं, न त्वसौ तिङाम् ।
पक्ववान्, कृतवान् पाकं, किं कृतं पक्वमित्यपि ॥ ८ ॥

तस्मात्—अभिप्रायस्थहेतोः। स चेत्थम्। फलमात्रस्य धात्वर्थत्वे 'ग्रामो गमनवान्' इति प्रतीत्यापत्तिः, संयोगाऽऽश्रयत्वात्। फलानुत्पाददशायां व्यापारसत्त्वे 'पाको भवति' इत्यनापत्तिः, व्यापारविगमे फलसत्त्वे 'पाको विद्यते' इत्यापत्तिश्च। यत्तु भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति, तन्न, कर्त्राख्यातवत् "कर्तरि कृत्" इत्यत एव तद्विधानलाभे* भावे विधायकानुशासनवैयर्थ्यापत्तेः, तद्विरोधापत्तेश्च।

अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयमिति चेत्? तर्हि धातुत एव सकलव्यापारलाभसम्भवेनाऽऽख्यातस्य पृथक्शक्तिकल्पने गौरवमिति। 'पचति' इत्यस्य 'पाकं करोति' इति विवरणात्मा करोतिः धातोरेव व्याख्यानं—विवरणम्। अतस्तदपि नाख्यातार्थत्वसाधकमिति भावः।

मीमांसकोक्तं बाधकमुद्धरन् तन्मतं दूषयति—न त्वित्यादिना। नासौ

---

*'भवत्यादेः पच्याद्युत्तराख्यातार्थव्यापारव्यधिकरणफलवाचकत्वात् सकर्मकत्वापत्तिवारणाय स्वयुक्तेति।

*तद्विधानलाभे इति। "लः कर्मणि" इति सूत्रेऽनुवृत्त 'कर्तरि' इत्यस्य भावप्रधाननिर्देशमभ्युपगम्य तत्सूत्रेण व्यापारे लकारविधानवत् घञादीनामपि "कर्तरि कृत्" इति सूत्राद् व्यापारार्थत्वं सिध्यतीत्यर्थः।

---

१ स्वयुक्ताख्यातार्थेति—अत्र स्वपदेन धातुस्तद्युक्तत्वमव्यवहितोत्तरत्वसम्बन्धेन ग्राह्यम्, तेन 'देवदत्तः पचति, भवति घट इत्यत्र पच्युत्तरतिपो भूधातुयुक्तत्वमादाय तस्यातिप्रसङ्गो नेति सङ्क्षेपः।

२. तद्विरोधापत्तेश्चेति—अत्र चकारो हेत्वर्थकः। यतोऽनुशासनवैयर्थ्यमतस्तद्विरोधापत्तिरिति भावः।

३. बाधकमिति—तिङ्वाच्या भावना, भावनामुख्यविशेष्यकश्च शाब्दबोधस्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तिङां व्याख्यानम्, पक्ववान्' इत्यादावनन्वयापत्तेः। अयं भावः—'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्य प्राधान्यम्' इत्यत्र हि 'विशेष्यतया प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुः' इति कार्यकारणभावः फलितः तथा च 'पक्ववान्' इत्यत्र पाकः कर्म्मकारकं, क्तवतुप्रत्ययार्थः कर्तृकारकम्। तयोश्चारुणाधिकरणरीत्या वक्ष्यमाणास्मद्रीत्या चान्वयासम्भव इति प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाभावे क्व प्राधान्यबोधक उक्तकार्यकारणभावः। न च—

संबन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते॥

इति भट्टपादोक्तरीत्या संबन्धसामान्येन कारकाणामन्वयः शङ्क्यः, योग्यताविरहात्। अन्वयप्रयोजकरूपवत्त्वस्य तत्त्वात्। क्रियान्वयित्वमेव

अरुणाधिकरणरीत्येति। तत्र 'खलेकपोत'न्यायेन सर्वेषां कारकाणां क्रियायामेवान्वयस्योक्तत्वेन तया रीत्या प्रकृतेऽपि द्वयोः कारकयोस्तत्रैवान्वये परस्परमन्वयासम्भव इति भावः।

वक्ष्यमाणेति। कारकत्वस्य क्रियाजनकत्वरूपत्वेन क्रियाजनकमिति ज्ञाते 'का सा क्रिया' इत्याकाङ्क्षोदयेन, क्रियाया अपि साध्यरूपायाः साधनाकाङ्क्षया परस्परान्वयौचित्यमिति क्रियात्वमेव कारकान्वयितावच्छेदकमिति सवर्थनिर्णये वक्ष्यमाणया रीत्येत्यर्थः।

सम्बन्धमात्रमिति। "ज्योतिष्टोमेन यजेत" इत्यत्र 'यजेत' इति श्रुत्या धात्वाख्यातार्थयागभावनयोः सम्बन्धसामान्यं प्रतिपाद्यते। तयोः क्रियाकारकभावरूपसम्बन्धविशेषबोधने तु नास्याः श्रुतेः कश्चिदभिधादिरूपो व्यापारः, तद्वाचकपदाभावादिति तदर्थः। तथा च 'यजेत' इत्यत्र यागसम्बन्धिभावनेति बोधो, न यागकरणकभावनेति; तद्वत् प्रकृते पाकसम्बन्धी कर्तेति बोध इति तयोरन्वयः सुशक इति भावः।

ऽन्तस्थले। पचतीत्यस्य पाकं करोतीति विवरणमपि भावनाया आख्यातार्थत्वसाधकमेव, न तु धात्वर्थत्वस्य, तथा सति भावनायाः प्राधान्ये प्रकृतिप्रत्ययौ सहार्थमितिन्यायविरोधापत्तिः स्यादिति वदतो मीमांसकस्य मते उक्तन्यायविरोधरूपं बाधकमिति तत्त्वम्।

१. तदेकांशेति—तस्य सम्बन्धसामान्यस्यैकोंऽशः सम्बन्धविशेषः क्रिया-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हि कारकान्वयितावच्छेदकमिति वक्ष्यते । तदेतदाविष्कर्तुं विवरणेन धात्वर्थकवत्वर्थयोः कर्मत्वकर्तृत्वे दर्शयति—कृतवान् पाकमिति ।

वस्तुतः "प्रत्ययार्थः प्रधानम्" इत्यस्य यः प्रधानं स प्रत्ययार्थ एवेति वा, यः प्रत्ययार्थः स प्रधानमेवेति वा नार्थः । 'अजा' 'अश्वा' 'छागी' इत्यत्र स्त्रीप्रत्ययार्थे स्त्रीत्वस्यैव प्राधान्यापत्तेः, *छाग्यादेरनापत्तेश्च । किन्तूत्सर्गोऽयम् । विशेष्यत्वादिना बोधस्तु तथा व्युत्पत्त्यनुरोधात् । अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः । लक्षणायामालंकारिकाणां *शक्यतावच्छेदकप्रकारक एव बोधो, न नैयायिकादीनाम् । घटः कर्मत्वमानयनं कृतिरित्यादौ विपर्ययेणाऽपि व्युत्पन्नानां नैयायिकनव्यादीनां बोधो, न तद्व्युत्पत्तिरहितानाम् । अन्येषां तन्निराकाङ्क्षमेवेत्यादिकं संगच्छते । अत एव "प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्" इत्याह भगवान् पाणिनिः । प्रधानं प्रत्ययार्थ इति वचनं 'न' इत्यनुवर्त्य न कार्य्यम्, अर्थस्य-अर्थावबोधस्यान्यप्रमाणत्वाद्—व्युत्पत्त्यनुसारित्वादिति हि तदर्थः । एवं सत्यपि नियामकापेक्षणे च "भावप्रधानमाख्यातम्" इति वचनमेव गृह्यतामिति सुधीभिरूह्यम् ।

"तदागमे हि" इति न्यायो विवरणख्यातिव्याप्तमित्याह—किं कृतं पक्वमिति । कृत्वा विवरणं, प्रतीतिश्च पक्वमित्यत्रापि, इति तत्रापि भावना वाच्या स्यादिति भावः । नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत

---

*छाग्यादेरिति । प्रकृत्यर्थेऽनुभूयमानस्य प्राधान्यस्यानुपपत्तेरिति भावः

*शक्यतावच्छेदकप्रकारक एवेति । गङ्गात्वप्रकारकतीरविशेष्यकबोधादेव विलक्षणशैत्यपावनत्वादिप्रतीतिः, अन्यथा 'गङ्गायां घोषः' इत्यस्य 'गङ्गातीरे घोषः' इत्यतो विशिष्टता न स्यात् । नैयायिकास्तु लक्षणायां लक्ष्यतावच्छेदकतीरत्वप्रकारक

कारकभावादिरूपस्तस्य निवेशे (बोधने) तु अस्याः श्रुतेर्व्यापारः सामर्थ्यं न विद्यते इति निगूढार्थः

१. व्युत्पत्त्यनुरोधादिति—व्युत्पत्तिः शास्त्रप्रयोज्यसंस्कारविशेषः, तथा च तादृशबोधोत्पत्तौ व्युत्पत्तिरेव नियामिकेति न भावनाया धात्वर्थत्वेऽपि प्रधानत्वाऽनुपपत्तिरिति हृदयम् ।

२. अत एवेति—बोधस्य व्युत्पत्त्यनुसारित्वादेवेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आह—अपीति। तथा चोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो धातुरेव वाचक इति भावः। अन्यरीत्या प्रत्ययार्थत्वात् प्राधान्यापत्तिश्चेति द्रष्टव्यम् ॥ ८ ॥

व्यापारस्य धात्वर्थत्वे साधकान्तरमाह—

किं कार्य्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि।

किञ्च क्रियावाचकतां विना धातुत्वमेव न ॥ ९ ॥

'कार्य्यम्' इत्यत्र "ऋहलोर्ण्यत्" इति कर्मणि ण्यत्। 'पचनीयम्' इत्यादौ चानीयर्। आदिना 'ज्योतिष्टोमयाजी' इत्यादौ करणे उपपदे कर्तरि णिनिः। एते च क्रियायोगमन्तरेणासन्तस्तद्वाच्यतां बोधयन्ति, विना क्रियां कारकत्वासम्भवेन तद्वाचकप्रत्ययस्याप्यसम्भवात्। न च ॐगम्यमानक्रियामादाय कारकयोग इति भाट्टरीतिर्युक्ता, आख्यातेऽपि तथात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्ध्यापत्तेः। अथ लिङ्गसंख्यान्वयानुरोधात् कर्तुर्वाच्यत्वमावश्यकमिति तेनाक्षेपाद्भावनान्वयः स्यादिति मतम्? तर्हि संख्यान्वयोपपत्तये आख्यातेऽपि कर्ता वाच्यः स्यात्। 'पक्वान्' इत्यादौ कालकारकान्वयानुरोधाद्भावनाया अपि वाच्यत्वस्यावश्यकत्वाच्चेति भावः।

एव बोधः, शैत्यपावनत्वप्रतीतिस्तु गङ्गापदेन स्ववृत्त्या प्रतिपादनादेव भवतीत्याहुः॥८॥

गम्यमानेति। 'पाचकः' इत्यादौ तन्मये धातोः फलमात्रार्थकतया भावनाया आक्षेपेण कर्तरि प्रत्ययस्य यथा साधुत्वमुच्यते तैः, तथैव कर्मणि ण्यदादीनामुपपत्ति स्यादिति भावः।

---

१. उभयसाधारण्येनेति—पचति = पाकं करोति; पक्ववान् = पाकं कृतवान् इत्यादिविवरणैस्तिङ्कृतोरुभयोः स्थलयोर्भावनाया अवश्यप्रतीतौ उभयप्रकृतिभूतधातुरेव वाचको लाघवात्तिङ्कृतोस्तु वाचकत्वे नानाशक्ततावच्छेदकत्वादिगौरवमितिभावः ॥ ८ ॥

२. ननु किं कार्यं पचनीयं चेत्यनयोः प्रश्नोत्तररूपविवरणेनैव व्यापारस्य धातुवाच्यत्वसाधने पूर्वकारिकातो वैलक्षण्यं न स्यात्तत्राऽपि किं कृतं पक्वमित्यनेन तेनैव रूपेण तत्साधनादतो मूलकर्तुर्भावं प्रकारान्तरेण दर्शयति—कार्यमित्यत्रेति। एवं च किंशब्दोल्लेखः प्रश्नोत्तररूपविवरणस्य प्रक्रान्तत्वाद् बोध्यः। यद्वा किमित्यस्याग्रे पचनीयं चेत्यत्रत्यं चकारं पठित्वा किञ्च हि (यस्मात्) कार्यं पचनीयमित्यादि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अपिना हेत्वन्तरसमुच्चयः। तथा हि—'नखैर्भिन्नो नखभिन्नः' 'हरिणा त्रातो हरित्रातः' इत्यादौ "कर्तृकरणे कृता बहुलम्" इति समासो न स्यात्, 'पुरुषो राज्ञो, 'भार्य्या देवदत्तस्य' इतिवदसामर्थ्यात्। न चाध्याहृतक्रियाद्वारा सामर्थ्यं वाच्यम् 'दध्योदनः' 'गुडधाना' इत्यादिवत्, अन्यथाऽत्रापि "अन्नेन व्यञ्जनम्" "भक्ष्येण मिश्रीकरणम्" इति समासो न स्यादिति वाच्यम्, तत्र विध्यानर्थक्यादगत्या तथा स्वीकारेऽपि 'हरिकृतम्' इत्यादौ *साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य "कर्तृकरणे" इत्यस्य आक्षेपेण परम्परासंबन्धे प्रवृत्त्ययोगात्।

न चैकस्यां क्रियायामन्वयित्वमेव सामर्थ्यमिति शङ्क्यम्, 'असूर्यम्पश्या' इत्यादेरसमर्थसमासत्वानापत्तेः। इष्टापत्तौ 'कृतः सर्वो मृत्तिकया इत्यत्र 'कृतसर्वमृत्तिकः' इत्यापत्तेः। न चात्र समासविधायकाभावः "सह सुपा" इत्यस्य सत्त्वात्। अन्यथाऽसमर्थसमासोऽपि विधायकाभावान्न स्यादिति।

किं च भावनायास्तिङर्थत्वे 'भावयति घटम्' इतिवद् 'भवति घटम्' इत्यपि स्यात्, धात्वर्थफलाश्रयत्वरूपकर्मत्वसत्त्वात्। न चाख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात्तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्, आख्यातार्थव्यापाराश्रयत्वस्य कर्तृत्वे 'पाचयति देवदत्तो विष्णुमित्रेण' इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ*तृतीयानापत्तेः 'ग्रामं गमयति

साक्षाद्धात्वर्थान्वयेनेति। तन्मते कृधातोः कृतिरूपभावनार्थकत्वादिति भावः। अकर्तृतापत्ताविति। सर्वस्यैव यत्किञ्चिदाख्यातार्थव्यापाराश्रयत्वात् स्वसमभिव्याहृतेत्यावश्यकम्। प्रकृते च प्रयोज्यव्यापारो नाख्यातस्यार्थो भवितुमर्हति, किं तु णिजर्थव्यापार एव तेनानूद्यते। अत एव प्रयोजकस्य कर्तृत्वनिर्वाहः। अत एवाख्यातार्थव्यापारान्वयिन्येव तदर्थसंख्यान्वयनियमाद् 'गुरुः शिष्याभ्यां पाचयति' इत्यत्र गुरुपदात्प्रथमोत्पत्तिः 'पाचयति' इत्येकवचनोपपत्तिश्च। एवं चाख्यातार्थव्यापारानाश्रयत्वात् प्रयोज्यस्य कर्तृत्वानापत्तौ ततस्तृतीयानुपपत्तिरिति भावः। करण-

---

कृत्स्वपि इष्टमिति योजना। व्यापारस्य धातुवाच्यत्वे साधकान्तरसमुच्चयार्थकत्वेन तत्सार्थक्यात्। अग्निमकिञ्चेतिवत्।

१. ननु विष्णुमित्रस्याऽकर्तृत्वेऽपि कारकाणां वैवक्षिकतया करणत्वविवक्षयैव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

देवदत्तो विष्णुमित्रम्' इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ ग्रामस्य गमिककर्मतानापत्तेश्च* । तथा च 'ग्रामाय गमयति देवदत्तो विष्णुमित्रम्' इत्यपि न स्यात्, "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" इति गत्यर्थकर्मण्येव चतुर्थीविधानात् । एतेन णिजन्ते आख्यातार्थं उभयं, तदाश्रयत्वाद्देवदत्तयज्ञदत्तयोः कर्तृतेत्यपास्तम्* ।

किं च तस्मिन्प्रयोगे य आख्यातार्थं इत्यस्यावश्यकत्वेनाख्यातशून्ये 'देवदत्तः पक्ता' इत्यादौ देवदत्तस्याकर्तृतापत्तेरिति दिक् ।

सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति–किं चेति । धातुसंज्ञाविधायकं "भूवादयो धातवः" इति सूत्रं, तत्र भूश्च वाश्चेति द्वन्द्वः, आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः–आदिश्च आदिश्च आदी, ततो भूवौ आदी येषान्ते भूवादय इति बहुव्रीहिः । तथा च भूप्रभृतयो वासदृशा*धातव इत्यर्थः । वच

तृतीयैवेयमिति तु न शंक्यम्, कर्तुः प्रयोजकस्यैव हेतुतया देवदत्तस्य हेतुतानापत्तौ णिजुत्पत्त्यसम्भवापत्तेः ।

गमिकर्मतानापत्तेश्चेति । कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयस्यैव कर्मतया विष्णुमित्रनिष्ठव्यापारप्रयोज्यसंयोगाश्रयत्वेऽपि तस्याकर्तृत्वात् कर्मसंज्ञा न स्यात् । अत एव 'माषेष्वश्वं बध्नाति इत्यत्राश्ववृत्तिव्यापारप्रयोज्यगलबिलाधःसंयोगाश्रयत्वप्रकारकेच्छाविशेष्यस्य माषस्य न कर्मत्वम्, अश्वस्य कर्तृत्वाभावादित्यन्यत्र विस्तरः ।

अपास्तमिति । उक्ताख्यातस्य णिजन्तधातुयुक्तत्वेऽपि गत्यर्थकधातुयुक्तत्वाभावेन प्रयोज्यस्य स्वयुक्ताख्यातार्थव्यापाराश्रयत्वरूपगत्यर्थकर्तृत्वाभावात् गत्यर्थकधातुकर्मत्वानापत्तौ चतुर्थ्यनापत्तेस्तादवस्थ्यादिति भावः ।

वासदृशा इति । भूशब्दस्य निरूपत्वसम्बन्धेन व्यवस्थावाचकादिशब्देऽन्वयो वाशब्दस्य च प्रतियोगित्वसम्बन्धेन प्रकारवाचकादिशब्देऽन्वयः, आदिशब्दयोश्च परस्परमभेदेनेति भूनिष्ठावयवतानिरूपकाभिन्ना वाप्रतियोगिकसादृश्यविशिष्टा धातुसंज्ञका इत्यर्थ इति भावः । ननु भूवाशब्दयोर्भिन्नसम्बन्धेनान्यत्रान्यत्रान्वये

तृतीया सेत्स्यतीत्यतोऽरुचेराह—ग्रामं गमयतीति । १. एतेनेति—उक्तरीत्या ग्रामायेति प्रयोगाऽनिर्वाहेणेत्यर्थः । २ उभयमिति—प्रयोज्यव्यापारः प्रयोजकव्यापारश्चेत्युभयम् ॥ १ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रियावाचकत्वेन*। तथा च क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वं पर्यवसन्नम्। अत्र हि क्रियावाचित्वमात्रोक्तौ वर्जनादिरूपक्रियावाचके 'हिरुक्' 'नाना' इत्यादावतिव्याप्तिरिति भ्वादिगणपठितत्वमुक्तम्॥

तावन्मात्रोक्तौ चाह—

सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः।

न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम्॥ १०॥

गणपठितत्वमात्रोक्तौ सर्वनामा यो 'या' तस्यापि धातुत्वं स्यात्। तथा च 'याः पश्यसि' इत्यादौ "आतो धातोः" इत्यालोपापत्तिः। ननु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणं, तस्य लाक्षणिकत्वात्[1], इत्यत आह—वेत्यादि। अव्यये 'वा' इत्यादावतिप्रसङ्गस्तादृशस्यैव गणेऽपि पाठेन निर्णयासंभवात्। तथा च विकल्पार्थको 'वाति' इति*प्रयोगः स्यादिति भावः। न च गतिगन्धनाद्यर्थनिर्देशो

सहविवक्षाऽभावेन द्वन्द्वानुपपत्तिः, "सकृदुच्चरितः शब्दः सकृदर्थं गमयति" इति नियमात्सकृदुच्चरितादिशब्देनैकस्यैवोपस्थितिर्नियमादर्थद्वयोपस्थित्यनुपपत्तिः "एकपदोपस्थाप्यार्थद्वयस्य परस्परमभेदसम्बन्धेनान्वयोऽव्युत्पन्नः" इति व्युत्पत्तेरभेदान्वयानुपपत्तिश्चेति चेत्। न, भूवादयश्च भूवादयश्च भूवादय इति तन्त्रावृत्त्यन्यतरनिर्देशस्वीकारेणादोषात्।

क्रियावाचकत्वेनेति। भूसाहचर्याद् वाशब्दोऽनव्ययमेव गृह्यते। अनव्ययवाशब्दश्च गतिगन्धनार्थकोऽसत्त्ववाची, तत्साहचर्याद्भूशब्दोऽप्यसत्त्ववाच्येव गृह्यते इति परस्परसाहचर्यात्तादृशः क्रियावाच्येव सम्भवतीति भावः। क्रियावाचकत्वं च "भूवादयो धातवः" इति सूत्रे शेखरटिप्पण्यां गुरुचरणैः स्पष्टीकृतं, तत एवावगन्तव्यम्॥ ९॥

वातीति प्रयोग इति। कालकारकाद्यन्वयासम्भवेन तत्र तिबादीनां कथञ्चिद्वारणे तु वाशब्दस्य धातुत्वे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रे

---

१. लाक्षणिकत्वादिति—ननु "नकारजावनुस्वारपञ्चमौ झलि धातुषु, सकारजः शकारश्चेष्टिवर्गस्तवर्गजः" इत्यभियुक्तोक्त्या अञ्च तञ्च प्रभृतीनामपि लाक्षणिकत्वानुसङ्ग्रहापत्तिरिति चेन्न, श्चुत्वादीनां त्रिपादीस्थत्वेन सञ्ज्ञादृष्ट्याऽसिद्धत्वात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नियामकः, तस्यार्थानादेशनात्*दितिभाष्यपर्यालोचनयाऽऽधुनिकत्वलाभात् ॥ १० ॥

नन्वस्तु क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं, क्रिया च धात्वर्थ एव, न व्यापार इति शङ्कां समाधत्ते—

धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थता ।

अन्योन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाक्रमम् ॥ ११ ॥

यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्रहः, क्रियात्वग्रहे तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति ग्रहपदं[1] पूरयित्वा व्याख्येयम् । यथाश्रुते चान्योन्याश्रयस्योत्पत्तौ ग्रहे वा प्रतिबन्धकत्वाभ्युगपमेनासङ्गत्यापत्तेः* । न चान्यतमत्वं धातुत्वम्, "भूवादयः" इत्यस्य वैयर्थ्यापत्तेरित्यभिप्रेत्याह—अस्त्विति । व्यापारसन्तानः[2] क्रिया, तद्वाचकत्वे सति गणपठितत्वमित्यर्थः । ननु सत्तादीन्फलांशानन्यतमत्वेनादाय तद्वाचकत्वे सति गणपठितत्वं लक्षणमुच्यताम् । धात्वर्थत्वात्तेषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यते इति चेत् ? न, अन्यतमसध्ये विकल्पस्यापि 'विकल्पयति' इति प्रयोगानुसारात्प्रवेशावश्यकत्वेन तदर्थके 'वा' इत्यव्यये उक्तरीत्या गणपठितत्वसत्त्वेनातिव्याप्तेरिति ॥ १ ॥

'अधातुः' इति पर्युदासेन प्रातिपदिकत्वाभावेन ततः सुबनुत्पत्त्या पदत्वानापत्तौ 'वा गच्छति' इत्यत्र "तिङ्ङतिङः" इति निघातानापत्तिर्बोध्या ।

अर्थानादेशनादिति अर्थस्य सत्तादेः अनादेशनात् आनाम्नानादित्यर्थः । सर्वत्र पाणिनिनाऽर्थनिर्देशो न कृत इति यावत् । तेन "चुटू" इत्यादिसूत्रस्थभाष्येण न विरोधः ॥ १० ॥

असंगत्यापत्तेरिति । पृथिवीजलयोराधाराधेयभावस्य परस्परं सर्वैरभ्युपग-

---

१ ग्रहपदमिति—मूलकारिकायां ज्ञानार्थकग्रहपदमध्याहृत्य धातुत्वग्रहे इत्यादि भूषणोक्तरीत्या व्याख्येयमन्यथाऽन्याऽन्याश्रयदोषदानमसङ्गतमेव स्यात्तद्दोषस्य ज्ञाने उत्पत्तौ वा प्रतिबन्धकतयाऽत्र तदप्रसक्तेः । ग्रहपदे पूरिते तु हलन्त्यमित्यादिवज्ज्ञाने एवान्योऽन्याश्रयतेति तत्त्वम् । २. अन्योऽन्याश्रयदोषं परिहरति—व्यापारसन्तान इति ॥ ११ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नन्वस्त्यैव धातुत्वे 'अस्ति' इत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तद्वाचकानामधातुत्वप्रसङ्ग इत्यत आह—

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना ।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥ १२ ॥

अस्त्यादौ 'अस् भुवि' इत्यादौ । धर्म्यंशे—धर्मिभागे । भाव्ये—भाव्यत्वेन विवक्षिते । अस्त्येव—प्रतीयत एव । अयमर्थः—'स ततो गतो न वा' इति प्रश्ने महता यत्नेन 'तिष्ठति' इति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव, उत्पत्त्यादिबोधने तु सुतराम्,

रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवत् ।

इत्यादिदर्शनात् । किं चात्र भावनाविरहे लडादिव्यवस्था न स्यात्, तस्या एव वर्तमानत्वादिविवक्षायां तद्विधानात् ।

क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका ।

इति वाक्यपदीयादिति । नन्वेवम् 'अस्ति' इत्यत्र स्पष्टं कुतो न बुध्यत इत्याह–अन्यत्रेति । *अशेषभावात्—भावनायाः फलसमानाधिकरणत्वात् । तथा च भावनायाः फलसामानाधिकरण्यं तत्स्पष्टत्वे दोष इति भावः । नन्वेवं 'किं करोति' इति प्रश्ने 'पचति' इत्युत्तरस्येव 'अस्ति' इत्युत्तरमपि स्यादिति चेद्? इष्टापत्तिः, आसन्नविनाशं कञ्चिदुद्दिश्य 'किं करोति' इति प्रश्ने 'अस्ति' इत्युत्तरस्य सर्वसंमतत्वात् । इतरत्र तु सुस्थतया[3]

मात्, 'जले नौः शकटं वहति, स्थले च नावम्' इत्यादिभाष्याच्च प्रकृते वस्तुतो धात्वर्थस्य क्रियात्वे क्रियात्वस्य च धात्वर्थत्वे बाधकाभावेन तत्र दूषणदानस्यानुचितत्वापत्तेरित्यर्थः ॥ ११ ॥

अशेषभावादिति । नास्ति शेषः फलव्याप्त्यतिरिक्तो भावो (भवत्यस्मि

१. धर्म्यंश इति—धर्मो विशेषणं, प्रकृते सत्तादिरूपं फलं तदस्यास्तीति धर्मी विशेष्यः, स च प्रकृते कर्तृरूपः, अकर्मकधातुस्थले फलाश्रयस्य कर्तृत्वात् । यो यो धर्मी स धर्मवटित इति नियमात् फले धर्म्यंशत्वव्यवहारः । २. भाव्यत्वेन=भावनानिष्पाद्यत्वेन ।

३. सुस्थतया निश्चित इति—सत्ताऽनुकूले व्यापारे निश्चिते सति यदि किं करोतीति प्रश्नः क्रियते तदाऽन्यविषयक एवाऽयं प्रश्न इति निश्चयात् पचतीत्यादौ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निश्चिते 'किं करोति' इति प्रश्नः पच्यादिविशेषगोचर एवेत्यवधारणात् 'अस्ति' इति नोत्तरमिति ॥ १२ ॥

नन्वेवं भावनायाः फलनियतत्वात्फलाश्रयस्य च कर्मत्वात्सर्वेषां क्रियावाचकत्वे सकर्मकतापत्तिरित्यत आह—

फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥ १३ ॥

एकनिष्ठतायाम्—एकमात्रनिष्ठतायां* भिन्नाधिकरणावृत्तितायामिति यावत् । तेन गम्यादौ फलस्य कर्तृनिष्ठत्वेऽपि नातिव्याप्तिः । अकर्मको यथा भ्वादिः । तयोः—फलव्यापारयोः, आश्रयभेदे सकर्मक इत्यर्थः ।

उक्तं च वाक्यपदीये—

*आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते ।
अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मकः ॥ इति ।

विभ्रदिति । तेच स्वधारणानुकूलो व्यापारोऽत्रापि गम्यत* इति भावः । तेन कर्मणा सकर्मकत्वं तु न, अन्तर्भावात्; फलांशेन सामानाधिकर-

---

णिति व्युत्पत्त्या) अधिकरणं यस्य तस्मात् फलव्यधिकरणत्वाभावादित्यर्थः ॥ १२ ॥

ननु फलव्यापारयोरेकाधिकरणवृत्तित्वस्याकर्मकताप्रयोजकत्वे गम्यादीनामपि संयोगरूपफलस्य व्यापारस्य च कर्तृवृत्तित्वेनाकर्मकत्वापत्तिरत आह—**एकमात्रनिष्ठतायामिति** । तत्त्वं च तद्व्यक्तिभिन्नानिष्ठत्वे सति तद्व्यक्तिनिष्ठत्वम् । भिन्नाधिकरणवृत्तित्वाभाववत्त्वमिति यावत् । तथा च संयोगस्य व्यापाराधिकरणवृत्तित्वेऽपि व्यापारानधिकरणग्रामवृत्तित्वेनोक्तलक्षणाभावान्न दोष इति भावः ।

आत्मानमिति । आत्मानं सत्ताम् । आत्मना स्वेन । बिभ्रत् धारयन् ।

गम्यते इति । सत्तात्यागानुकूलव्यापाराभावस्यैव सत्तानुकूलव्यापारत्वेन प्रतीतेरिति भावः । नन्वेवम् 'आत्मानं जानाति' इत्यादौ ज्ञानस्य कर्तृमात्रनिष्ठतयाऽ-

---

वोत्तरवाक्यत्वं न तु अस्तीत्यस्य । अज्ञातविषयिणी एव जिज्ञासा न तु निश्चितविषयिण्यपीति नियमादिति हृदयम् ॥ १२ ॥

१. फलनियतत्वादिति—फलेन नियतत्वाद् व्याप्यत्वादित्यर्थः । निपूर्वकयमुधातोर्व्यापकत्वं व्याप्यत्वरूपार्थस्तात्पर्यवशात् । ननु प्रकृते व्याप्यत्वरूपमेवार्थं इत्यत्र किं तात्पर्यमिति चेदुच्यते, नियतपदस्य तदर्थत्वे यत्र यत्र व्यापारवाचकत्वं तत्र तत्र

३ वै० भू०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्यसत्त्वादित्यर्थः। *'आत्मानं जानाति, इच्छति' इत्यादौ च द्वावात्मानौ, शरीरात्माऽन्तरात्मा च। तत्रान्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवतीति "कर्मवत्कर्मणा" इति सूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्मकत्वमित्यवधेयम् ॥ १३ ॥

नन्वसत्त्वभूतक्रियाया धात्वर्थत्वे 'पाकः' इत्यत्रापि तत्प्रत्ययापत्तिः। न चेष्टापत्तिः, 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति भाष्यविरोधादित्यत आह—

आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ॥ १४ ॥

*आख्यातशब्दे 'पश्य मृगो धावति' इत्यादौ। भागाभ्यां तिङन्ताभ्याम्। प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तसपद्याख्यानम्

कर्मकत्वापत्तिरित्यत औपाधिकभेदपरिकल्पनेन तस्य व्यापारवैयधिकरण्यमुपपाद्य व्याचष्टे—आत्मानमिति ॥ १३ ॥

आख्यातशब्दे = तिङन्तसमुदाये।

मृगो धावति पश्येति साध्यसाधनवर्तिता।

इति वाक्यपदीयात्। यत्तु हेलाराजीये 'आख्यातशब्दे तिङन्ते यथा प्रकृत्या साध्यत्वेन प्रत्ययेन तिङा साधनत्वेनार्थः प्रत्युच्यते, तथा घञादिष्वपि। साध्यत्वसाधनत्वाभ्यां प्रतीतिमात्रेऽयं दृष्टान्तः' इति, तदत्र सन्दर्भविरुद्धम्, साधनत्वं तु कारकत्वेनान्वयित्वम् इत्यनुपदमेव वक्ष्यमाणतया तिङुपस्थितस्यार्थस्य प्रकृत्यर्थे कारकत्वेनान्वयाभावात्तदसङ्गतेः। 'पश्य मृगः' इत्यत्र तु तिङन्तधावतिपदार्थे

फलवाचकत्वमिति व्याप्तेर्लाभे व्यापारवाचकत्वेन हेतुना फलवाचकत्वस्यानुमितौ फलाश्रयस्य कर्मतया सर्वेषां सकर्मकत्वापत्तिरिति शङ्का युज्येत। अन्यथा (व्यापारवाचकत्वार्थकत्वे) प्रकृते विपरीतव्याप्तौ फलवाचकत्वेन व्यापारवाचकत्वानुमितिः प्रसज्येत, सा चाऽनुपयुक्ता। व्याप्याभावेऽपि व्यापकस्य सत्त्वात्सकर्मकत्वाऽपादनरूपमवतरणमप्यत्र कल्पे निरुध्येतेति संक्षेपः ॥ १३ ॥

1. आख्यातशब्दे इति—आख्यातशब्दौ स्तो यत्रेति मत्वर्थीयेन अर्श आद्यच्प्रत्ययेन तिङन्तद्वयघटिते वाक्ये इत्यर्थं इति केचित्तन्न, तत्पुरुषे सति मत्वर्थीयोऽर्शआद्यच्वृत्तिद्वये गौरवात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'पचति' इत्यत्रापि भागद्वयसत्त्वात् । साध्यसाधनरूपता यथाक्रमं ग्राह्या । साध्यत्वं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वम् । साधनत्वं कारकत्वेनान्वयित्वम् । स घञादिष्वपीति । प्रकृत्या साध्यावस्था, प्रत्ययेन साधनावस्था । इयान्विशेषः, घञाद्युपस्थाप्या लिङ्गसंख्यान्वयिनी कारकान्वयिनी च । आख्यातवान्तोपात्ता तु नैवम्* । तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम् । न च घञन्ते धातुना तथाऽभिधाने मानाभावः, 'ओदनस्य पाकः' इति कर्मणि षष्ठ्या मानत्वात् । न च 'भवति' इत्यध्याहृततिङन्तक्रियान्वयात्षष्ठी, "कर्तृकर्मणोः कृति" इति *कृदन्तेन योगे एव तद्विधानात्, "न लोकाव्ययनिष्ठाखलर्थतृनाम्" इति लादेशयोगे षष्ठ्या निषेधाच्च । एवं रीत्या 'काष्ठैः पाकः' इत्याद्यपीष्टमेव । एवं फलांशोऽपि धातुनाऽसत्त्वावस्थापन्न एवोच्यते । अत एव 'स्तोकं पचति' इतिवत् 'स्तोकं पाकः' इत्युपपद्यते* इति ॥ १४ ॥

कर्मत्वेनान्वयः स्पष्ट एव, 'पचति भवति' इत्यत्र पचतेः कर्तृत्वेन च । कर्तृत्वकर्मत्वरूपेणान्वयित्वेऽपि नासत्त्वभङ्ग इत्युक्तं प्राक् ।

नैवमिति । लिङ्गान्वयिनी कर्तृत्वकर्मत्वेतरकारकत्वव्याप्यसम्बन्धान्वयिनी च नेत्यर्थः ।

कृदन्तेन योगे एवेति । अत एव 'ओदनपाकः' इति समाससिद्धिः । अन्यथा तत्रासामर्थ्यात् समासो न स्यात् । "कृद्योगा षष्ठी समस्यते" इति वार्तिकं तु 'वस्त्रकृतिः' इत्यादौ चरितार्थम् । शेषषष्ठ्या समासे तु कर्मत्वप्रकारकबोधस्यानुभविकस्यानापत्तेः । 'आश्चर्यो गवां दोहोऽगोपेन' इत्यत्र "उभयप्राप्तौ कर्मणि" इत्यस्य 'अनन्तर'न्यायेन "कर्तृकर्मणोः" इत्यस्यैव नियामकतया शेषषष्ठ्या दुर्वारत्वात्तत्प्रयोगासिद्ध्यापत्तेश्चेति दिक् ।

इत्युपपद्यते इति । पच्धात्वर्थफलेनाभेदान्वयात् फलस्यापि व्यपदेशिव-

---

आख्याते शब्दौ यत्रेति बहुव्रीहिर्वाक्यरूपान्यपदार्थे इत्यपरे, तदपि न, अन्यपदार्थनिरूपितशक्तिकल्पने गौरवात् । अतश्च "आख्यातयोः शब्दे (वाक्ये) इति षष्ठीतत्पुरुषः. अवयवाऽवयविभावसम्बन्धश्चात्र षष्ठ्यर्थः । तथा च तिङन्तद्वयनिष्ठावयवत्वनिरूपितावयवित्ववद्वाक्यात्मकशब्दे इत्यर्थः ।

१. पचतीत्यत्रेति—तथा चाऽत्राऽपि सिद्धावस्थापन्नक्रियाप्रतीत्यापत्तिः स्यादिति भावः ॥ १४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतदेव स्पष्टयति—

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ॥ १५ ॥

न च घञादिभिः सिद्धत्वेनाभिधाने मानाभावः, 'पाकः' इत्युक्ते 'भवति' 'जायते' 'नष्टः' इत्याकाङ्क्षोत्थानस्यैव मानत्वात्। धातूपस्थाप्यायां तदसंभवस्योक्तत्वात् 'स्तोकः पाकः' इत्यनापत्तश्च। तस्माद्धात्वर्थान्वये* स्तोकादिशब्देभ्यो द्वितीया, घञर्थान्वये प्रथमा पुंल्लिङ्गता चेति तत्सिद्धये घञादेः शक्तिरुपेया। एतेन घञादीनां प्रयोगसाधुतामात्रमिति *नैयायिकनव्योक्तमपास्तम्। *न च घञन्तशक्त्युपस्थाप्यान्वये 'स्तोकः पाकः' इति भवतीति वाच्यम्, घञन्तानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवादनुशासनाच्च घञादेरेव तथाशक्तिकल्पनादिति दिक्। एवं घञ्शक्त्यभिप्रायेण 'कृदभिहितः' इति भाष्यम्, अतो न तद्विरोध इति भावः ॥ १५ ॥

द्भावेन फलाश्रयत्वात्कर्मत्वेन तदभिन्नस्यापि कर्मत्वम्। अन्यथा (फलस्य साध्यत्वेनानुपस्थितौ) साध्यत्वेनोपस्थिते एव कारकान्वयनियमात्तत्र तन्न स्यात्। घञुपस्थितव्यापारेऽन्वयविवक्षायां तु 'स्तोकः पाकः' इत्येव भवति, व्यापारस्याकर्मत्वादिति बोध्यम्। न चैवं "कर्तृकर्मणोः कृति" इति षष्ठ्यापत्तिरिति वाच्यम्, कर्तृसाहचर्यात्कर्मणोऽपि धात्वर्थे भेदेनान्वयिन एव ग्रहणेनादोषादिति शब्देन्दुशेखरे स्पष्टम् ॥ १४ ॥

धात्वर्थान्वये = धात्वर्थफलान्वये। नैयायिकनव्येति। विशिष्टशक्त्यादिनां घञि शक्तिकल्पनेऽपि समुदाये प्रातिपदिकसंज्ञाद्यनुरोधेन शक्तिस्वीकारावश्यकतया समुदायशक्त्यैव निर्वाहे तदवयवे तत्कल्पनमनर्थकमिति घञादीनामनर्थकत्वे प्रयोगसाधुतामात्रार्थं प्रयोग इति वदन्ति। तदेतदाह—न चेत्यादिना।

---

१. घञादेरेवेति—ननु कृत्तद्धितसमासादिवृत्तिषु समुदाये शक्तिं स्वीकुर्वतां शाब्दिकानां मते घञन्ते शक्तेरावश्यकतया घञन्ताऽनुपूर्व्याः शक्ततावच्छेदकत्वमपि स्वीकार्यमिति चेत्सत्यम्, समुदाये शक्तिस्वीकारेऽपि "कर्तरि कृत्" "भावे" इत्याद्यनुशासनात् कृदभिहितो भावो द्रव्यवत्प्रकाशते इति भाष्याच्च प्रक्रियादशायां घञादीनामपि शक्तिस्वीकारात् ॥ १५ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु कारकाणां भावनान्वयनियम एव 'पाकः' इत्यत्रापि कर्मषष्ठ्यनुसारेण भावनाया वाच्यत्वं सिध्येत् । तदेव कुत इत्याशङ्कां समाधत्ते—

संबोधनान्तं कृत्त्रोऽर्थाः कारकं प्रथमो वतिः ।
धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ् ॥ १६ ॥
तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम् ।
साधुत्वमष्टकस्यास्य क्रिययैवावधार्यताम् ॥ १७ ॥

[1]संबोधनान्तस्य क्रियायामन्वयः, 'त्वं ब्रूहि देवदत्त' इत्यादौ निघातानुरोधात् । "समानवाक्ये निघातयुष्मदस्मदादेशाः" इत्यनेन समानवाक्ये एव तन्नियमात् ।

उक्तं हि वाक्यपदीये—

संबोधनपदं यच्च तत्क्रियाया विशेषणम्* ।
*व्रजानि देवदत्तेति निघातोऽत्र तथा सति ॥ इति ।

'पचति भवति देवदत्त' इत्यादौ तु सूत्रभाष्यादिरीत्यैकवाक्यतासत्त्वात्स्यादेव निघातः, "तिङ्ङतिङः" इति सूत्रयता तिङन्तानामप्येकवाक्यतास्वीकारात् । "एकतिङ् वाक्यम्" इति वदतां वार्तिककाराणां मते परं न । वस्तुत एकतिङ्विशेष्यकं वाक्यमिति तदभिप्रायस्य हेलाराजीयादौ वैयाकरणभूषणेऽस्माभिश्च प्रतिपादितत्वात्तन्मतेऽपि* भवत्येवेत्यवधेयम् ।

क्रियाया विशेषणमिति । संबोधनविभक्तेरनुवाद्यविषयतया विधेयक्रियायामेवान्वयस्यौचित्यमिति न्यायसिद्ध एवायमर्थः ।

व्रजानि देवदत्तेतीति । अत्र 'जानीहि' इत्यध्याहारः । ज्ञानक्रियायां देवदत्तस्योद्देश्यतया व्रजनस्य कर्मतयाऽन्वयेन समानवाक्यत्वं बोध्यम् ।

तन्मतेऽपीति । अयं भावः—तिङन्तविशिष्टत्वमेकवाक्यत्वम् । वैशिष्ट्यञ्च स्वघटितत्वं—स्वार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकपदघटितत्वं—स्वाविशिष्टाघटितत्वमेतत्त्रितयसम्बन्धेन । स्ववैशिष्ट्यञ्च स्वेतरत्व—स्वार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्र-

---

१. सम्बोधनान्तेति—सम्बोधनविभक्त्यन्तार्थस्येत्यर्थः । एतेन सम्बोधनान्तस्य पदरूपतया तस्य क्रियायामन्वयाऽसम्भव इत्यपास्तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*कृत्वोर्थाः। "क्रियाभ्यावृत्तिगणने कृत्वसुच्" इति क्रियायोगे तत्साधु
त्वोक्तेः। क्रियाया अभ्यावृत्तिः पुनःपुनर्जन्म तस्मिन्द्योत्ये इति तदर्थात्

कारकम्। "कारके" इत्यधिकृत्य तेषां व्युत्पादनात्। कारकशब्दो
हि क्रियापरः, करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः। तथा चापि
मेष्वपादानादिसंज्ञाविधिषु क्रियार्थककारकशब्दानुवृत्त्या क्रियान्वयिनामे
संज्ञेति भाष्ये स्पष्टम्।

*प्रथमो वतिः। "तेन तुल्यं क्रिया चेद्वतिः" इति विहितः। अ
यत्तुल्यं, सा क्रिया चेदित्युक्तत्वात्।

योजकेतरत्वैतदुभयसम्बन्धेन। 'त्वं ब्रूहि देवदत्त' इत्यत्र ब्रूतौ युष्मच्छब्दार्थस्य कर्तृ
त्वेन देवदत्तस्योद्देश्यत्वेनान्वयः। एवञ्च–'ब्रूहि' इति तिङन्तघटितत्वमुक्तपदसमुच्च
त्वं 'ब्रूहि' इति, तदर्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकपदे 'त्वं देवदत्त' इति
तद्घटितत्वं च, त्वं 'ब्रूहि' इति, तदितरत्वं ब्रूह्यर्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोज
तरत्वञ्च घटपटादिपदेषु, तदघटितत्वमपीत्युक्तपदसमुच्चयस्यैकवाक्यत्वसिद्धिः। अ
विशेष्यतानिरूपितत्वं प्रकारतायां साक्षात्परम्परासाधारणमिति 'नद्यास्तिष्ठति कूले' इत्य
र्थके 'नद्यास्तिष्ठति' इति समर्थसूत्रभाष्योक्ते निघातसिद्धिः। स्ववैशिष्ट्यघटकद्वितीय
म्बन्धानुपादाने 'तिष्ठति देवदत्तः, पचति मैत्रः' इत्येतद्घटकस्य 'देवदत्तः पचति मैत्र
इत्यस्यैकवाक्यत्वापत्तिः। तदुक्तौ तु पचत्यर्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोज
तरदेवदत्तपदघटितत्वान्न दोषः। तादृशप्रथमसम्बन्धश्च 'देवदत्तः पचति' इत्यत्र स्वा
निष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकं 'देवदत्त' इति, तदितरत् 'पचति' इति, तद्घटि
त्वेन तत्राव्याप्तिवारणाय। तिङन्तवैशिष्ट्यघटकद्वितीयसम्बन्धोपादानं तु समुदायस्यै
कवाक्यत्वसिद्धये। यत्तु 'पचति' इत्यस्य तत्त्ववारणायेति तन्न, तत्रैकवाक्यत्वस्य व्यप
देशिवद्भावेन स्वीकारात्। अत एव "अनन्त्यस्यापि प्रश्नाख्यानयोः" इति प्लुतसिद्धि
प्रथमसम्बन्धोपादानेन तिङन्तरहितसमुदायस्य न तत्त्वम्। न चैवं 'त्वया शयि
तव्यम्' इति पदसमुदायस्य तत्त्वं न स्यात्, तिङन्तघटितत्वाभावात् इति वाच्यम्
क्रियाप्रतिपादकत्वप्रकारकतात्पर्यविषयपदविशिष्टत्वस्य तत्त्वस्वीकारेण 'शयितव्यम्'
इत्यस्य तिङन्तत्वाभावेऽपि निरुक्तपदत्वसत्त्वेन तद्विशिष्टस्य तत्त्वाक्षतेः। अधिक
मस्मद्गुरुचरणकृतशब्देन्दुशेखरटिप्पण्यां द्रष्टव्यम्। इदमेवैकवाक्यत्वं भाष्यकारे
'आख्यातं सविशेषणं वाक्यम्' इत्युक्त्या ध्वनितम्।

कृत्वोर्था इति। पञ्चकृत्वो भुङ्क्ते इत्यादौ। **प्रथम इति।** तेन मथुरायामि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धातुसंबन्धाधिकारे। "धातुसम्बन्धे प्रत्ययाः" इत्यधिकृत्य* तेषां विधानात्।

असमस्तनञ्। समासायोग्यः प्रसज्यप्रतिषेधीयो नञित्यर्थः, उत्तरपदार्थान्वयेऽपि समासविकल्पेन पक्षेऽसमस्तत्वाद् यथाश्रुतग्रहणायोगात्। न चासमस्तनञः क्रियाऽन्वये मानाभावः, न त्वं पचसि, न युवां पचथः, चैत्रो न पचति, घटो न जायते इत्यादौ क्रियाया एव निषेधप्रतीतेः। अत एव विद्यमानेऽपि घटे तथाप्रयोगः। तथा च घटो नास्तीत्यत्राप्यस्तित्वाभाव एव बोध्यते। न हि-घटो न जायते, नास्तीत्यनयोर्धात्वर्थभेदमन्तरेणास्ति विशेषः। तथा च भूतले न घट इत्यत्राप्यस्तीत्यध्याहार्यम्। प्रकारतासंबन्धेन नञर्थविशेष्यकबोधं धातुजन्यभावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात्*। शेषं नञर्थनिर्णये वक्ष्यते ॥ १६ ॥

"यस्य च भावेन भावलक्षणम्" इत्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वाख्यानलाभात् "षष्ठी चानादरे" इति तदग्रिमसूत्रेऽपि चकाराद्यस्य च भावेनेत्यायातीत्यर्थः। साधुत्वमिति। तत्स्वरूपं च वक्ष्यते*।

मधुरावत् स्रुघ्ने प्राकार इत्यत्र वत्यर्थस्य प्राकारेऽन्वयेऽपि तस्यात्राग्रहणेन न क्षतिः। इत्यधिकृत्येति। याहि याहि इति याति इत्यादाविति शेषः। अत्र लोडन्तार्थस्य यातीत्युपस्थितक्रियायां सामान्यविशेषभावेनान्वय इति भावः

क्लृप्तत्वादिति। नञर्थनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधं प्रति भावनात्वावच्छिन्नविषयिणी धातुजन्योपस्थितिः कारणम् इति कार्यकारणभावस्य क्लृप्तत्वादित्यर्थः। अधिकमग्रे निरूपयिष्यामः ॥ १६ ॥

वक्ष्यते इति। पुण्यजननयोग्यत्वं साधुत्वमिति वक्ष्यते "असाधुरनुमानेन" वक्तिशक्तिनिर्णयप्रकरणस्थकारिकाव्याख्यायामित्यर्थः।

ननु क्रियाशब्दस्य धात्वर्थमात्रे प्रसिद्धेः फलान्वयेऽप्युक्ताष्टकस्य साधुत्वलाभे

१· ननु घटो न पट इत्यत्रासमस्तनञः क्रियायामन्वयाभावात्तादृशनियमो न शक्नोति स्थातुमित्यत आह—समासाऽयोग्य इति।

२ ननु समासाऽयोग्यो नञ क इत्यत आह—प्रसज्येति। एवं च प्रसज्यप्रतिषेधार्थकस्य नियमतः क्रियाऽन्वयात्तस्यैवाऽत्रोपादानम्। प्रसज्यप्रतिषेधस्तु क्रियया सह यत्र नञित्यादिशिष्टोक्त्या अनुभवबलाच्च तादृशनञो नियमतः क्रियाऽन्वयित्वमिति भावः ॥ १६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रियथैवेति। *अयं भावः—भूवादिसूत्रादिषु आद्यः क्रियाशब्दो भावनाव्यपदेशात्तत्र तस्य सांकेतिकी शक्तिः, फलांशे क्वाचित्कः क्रियते इति यौगिकः प्रयोगः। तथा च संज्ञाशब्दस्यानपेक्षप्रवृत्तत्वेन बलवत्त्वा द्भावनाऽन्वय एव साधुता लभ्यते। अत एव संज्ञाशब्दप्राबल्याद् रथन्तरमुत्तराग्रन्थपठितऋक्ष्वेव गेयं, न तु वेदे तदुत्तरपठ्यमानऋक्षु इति नवमे निर्णीतम्*।

*किं च फलांशोऽपि भावनायां विशेषणं, कारकाण्यपि क्वचित्तथा भूतानीति "गुणानां च परार्थत्वादसंबन्धः समत्वात्स्यात्" (जै० सू० ३-१-२२) इति न्यायेन सर्वे सेवका राजानमिव भावनायामेव परस्पर

भावनान्वयनियमाभावात्तदनुरोधेन पाक इत्यादौ भावनाया वाच्यत्वावश्यकत्वं न स्या दित्याशङ्कां निराकुरुते—अयं भाव इति।

नवमे निर्णीतमिति। "यद्योन्यां तदुत्तरयोर्गायति" "रथन्तरमुत्तरयोर्गायति" इत्यत्र द्विविधे उत्तरे संभवतः। तथा हि छन्दोगानामृक्पाठाय द्वौ ग्रन्थौ—छन्दः, उत्तरा च। तत्राद्यग्रन्थे रथन्तरस्य योनिभूता "अभित्वा शूर नो नुमः" इति ऋक् पठिता ततः "त्वामिद्धि हवामहे" इत्यादयोऽभिहिताः। उत्तराग्रन्थे तु रथन्तरयोनिसूक्ते "अभित्वा" इति ऋच ऊर्ध्वम् "न त्वा वां अन्यो दिवा न पार्थिवः" इत्यादि ऋग्द्वयं पठितमिति। एवञ्चोत्तराशब्दस्य सम्बन्धिशब्दत्वेनोभयोर्योन्युत्तरत्वाविशेषाद्विकल्प इति पूर्वपक्षे "रूढमुत्तरयोरिति" इति लघुवार्तिकम्। अयं भावः—लोके तथा उत्तरशब्दस्य प्रवृत्तावपि वेदे उत्तराशब्दस्य ग्रन्थविशेषे रूढत्वेन निरपेक्षप्रवृत्तिकत्वा योगाद्बलीयस्त्वादुत्तराग्रन्थपठ्यमानर्चयोरेव गानं प्रकरणेन क्रत्वङ्गत्वाच्चेति निर्णीतम्। तथा च तत्र यथा सम्बन्धिशब्दस्य तत्तत्सम्बन्धिप्रतीतिसापेक्षप्रवृत्तिकत्वं दुर्बलत्वं संज्ञाशब्दस्य निरपेक्षप्रवृत्तिकत्वं प्रबलत्वं, तथा प्रकृते योगार्थसापेक्षप्रवृत्तिकयौगिकापेक्षया संज्ञाशब्दस्य तदनपेक्षप्रवृत्तिकतया प्रबलत्वम्, विलम्बोपस्थापकत्वशीघ्रोपस्थापकत्वयोर्दौर्बल्यप्राबल्यप्रयोजकत्वम् इति पर्यवसानादिति भावः।

ननु भूवादिसूत्रे क्रियाशब्देन भावनाव्यपदेश इव "कर्मवत् कर्मणा" इति सूत्रे क्रियाशब्देन फलस्य व्यपदेशात्तत्रापि तस्य सांकेतिकत्वं विनिगमनाविरहादित्यत आह—किञ्चेति।

१. क्वाचित्कत्वे नियामकं दर्शयति—क्रियते इति। क्रियते व्यापारेण निष्पाद्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निरपेक्षाण्यनुयन्ति। 'न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके' इति न्यायेनापि फलं त्यक्त्वा भावनायामेवानुयन्तीति मीमांसका अपि मन्वते। एवं च विशेष्यतया कारकादिप्रकारकबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतुरिति कार्यकारणभावस्य क्लृप्तत्वाद् यत्रापि पक्वा पाचक इत्यादौ भावना गुणभूता तत्रापि क्लृप्तकार्यकारणभावानुरोधात्तस्यामेवान्वय इत्यवसीयत इत्यादि भूषणे प्रपञ्चितम्।

केचित्तु भूतले घटो, देवदत्तो घटमित्यादावन्वयबोधाकाङ्क्षानिवृत्त्योरदर्शनान्न तद्व्यतिरेकेण साधुत्वलाभ इत्याहुः॥ १७॥

स्वयमुपपत्तिमाह—

यदि पक्षेऽपि वत्यर्थः कारकं च नञादिषु।
अन्वेति त्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना॥ १८॥

पर्वतो वह्निमान् धूमात् महानसवत्। भूतले न घटः। भूतले घट इति आदिपदात्। एवमादिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयश्चाभ्युपेयते, तर्हि चतुर्थ्याः स्पृहिकल्पनाऽपि त्यज्यतामित्यर्थः। अनुशासनानुरोधतौल्येऽर्धजरतीयमयुक्तमिति भावः॥ १८॥

अन्वयबोधाकाङ्क्षानिवृत्त्योरिति। शाब्दबोधस्य आकाङ्क्षानिवृत्तेश्चेत्यर्थः। तद्व्यतिरेकेणेति। क्रियान्वयं विनेत्यर्थः। न च क्रियारूपार्थाध्याहारेणापि शाब्दबोधाकाङ्क्षानिवृत्त्योः सम्भवान्न तद्वाचकपदप्रयोगावश्यकतेति वाच्यम्। पदजन्यपदार्थोपस्थितेरेव शाब्दबोधोपयोगित्वात्। पदानां संभूयान्वयबोधकत्वव्युत्पत्तेश्चेति बृहद्भूषणे विस्तरः॥ १७॥

त्यज्यतामिति। पुष्पेभ्य इति चतुर्थ्यां श्रुतायां स्पृहयतीत्येवाध्याह्रियते, न पदान्तरम् अर्थमात्रं वा; इदं त्यज्यतामित्यर्थः। अर्धजरतीयमिति। जरत्या अर्धमिवार्धजरती तत्सदृशमर्धजरतीयम्। "समासाच्च तद्विषयात्" इति छः। यथा जरत्याऽर्धं काम्यतेऽर्धं न, तथाऽत्रायुक्तमित्यर्थः॥ १८॥

या सा क्रियेति यौगिकः प्रयोगः। १. प्रकारान्तरेण कारकाणां क्रियाऽन्वयनियममुपपादयतां केषाञ्चिच्छाब्दिकानां मतं दर्शयति केचित्तु इति॥ १७॥

२. महानसवदिति—तेन तुल्यं क्रिया चेद्वतिरित्यनेन तृतीयान्ताद्वतिः क्रियते, क्रियातुल्यत्वेऽर्थे। अत्र तु यस्तुल्यः स पर्वतो न क्रियारूपः। न च महानसे इवेति विग्रहे "तत्र तस्येवेति, वतिः, साहश्याऽनुयोगिपर्वतस्याऽपि सप्तम्यन्तत्वापत्तः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वय इत्याह—

अविग्रहा गतादिस्था ग्रामादिकर्मभिः

क्रिया सम्बध्यते तद्वत्कृतपूर्व्यादिषु स्थिता ॥ १६ ॥

न *विविच्य ग्रहो *ग्रहणं यस्याः साऽविग्रहा गुणीभूतेति यावत्। तथा च ग्रामं गत इत्यत्र यथा क्तप्रत्ययार्थो गुणीभूताऽपि क्रिया ग्रामादिकर्मभिः संबध्यते, तथा कृतपूर्वी कटमित्यत्रापि गुणभूता इन्यादिभिरित्यर्थः। न च वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात्तत्रान्तर्गता भावना पदार्थैकदेश इति *कथं तत्रान्वय इति वाच्यम्। नित्यसापेक्षेष्वेकदेशेऽपि देवदत्तस्य गुरुकुलं, चैत्रस्य नप्तेत्यादाविवान्वयाभ्युपगमात्*। एवं भोक्तुं पाको भुक्त्वा पाक इत्यत्रापि द्रष्टव्यम् ॥ १६ ॥

विविच्य पृथग्भूय, इतराविशेषणत्वेनेति यावत्। ग्रहणं ज्ञानम्। कथं तत्रान्वय इति। पदार्थान्तरनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबोधं प्रति मुख्यविशेष्यतया पदजन्यपदार्थोपस्थितिः कारणम्। अत एव नीलो घट इत्यत्र घटत्वेनोपस्थितघटपदार्थ एव नीलपदार्थोऽन्वेति न तु घटत्वे, तस्य विशेषणत्वेनोपस्थित्याऽन्वयितावच्छेदकरूपेणानुपस्थितेः। अत एव नित्यो घट इति न प्रयोगः अन्यथा घटत्वे नित्यपदार्थस्यान्वयसम्भवेन तादृशप्रयोगस्य प्रामाण्यं स्यात्। एवं च प्रकृतेऽपि क्रियाया मुख्यविशेष्यतयोपस्थित्यभावेन तत्र ग्रामादिकारकाणामन्वयासम्भवः। एतत्कार्यकारणभावमूलक एव "पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेन" इति व्युत्पत्तिरिति भावः।

अन्वयाभ्युपगमादिति। देवदत्तस्य गुरुकुलमित्यादौ कुलपदार्थविशेषणतयोपस्थितगुरुपदार्थे देवदत्तस्यान्वयदर्शनेनोक्तकार्यतावच्छेदककोटौ नित्यसाकाङ्क्षपदार्थावृत्तीतिविशेषणदानेन पदार्थान्तरनिष्ठप्रकारतानिरूपितनित्यसाकाङ्क्षपदार्थावृत्तिविशेष्यतासम्बन्धेन शाब्दबोधं प्रति मुख्यविशेष्यतया पदजन्यपदार्थोपस्थिते

अस्मन्मते तु अत्र 'यथा महानसं वह्निमद् वर्तते तथा पर्वतोऽपि वह्निमान् वर्तते' इति सत्ताक्रियामादाय वतेः साधुतेति तत्त्वम्। २. इन्यादिभिरिति—तदर्थभूतकर्त्रादिभिरित्यर्थः। कृतं पूर्वमनेनेति विग्रहे सपूर्वाच्चेति कर्त्रर्थे एव इनेर्विधानात्।

१. कारिकास्थकृतपूर्व्यादिघटकादिशब्दग्राह्यं दर्शयति—एवं भोक्तुं पाक इति। अत्र तुमुन्ण्वुलौ क्रियायामिति तुमुनः क्रियायोग एव साधुत्वम्। सा च क्रि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतिप्रसङ्गमाशङ्क्य समाधत्ते—

कृत्वोर्थाः क्त्वातुमुन्वत्स्युरिति चेत्सन्ति हि क्वचित्।
अतिप्रसङ्गो नोद्भाव्योऽपिधानस्य समाश्रयात् ॥ २० ॥

भोक्तुं पाको भुक्त्वा पाक इत्यादौ "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" "समानकर्तृकयोः पूर्वकाले" इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुनादयो गुणभूतां तामादाय यथा जायन्ते, तथा कृत्वो

कारणत्वमिति कार्यकारणभावाभ्युपगमेन गुरुपदार्थनिष्ठविशेष्यताया नित्यसाकाङ्क्षपदार्थवृत्तित्वेनोक्तनियमस्याप्रवृत्तिवत् प्रकृतेऽपि क्रियाया जनकत्वांशे नित्यसाकाङ्क्षत्वेनोक्तनियमाप्रवृत्तेरित्यर्थः।

ननु प्राचीनतार्किकमते समासे विशिष्टशक्त्यस्वीकारेण गुरुपदार्थस्य विशेष्यतयैवोपस्थितेः सत्त्वेनोक्तस्थलीयान्वयदर्शनेन तादृशव्युत्पत्तिसंकोचोऽसम्भवीत्यत आह—चैत्रस्य नप्तेति। स्वप्रयोज्यं (जन्यशरीरजन्यं) शरीरं नप्तृपदार्थः। तदेकदेशजन्यत्वे चैत्रस्याऽन्वयः। विशेष्येऽन्वये तु चैत्रस्य पुत्रेऽपि तथाविधप्रयोगापत्तिः। तस्यापि पितामहजन्यजन्यत्वात् चैत्रनिरूपितप्रयोज्यत्वाश्रयत्वाच्च। न च प्रयोज्यत्वं परम्पराजन्यत्वमेवेति न दोष इति वाच्यम्। चतुर्थादिपुरुषेऽपि तथाप्रयोगापत्तेः। भोक्तुं पाक इत्यत्रापि पच्धात्वर्थस्य निष्पाद्यमानक्रियावाचकत्वेन निष्पाद्यमानत्वस्य च पुत्रत्वस्येव निष्पादकत्वांशे नित्यसाकाङ्क्षत्वेन उक्तन्यायाप्रवृत्त्या पाकपदार्थैकदेशपच्धात्वर्थे साध्यावस्थापन्नव्यापारेऽन्वय इति न काप्यनुपपत्तिरिति।

साध्यत्वं च निष्पाद्यमानत्वमेव। तद्रूपेणैव च बोधः। यद्यपि 'घटं करोति' इत्यादौ घटस्यापि साध्यमानत्वं प्रतीयते, तथापि पदान्तरसमभिव्याहारात् तथा, स्वतस्तु घटादिपदाद् द्रव्यं सिद्धत्वेनैव प्रतीयते। सिद्धत्वं च सूक्ष्मरूपेण तस्य बोध्यम्। यद्यपि क्रियापि सूक्ष्मरूपेण सिद्धत्वेनैव प्रतीयते, तथापि शक्तिस्वाभाव्यात् स्थूलरूपेण साध्यत्वेनैव तस्याः प्रतीतिः, द्रव्यस्यतु सूक्ष्मरूपेण सिद्धत्वेनैवेति न दोषः। क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपस्य साध्यत्वे तु पचति भवति, भुक्त्वेत्यादौ पचतिभुक्त्वेत्यादीनां क्रियाकाङ्क्षादर्शनेन तादृशरूपेणाभानात् कारकान्वयानापत्तिर्धातुत्वानापत्तिश्चेत्यादिदूषणपात इति लघुमञ्जूषायां धात्वर्थनिर्णये स्पष्टम् ॥ १९ ॥

पाकादिघटकीभूतपच्यादिधातूपस्थाप्याऽसत्त्वरूपैव, तयैवाऽन्वयात्तुमुन्नादेः साधुतेति भावः ॥ १९ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

र्था अपि स्युः। एकः पाक इत्यत्र "एकस्य सकृच्च" द्वौ पाकौ, त्रयः, चत्वार इत्यत्र "द्वित्रिचतुर्भ्यः सुच्" पञ्चेत्यत्र कृत्वसुच् स्यात्। तथा च सकृत्पाकः, द्विस्त्रिश्चतुः पाका इत्याद्यापत्तिरिति चेदिष्टापत्तिः। "द्विर्वचनम्" इत्यादिदर्शनात्। अतिप्रसङ्गस्त्वनभिधानात्* नेत्याह–अतीति। "न हि वचिरन्तिपरः प्रयुज्यते" इत्याद्यभियुक्तरीत्या समाधेयमिति भावः।

केचित्तु "क्रियाभ्यावृत्तिगणने" इत्यत्र क्रियाग्रहणं व्यर्थम्। तस्या एवाभ्यावृत्तिसंभवेन सामर्थ्यात्तल्लाभात्। तथा च साध्यमात्रस्वभावक्रियालाभाय तदिति वाच्यम्। न च पाक इत्यादौ तादृशीति नातिप्रसङ्गः। द्विर्वचनमिति च द्विःप्रयोगो द्विर्वचनमिति व्युत्पत्त्या "द्विर्वचनेऽचि" इति ज्ञापकं वाऽऽश्रित्योपपादनीयमित्याहुः* ॥ २० ॥

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां* बोधादाश्यकीति धातोरेव भावना वाच्या नाऽऽख्यातस्येति कथं निर्णय इत्याशङ्कां समाधत्ते—

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।
साधुत्वं तदभावेऽपि बोधो नेह निवार्यते ॥ २१ ॥

भेद्यं विशेष्यं, भेदकं विशेषणं, तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं*साधुत्वम्। अयमर्थः—व्याकरणस्मृतिः शब्दसाधुत्वपरा, तत्रैवावच्छेदकतया कल्प्यमानधर्मस्य शक्तित्वं वदतां मीमांसकानां पुनः

---

*अनभिधानादिति। 'सकृत् पाकः' इत्यादिप्रयोगैः पचिक्रियाजन्मगणनाप्रतीत्यभावादित्यर्थः। "द्वौ पाकावित्यत्र कस्मान्न भवति। नैतत्क्रियागणनम्" इत्यादिना "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" इति सूत्रे भाष्ये स्पष्टमेतत्।

*इत्याहुरिति। "द्विर्वचने" इति निर्देशेन तस्य साधुत्वबोधनेऽपि भावार्थकक्रियावृत्तिर्द्विःप्रयोग इत्यादीनामनिर्वाहोऽत्रारुचिरिति बोध्यम् ॥ २० ॥

*आख्यातशक्तिग्रहवतामिति। आख्याते—तिबादिप्रत्यये शाक्तः—भावनारूपार्थनिरूपिता शक्तिः तस्या ग्रहो—ज्ञानं तद्वतां मीमांसकानामित्यर्थः। तन्निबन्धनमिति। जातिप्रवृत्तिनिमित्तको अस्वशब्दस्तुरगेऽसाधुर्धनराहित्यप्रवृत्तिनिमित्त

---

१. तत्रैवेति—साधुशब्दे एव न त्वसाधुशब्दे। ६. अवच्छेदकतयेति—बोधजनक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्तत्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णये शक्तिनिर्णय उच्यते । *अतिरिक्तशक्तिवादेऽपि आख्यातानामसाधुता भावनायां स्यादेव* । तथा च चतुर्थ्यर्थे तृतीयाप्रयोगवद्धात्वर्थभावनायामाख्यातप्रयोगे याज्ञे कर्मण्यसाधुशब्दप्रयोगात् "नानृतं वदेत्" इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं दर्शनान्तरीयव्युत्पत्तिमतां स्यादिति ।

कस्तु साधुः । एवमश्वत्वजातिप्रवृत्तिनिमित्तको अश्वशब्दस्तुरगे साधुर्धनराहित्यप्रवृत्तिनिमित्तकोऽसाधुरिति भावः । एवञ्च व्याकरणशास्त्रेण यस्य यस्मिन्नर्थे साधुत्वमभिहितं तत्रैव तस्य साधुत्वमिति फलितम् ।

ननु व्याकरणस्मृतेः "अथ शब्दानुशासनम्" इति भाष्यात् 'शब्दशास्त्रम्' इत्यभियुक्तव्यवहाराच्च साधुत्वमात्राख्यायकत्वेन तेन शक्तिनिर्णयो दुर्वच इत्यत आह—*अयमर्थ इति । वक्ष्यमाणोऽर्थ इत्यर्थः । साधुशब्देभ्य एव बोधाङ्गीकारेण शक्तेः साधुशब्दमात्रवृत्तितया जात्यखण्डोपाध्यतिरिक्तानां सावच्छिन्नत्वनियमाद् बोधजनकताशक्तेरपि तत्त्वेन तदवच्छेदकत्वं साधुत्वमेव इति तदेव शक्तित्वमिति व्याकरणस्य साधुत्वमात्राख्यायकत्वेऽपि शक्तिनिर्णायकत्वमपि सिद्धम् । एवञ्च "लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रस्य कर्त्तरि कर्मणि वा लकारविधायकस्य विरोधेन भावनाभिप्रायेण तिङ्प्रयोगस्यासाधुत्वात्तत्र न तस्य शक्तिरिति तात्पर्यम् ।

अतिरिक्तशक्तिवादेऽपीति । साधुत्वातिरिक्ता शक्तिः—इच्छाविशेषः, पदार्थान्तरं वा इति शक्तिवादेऽपीत्यर्थः । **स्यादेवेति ।** तन्मते व्याकरणस्य साधुत्वमात्रनिर्णायकत्वेऽपि अर्थविशेषनिबन्धनमेव तेषां शब्दानां पूर्वोक्तरीत्या साधुत्वमिति भावनाभिप्रायेणाऽऽख्यातानां साधुत्वस्यालाभात् ।

नन्वेवंविधः शब्दो यद्यसाधुस्तर्हि तो बोधो न स्यात् , शाब्दबोधं प्रति साधुत्वज्ञानस्य कारणत्वात् तदभावनिश्चयस्य च प्रतिबन्धकत्वात् ; इति चेन्न, वस्तुतोऽसाधुत्वेऽपि कारणीभूतसाधुत्वज्ञानसम्भवादित्यभिप्रेत्याह कारिकायां—**बोधो नेहेति** ।

तावच्छेदकतयेत्यर्थः । अयं भावः—साधुशब्देष्वेव शक्तिरिति मते साधव एव शब्दाः शक्ताः इति बोधकतारूपा शक्तता (शक्तिः) साधुशब्देषु, तदवच्छेदकता तन्निष्ठसाधुत्वे, तस्याऽन्यूनानतिरिक्तवृत्तित्वात् ।

१. तद्रीत्येति—मीमांसकरीत्येत्यर्थः । २. साधुत्वनिर्णये एवेति—एवं च व्याकरणस्य शक्तिनिर्णायकत्वं निर्विवादमिति लः कर्मणीति सूत्रविरोधाद् भावनाभिप्रायेण तिङ्प्रयोगोऽसाधुरेवेति तत्त्वम् । ३. ननु असाधुशब्दादपि बोधदर्शनात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु त्वन्मते नानृतमिति निषेधः क्रत्वर्थ एव न सिध्येत्। आख्यातेन कर्तुरुक्तत्वाच्छ्रुत्या पुरुषार्थतैव स्यात्। प्रकरणाद्धि क्रत्वर्थता, तच्च श्रुतिविरोधे बाध्यते इति चेन्न। "तिङर्थस्तु विशेषणम्" इत्यनेन परिहृतत्वात्। *न हि गुणभूतः कर्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्। *भावना तु प्रधानं तं ग्रहीतुं समर्थेति प्रकरणात् क्रत्वर्थतैव। *अस्तु वा

बोधोऽस्तु नाम, असाधुत्वं तु स्यादेवेत्यर्थः। अत एव 'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः" इति भाष्यं सङ्गच्छते। वस्तुतः साधुत्वज्ञानस्य शाब्दबोधकारणत्वाभावात् तदभावनिश्चयस्य तत्प्रतिबन्धकत्वाभावाच्चेति 'असाधुरनुमानेन' इत्यत्र स्पष्टम्।

बाध्यते इति। "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" (जै० ३-३-१४) इति न्यायेन प्रकरणात् श्रुतेर्बलवत्त्वबोधनात्। किञ्च सर्वत्रैव यो यदर्थं प्रवृत्तः सन् निवार्यते, स तदर्थमेव प्रतिषेधो भवति। आख्यातस्य कर्त्रर्थत्वे च पदश्रुत्याऽनृतवदननिषेधः पुरुषार्थ एव स्यात्। ततश्चानृतवदनप्रयुक्तक्रतुवैगुण्यवारणार्थं प्रायश्चित्तानुष्ठानादिसकलयाज्ञिकमीमांसकादिशिष्टाचारविरोधः स्यादिति भावः।

ननु तिङर्थस्य विशेषणत्वेऽपि तस्य श्रुत्यर्थत्वानपायात् कथं निषेधस्य न पुरुषार्थत्वमतस्तदुपपादयति—न हि गुण इति। गुणप्रधानसन्निधौ प्रधाननिरूपिताङ्गत्वस्यैव न्याय्यत्वात्। विशेषणेऽङ्गसम्बन्धे तु तदपेक्षं प्राधान्यं, विशेष्यापेक्षमप्राधान्यञ्च विशेषणे स्यादिति विरुद्धद्वयापत्तेश्च। अत एव "सोमेन यजेत" इति वाक्ये सोमस्य यागे करणत्वेनान्वयो निराकृतो मीमांसकैः। भावना त्विति। विशेषणत्वेनेतरान्वितस्यान्यत्र विशेषणतयाऽन्वयासम्भवेऽपि तिङर्थं प्रति विशेष्यायास्तस्या नञर्थे विशेषणतयाऽन्वयो नानुपपन्न इति सा ग्रहीतुं समर्थेति भावः। एवं च भावनायाः कैमर्थ्याकाङ्क्षाप्रकरणात् सिद्धं क्रत्वर्थत्वमिति। श्रुतेः प्रकरणापेक्षया प्राबल्यं तु यत्र श्रुतिप्रकरणयोरुभयोरङ्गत्वसंग्राहकत्वासम्भवस्तत्रैवेति तात्पर्यम्।

नन्वेवं 'मा हिंस्यात् सर्वा भूतानि" "न कलञ्जं भक्षयेत्" इत्यादावपि तिङर्थस्य कर्तुरप्राधान्येनोक्तरीत्या निषेधस्य पुरुषार्थत्वं न स्यात्। अत आह—अस्तु वेति। क्रतुयुक्तपुरुषधर्म इत्यस्य श्रुतिप्रकरणोभाभ्यामिति शेषः।

ननु प्रकरणाच्छ्रुतिं कल्पयित्वा ततो विनियोगः कार्य इति प्रथमत एव श्रुत्या

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रतुयुक्तपुरुषधर्मः, अनुष्ठाने विशेषाभावात् । *"जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू" इति वाक्योक्तमन्त्रविधिवदित्यादि भूषणे प्रपञ्चितम् ।

नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तद्बोधो न स्यात्साधुत्वज्ञानस्य शाब्दबोधे हेतुत्वादित्यत आह—बोध इति । असाधुत्वेऽपि साधुत्वभ्रमाद् बोधोऽस्तु नाम, अपभ्रंशवत् । असाधुत्वं तु स्यादेवेति भावः । वस्तुतः साधुत्वज्ञानं न हेतुस्तद्व्यतिरेकनिर्णयोऽपि न प्रतिबन्धक इति "असाधुरनुमानेन" इत्यत्र वक्ष्यामः ॥ २१ ॥

रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्मिते ।
पूर्णो भूषणसारेऽस्मिन् धात्वाख्यातार्थनिर्णयः ॥ १ ॥

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे धात्वर्थाख्यातसामान्यार्थनिर्णयः समाप्तः ॥

पुरुषार्थत्वनिर्णये न क्रत्वर्थत्वसम्भवः, आकाङ्क्षाविरहेण प्रकरणस्याप्रसरादित्यत आह—जञ्जभ्यमान इति । तृतीयाध्याये हि—"प्राणो वै दक्षः । अपानः क्रतुः । तस्माज्जञ्जभ्यमानोऽनुब्रूयात्—मयि दक्षक्रतू इति, प्राणापानावेवात्मन्यधत्त" इत्यत्र शानचा कर्तुरभिधानात् समभिव्याहारात्मकवाक्येन प्रकरणं भङ्क्त्वा विपरिणतवाक्यशेषावगतप्राणापानधारणादिरूपफलविशिष्टपुरुषार्थतया मन्त्रविधिरिति पूर्वपक्षे कृतावपि जञ्जभ्यमानपुरुषसम्भवेन वाक्यप्रकरणयोर्विरोधाभावे सत्युभाभ्यामपि प्रमाणाभ्यां क्रतुयुक्तपुरुषार्थत्वमुक्तमन्त्रस्येति सिद्धान्तितं जैमिनिना (जै० ३-४-२०) । एवं च यत्र प्रमाणानां विरोधस्तत्रैव प्रबलदुर्बलचिन्ता नान्यत्रेति प्रकृतेऽपि अनृतवदननिषेधस्याविरुद्धाभ्यां श्रुतिप्रकरणाभ्यां क्रतुयुक्तपुरुषार्थत्वमेवेति तिङः कर्तृकर्मार्थकत्वेऽपि न दोष इति दिक् ॥ २१ ॥

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां
धात्वाख्यातार्थसामान्यनिर्णयः ।

साधुत्वं न शक्तिरत आह—अतिरिक्तेति—साधुत्वातिरिक्तेत्यर्थः ॥ २१ ॥

इति धात्वाख्यातार्थनिर्णयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ लकारार्थनिर्णयः ।

अथ प्रत्येकं दशलकाराणामर्थं निरूपयति—

वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति ।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ॥ १ ॥(२२)

लडादयश्चितः षट् क्रमेणैष्वर्थेषु द्रष्टव्याः । तथा हि—वर्तमानेऽर्थे लट् "वर्तमाने लट्" इति सूत्रात् *प्रारब्धापरिसमाप्तत्वं, *भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम् । पचतीत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तद् अस्तीति भवति लट्प्रयोगः ।

प्रारब्धापरिसमाप्तत्वमिति । प्रारब्धा वासावपरिसमाप्ता च या क्रिया तदधिकरणत्वोपलक्षितकालत्वमित्यर्थः, वर्तमानत्वस्य कालगतत्वेन सर्वानुभवसिद्धत्वात् । अत एव 'आख्यातार्थः कालः' इति प्रवादः सङ्गच्छते । काष्ठप्रज्वालनादिकतिपयव्यापारोत्तरमधःश्रयणप्राक्कालिकव्यापारबोधनाभिप्रायेण पचतीति प्रयोगो न तु तत प्राक् तदनन्तर वेति बोध्यम् । नन्वेवं ह्यो दशवादनमारभ्य द्विवादनपर्यन्तं जातपाकगतद्वादशवादनकालिकपचिक्रियाबोधनतात्पर्येणाद्यापि 'पचति' इति प्रयोगापत्तिः, इत्यत आह—भूतभविष्यद्भिन्नत्वमिति । वस्तुतस्तु वर्तमानभविष्यद्भिन्नत्वं भूतत्वमित्याद्यपि वक्तुं शक्यम्, विनिगमनाविरहात् । तथा च भूतादिभेदघटितं वर्तमानत्वं न वक्तव्यं किन्तु भूतत्ववद् तदघटितमेवेति । किञ्च वर्तमानध्वंसप्रतियोगित्वं भूतत्वमिति भूतत्वशरीरे वर्तमानत्वप्रवेशेन तच्छरीरे च भूतत्वप्रवेशेनान्योन्याश्रय इति प्रारब्धापरिसमाप्तत्वमेव लक्षणं साधु । न च प्रागुक्तदोषापत्तिरस्मिन् लक्षणे इति वाच्यम्, प्रारब्धापरिसमाप्तत्वस्य काले विशेषणत्वाश्रयणेन प्रयोगकालैकैतादृशक्रियाधिकरणत्वाभावेनादोषात् । एवं च प्रयोगविशिष्टत्वं वर्तमानत्वम् ।

---

१. यद् यन्निरूपणानन्तरं निरूपणीयं भवति तत् तन्निरूपितसङ्गतिमद् भवति अन्यथोन्मत्तप्रलपितवदसङ्गतनिरूपणस्योपेक्षणीयतापत्तेरिति प्रकृते 'आश्रये तु तिङः स्मृताः' इत्यनेन पूर्वप्रकरणे लकारसामान्यस्यार्थे निरूपिते सति 'निर्विशेषं न सामान्यम्' इति नियमेन लकारविशेषाः कति, तेषामर्थाश्च के इति जिज्ञासायाः स्वत एवोदयेन प्रसङ्गोपोद्घातादिषड्विधसङ्गतिमध्ये स्मृतत्वे सत्युपेक्षाऽनर्हत्वरूपप्रसङ्गसङ्गत्याऽऽह—प्रत्येकमिति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वैशिष्ट्यञ्च स्वाधिकरणत्वं—स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूतक्रियाप्रतियोगिकप्रागभावानधिकरणत्वं—स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूतक्रियाप्रतियोगिकध्वंसानधिकरणत्वमेतत्त्रितयसम्बन्धेनेति फलितम्। तथा चातीतक्रियाप्रतियोगिकप्रागभावध्वंसानधिकरणतादृशद्वादशचादनकाले प्रयोगाधिकरणत्वाभावात् प्रयोगाधिकरणकाले च क्रियाप्रतियोगिकध्वंसाधिकरणत्वान्नातिव्याप्तिः।

नन्वेवमपि अनेकव्यापाररूपत्वेन पचिक्रियायास्तन्मध्यवर्त्तिक्रियाऽधिकरणकाले तत्प्राग्वर्त्तिक्रियाध्वंसवत्त्वेन तदुत्तरवर्त्तिक्रियाप्रागभाववत्त्वेन चाव्याप्तिः। यदि तद्वारणाय क्रियायां यावत्त्वं विशेष्यते तथापि 'देवदत्तो भोक्तुं पचति' इतिप्रयोगाधिकरणकाले भुजधात्वर्थभोजनक्रियाया अपि प्रकृतप्रयोगजन्यबोधविषयत्वेन तत्प्रागभावस्यैव सत्त्वादव्याप्तिस्तदवस्थैवेति चेन्न।

प्रागभावे ध्वंसासमानाधिकरणेति, ध्वंसे च प्रागभावासमानाधिकरणेति विशेषणदानेनादोषात्। तथा हि—तत्प्राग्वर्तिनष्टकतिपयक्रियाध्वंससामानाधिकरण्यमेव तदुत्तरवर्तिक्रियाप्रागभावे, एवं तदुत्तरक्रियाप्रागभावसामानाधिकरण्यमेव तत्प्राग्वर्त्तिक्रियाध्वंसे इति स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूतक्रियाप्रतियोगिकः प्रागभावस्तदुत्तरवर्त्तिक्रियाप्रतियोगिको ग्रहीतुमशक्यः, एवं तादृशध्वंसोऽपि तत्प्राग्वर्त्तिक्रियाप्रतियोगिको ग्रहीतुमशक्य इति अन्त्यक्रियाध्वंस एव, आद्यक्रियाप्रागभाव एव तादृश इति तदनधिकरणत्वमेव तत्र, न तु तदधिकरणत्वमिति न दोषः।

नन्वेवमपि देवदत्तोऽपाक्षीत् यज्ञदत्तश्च पक्ष्यति इति देवदत्तसमवेतक्रियासमाप्ति—यज्ञदत्तक्रियारम्भाऽन्तरालिकसमये 'विष्णुमित्रो गच्छति' इति प्रयोगानापत्तिः, तत्र काले प्रयोगो 'विष्णुमित्रो गच्छति' इति तदधिकरणत्वस्य सत्त्वेऽपि प्रयोगजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूता क्रिया देवदत्तनिष्ठा पचिक्रिया तत्प्रतियोगिकप्रागभावसमानाधिकरणध्वंसाधिकरणत्वम्, एवं स्वजन्यबोधविषयत्वप्रकारकतात्पर्यविषयीभूता क्रिया यज्ञदत्तनिष्ठा पचिक्रिया तत्प्रतियोगिकध्वंससमानाधिकरणप्रागभावाधिकरणत्वमपि तत्रेति निरुक्तवर्तमानलक्षणासत्त्वादिति चेन्न।

धातुविशिष्टत्वं तत्त्वमिति स्वीकारेणादोषात् वैशिष्ट्यं च स्वप्रयोगाधिकरणत्वं—स्ववाच्ययावद्व्यापारप्रतियोगिकप्रागभावकूटानधिकरणत्वं—स्ववाच्ययावद्व्यापारप्रतियोगिकध्वंसकूटानधिकरणत्वमेतत्त्रितयसम्बन्धेन। तथा च प्रकृते गम्धातोर्लटो विवक्षितत्वेन धातुपदेन तस्यैव ग्रहणे तद्वाच्ययावद्व्यापारप्रागभावानधिकरणत्वं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*आत्माऽस्ति पर्वताः सन्तीत्यादौ तत्तत्कालिकानां राज्ञां[1] क्रियाया अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिकमादाय वर्तमानत्वमूह्यम् । उक्तं च भाष्ये-"इह भूतभविष्यद्वर्तमानानां राज्ञां क्रिया*स्तिष्ठतेरधिकरणम्" इति।

*परतो भिद्यते सर्वमात्मा तु न विकम्पते ।
पर्वतादिस्थितिस्तस्मात्पररूपेण[2] भिद्यते ॥

धात्वन्तरवाच्यव्यापारप्रागभावसत्त्वेऽप्यक्षतमेव । एवं तद्वाच्ययावद्व्यापारध्वंसकूट्यनधिकरणत्वमप्यक्षतमेवेति न दोषः । पचिक्रियारम्भप्राक्क्षणेऽतिव्याप्तिनिरासाय द्वितीयसम्बन्धः । पचिक्रियासमाप्त्यनन्तरक्षणे तद्वारणाय तृतीयसम्बन्धः । विस्तरस्तु व्युत्पत्तिवादटिप्पणे द्रष्टव्यः ।

ननूक्तलक्षणे आत्मादिवृत्तिक्रियाणां नित्यत्वेन तदीयध्वंसप्रागभावानामप्रसिद्धतया तदधिकरणत्वाभावस्याप्यप्रसिद्धतया तत्र सन्तीत्यादिप्रयोगानापत्तिरित्यत आह- **आत्माऽस्ति पर्वताः सन्ति इत्यादाविति ।** तदीयसत्ताया नित्यत्वेन तद्ध्वंसप्रागभावयोरप्रसिद्धत्वेऽपि तदानीन्तनराजादिनिष्ठक्रियाध्वंसप्रागभावयोः प्रसिद्धत्वेन तादृशध्वंसप्रागभावाधिकरणत्वाभावस्य ग्रहीतुं शक्यत्वान्न दोष इति भावः ।

तिष्ठतेरधिकरणमिति । अत्र कैयटः 'तत्र राज्ञां स्थितिर्भूतादिभेदेन भिन्ना पर्वतादिस्थित्यादेर्भेदिकेति क्रियारूपत्वं, कालत्रययोगश्चोपपद्यते' इति । अन्यथा पर्वतादिस्थितीनां सदृशावयवत्वात् पूर्वापरीभूतावयवसमूहत्वरूपक्रियात्वानुपपत्तिः । एवं तासां दुरवधारभेदतया कालभेदानुपपत्तिश्च स्यादिति भावः ।

परतो भिद्यते इति । सर्वं—स्वात्मसत्तादिकं सर्वम् । परतो भिद्यते—परत एव भिद्यते । भेदे स्वादधिकं स्वातिरिक्तमेव । आत्मा तु—स्वस्वरूपं तु । न विकम्पते—स्वतोऽभेदवान् भवतीत्यर्थः ।

---

१. राज्ञां क्रियाया इति—राज्ञामित्युपलक्षणमन्येषामपि, एवं च यस्य कस्यचिद्देवदत्तादेः शरीरावच्छिन्नस्य सत्तादिक्रियामादाय आत्माऽस्तीत्यादयः प्रयोगाः। अन्यथाऽऽत्मनो नित्यत्वेन तदीयसत्ताया अपि नित्यत्वेन च तत्राऽवयवभेदाभावेन अवयवीभूतव्यापारसमूहरूपक्रियात्वासम्भवेनोक्तप्रयोगासङ्गतिरेव स्यात् । पर्वताः सन्तीत्यादावपि राज्ञां सत्तया प्रयोगो निर्वाह्यो यथा रामराज्ये इमे विन्ध्यादिपर्वता आसन्निति प्रयोगो रामस्य भूतकालिकसत्तामादाय एवमेव वर्तमनस्य राज्ञः क्रियया 'सन्तीति, भविष्याणां राज्ञां क्रियया भविष्यन्तीति प्रयोगः । २. पररूपेणेति—परस्य राजादिसमवेतक्रियारूपार्थस्य, रूपं तद्गतो धर्मो वर्तमानत्वादि तेनेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति वाक्यपदीये च ।

एवं "*तम आसीत्" "तुच्छेनाभ्व्यपिहितं यदासीत्" "अहमेकः प्रथममासं, वर्तामि च, भविष्यामि च" इत्यादिश्रुतयोऽपि योज्याः । तच्च वर्तमानत्वादि लडादिभिर्द्योत्यते, क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां लडादेस्तात्पर्यग्राहकत्वेनोपयोगात् । अन्वयव्यतिरेकाभ्यां तद्रूपं लडादिवाच्यमेव । अन्यथा प्रत्ययानां वाचकत्वविलोपापत्तिरित्यपि पक्षान्तरम् ।

लिडर्थमाह—परोक्ष इति । "परोक्षे लिट्" इति सूत्रात् । कालस्तावद् *अद्यतनानद्यतनभेदेन द्विविधः । द्विविधोऽपि भूतभविष्यद्रूपः । तत्रानद्यतने भूते परोक्षे लिडित्यर्थः । तेनाद्यतने भूते, अनद्यतने भविष्यति, भूतेऽप्यपरोक्षे च न लिट्प्रयोगः । परोक्षत्वं च साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वम् । न च "क्रिया नामेयमत्यन्तापरदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्" इति भाष्यात् तस्या अतीन्द्रियत्वेन परोक्षे इत्यव्यावर्त्तकमिति शङ्क्यम्, पिण्डीभूताया निदर्शयितुमशक्यत्वेऽप्यवयवशः साक्षात्करोमीतिप्रतीतिविषयत्वसंभवात् । अन्यथा 'पश्य मृगो धावति' इत्यत्र तस्या दर्शनकर्मता न स्यादिति प्रतिभाति* । *व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं

तम आसीदिति । तमः—अज्ञानम् । एवं च तस्यापि नित्यत्वेन तदीयक्रियाधारकालस्य भूतत्वमुक्तरीत्यैव निर्वाह्यम् ।

अद्यतनानद्यतनेति । तद्विभागश्च त्रेधा—अतीताया रात्रेः पश्चार्धेनाऽऽगामिन्याः पूर्वार्धेन च सहितोऽद्यतनस्तद्भिन्नोऽनद्यतन इत्येकः । अतीताया रात्रेरन्त्यतृतीयभागेन आगामिन्या आद्यभागतृतीयभागद्वयेन च सहितो दिवसोऽद्यतनः, तद्भिन्नोऽनद्यतन इति द्वितीयः । उदयादुदयं यावदद्यतनः, तद्भिन्नोऽनद्यतन इति तृतीयः । अत्र च तत्तद्देशाचारतो व्यवस्था ।

प्रतिभातीति । वस्तुतस्तु "पश्य मृगो धावति" इत्यत्र दृशेर्ज्ञानसामान्यार्थकत्वेन तत्र धावनक्रियाया अतीन्द्रियत्वमेव, शीघ्रं शीघ्रं देशान्तरसंयोगदर्शनेन च धावनस्यानुमितिविषयत्वात् । एवञ्चावयवशः साक्षात्कारविषयत्वमादाय परोक्ष इत्यस्य व्यावर्तकत्वोपपादनमप्रामाणिकमित्यरुचेराह—**व्यापाराविष्टानामिति** । भाष्येऽपि

---

१. तुच्छेनेति—अज्ञानेनेत्यर्थः । २ अभ्यपिहितमिति—आवृतमित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विवक्षितमतो नोक्तदोषः। 'अयं पपाच' इत्याद्यनुरोधाद्व्यापाराविष्टानामितीत्यपि वदन्ति। कथं तर्हि "व्यातेने किरणावलीमुदयनः" इति, स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत्? असंगतमेव। व्यासङ्गादिना स्वव्यापारस्य *परोक्षत्वोपपादनेऽपि बहुतरमनःप्रणिधानसाध्यशास्त्रार्थनिर्णयजनकशब्दरचनात्मके ग्रन्थेऽनद्यतनत्वातीतत्वयोर्विस्तारक्रियायामसत्त्वेन अनद्यतनातीतत्वयोरभावेन तदर्थकलिडसंभवात्।

लुडर्थमाह—श्वोभाविनीति। अनद्यतने भाविनीत्यर्थः। "अनद्यतने लुट्" इति सूत्रात्। यथा श्वो भवितेत्यादौ।

लृडर्थमाह—भविष्यतीति। भविष्यत्सामान्य इत्यर्थः। "लृट् शेषे च" इति सूत्रात्। यथा घटो भविष्यतीत्यादौ। तत्त्वं च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम्।

लेटोऽर्थमाह—विध्यादाविति। "लिङर्थे लेट्" इति सूत्रात्। लिङर्थश्च विध्यादिरिति वक्ष्यते।

लोडर्थमाह—प्रार्थनादाविति। आदिना विध्याद्याशिषो गृह्यन्ते; "आशिषि लिङ्लोटौ" "लोट् च" इति सूत्राभ्यां तथाऽवगमात्। यथा 'भवतु ते शिवप्रसाद' इत्यादौ। एतयोरर्थौ लिङर्थ एव, त्रयाणां समानार्थत्वादिति तन्निर्णयेनैव निर्णयः॥ १॥

"एवं तर्हि साधनेषु परोक्षेषु" इत्येवोक्तम्। परोक्षत्वोपपादनेऽपीति। 'साक्षात्कृतम्' इत्येतादृशविषयताशालिज्ञानाविषयत्वमित्यङ्गीकारेण प्रकृते स्वकृतविस्तारस्य तदानीं 'साक्षात्करोमि' इत्येवं साक्षिभास्यत्वेऽपि व्यासङ्गादिदोषात् तदंशे संस्कारानुदयेन साक्षात्कृतत्वावच्छिन्नविषयताशालिज्ञानाविषयत्वस्य सुवचत्वादिति भावः॥१॥

---

१ तदर्थकेति—अत्र लिडसम्भवे परोक्षत्वाभावस्यानद्यतनत्वातीतत्वयोरभावस्य च हेतुत्वा। ननु "व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि" इति ग्रन्थेन परोक्षत्वमात्रोपपादितमेवेति चेन्न, अन्यत्रेत्यध्याहृत्य तस्य "बहु जगद पुरस्तात्तस्य मत्ता किलाहमित्यादिस्थलेषु" इत्यर्थं कृत्वा तद्ग्रन्थस्य योजनीयत्वात्, अन्यथा बहुतरमनः इत्यादिग्रन्थेन विरोधापत्तेः। एवं चान्यत्र व्यासङ्गादिना परोक्षत्वोपपादनेऽपि प्रकृते ईदृशशब्दरचनात्मके ग्रन्थे व्यासङ्गस्य वक्तुमशक्यतया परोक्षत्वाभावेन, अनद्यतनातीतत्वयोरभावेनेत्यस्याग्रे चकारमध्याहृत्य तयोरभावेन च लिडसम्भव इति ग्रन्थतत्त्वविदः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लङादिक्रमेण ङितामर्थमाह—

ह्यो भूते प्रेरणादौ च भूतमात्रे लुङादयः।

सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः ॥२॥(२३)

लङर्थमाह—ह्योभूत इति। अनद्यतने भूत इत्यर्थः, "अनद्यतने लङ्" इति सूत्रात्। यथा 'अस्य पुत्रोऽभवत्' इत्यादि।

लिङर्थमाह—प्रेरणादाविति। "विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्" इति सूत्रात्। तत्र विधिः—प्रेरणं, भृत्यादेर्निकृष्टस्य प्रवर्तनम्। निमन्त्रणं—नियोगकरणम्, आवश्यकप्रेरणेत्यर्थः। आमन्त्रणं—कामचारानुज्ञा। अधीष्टः—सत्कारपूर्वको व्यापारः। एतच्चतुष्टयानुगतप्रवर्तनात्वेन*वाच्यता लाघवात्।

उक्तं च—अस्तिप्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।

तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया॥

न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।

विध्यादीनामुपादानं चतुर्णामादितः कृतम्॥ इति।

प्रवर्तनात्वं च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्। तच्चेष्टसाधनत्वस्यास्तीति तदेव विध्यर्थः। यद्यप्येतत्कृतिसाध्यत्वस्यापि, तज्ज्ञानस्यापि प्रवर्तकत्वात्*, तथाऽपि यागादौ सर्वत्र तल्लोकत *एवावगम्यत

अधीष्ट इति। भावक्तान्तादर्शआद्यच्। तत्र भावक्तान्तस्य सत्कारोऽर्थः। तत्पूर्वको व्यापारश्च अच्प्रत्ययान्तार्थ इति बोध्यम्। अनुगतप्रवर्तनात्वेनेति। प्रवर्तनात्वेनैव ज्ञानस्य प्रवृत्तिं प्रति कारणत्वात् लोके पुरुषनिष्ठ आज्ञादिरूपोऽभिप्रायविशेष इव लिङ्श्रवणे 'अयं मां प्रवर्तयति' इतिप्रतीतिसाक्षिकं प्रवर्तनात्वं वेदे पुरुषाभावेऽपि शब्दव्यापारेऽक्षतमिति न लोकवेदयोरननुगम इति बोध्यम्।

प्रवर्तकत्वादिति। यद्यपि कृतिसाध्यत्वाभावनिश्चयस्य प्रवृत्तिं प्रति प्रतिबन्धकत्वाभ्युपगमे कृतिसाध्यताज्ञानस्य न तत्कारणत्वमिति, तथापि तत्र तादृशनिश्चयाभावस्य कारणत्वं प्रसज्यते एव, तथा च तस्य कारणत्वकल्पनापेक्षया कृतिसाध्यताज्ञानत्वेन कारणत्वे लाघवमिति भावः।

लोकत एवावगम्यते इति। यागः कृतिसाध्यः मत्कृतिसाध्यत्वविरोधिधर्माभाववत्त्वादित्यनुमानेनेति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यन्यलभ्यत्वान्न तच्छक्यम्। बलवदनिष्टाननुबन्धित्वज्ञानं च न हेतुः, द्वेषाभावेनान्यथासिद्धत्वात्, आस्तिककामुकस्य नरकसाधनताज्ञानदशायामभ्युत्कटेच्छया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च। तस्मादिष्टसाधनत्वमेव प्रवर्तना।

*उक्तं च मण्डनमिश्रैः—

*पुंसां नेष्टाभ्युपायत्वात्क्रियास्वन्यः प्रवर्तकः।

इष्टसाधनत्वमपि प्रेरणात्वेनैव शक्यं, न स्वरूपतः गुरुत्वात्। न च इष्टस्यान्यलभ्यत्वेन साधनत्वमात्रस्य शक्यत्वमस्तु इति वाच्यम्। तथा सति आख्यातत्वांशोपस्थितप्रवृत्त्या सह समानाभिधानश्रुत्या साधनत्वान्वयसम्भवे पदान्तरोपस्थापितस्वर्गादीष्टेन सह समभिव्याहाररूपवाक्येन तदन्वयासम्भवात् प्रवृत्तिसाधनत्वात्मके प्रेरणात्वे एव पर्यवसानेन प्रेरणात्वस्यैव तदर्थत्वात्। इष्टसाधनत्वं तु वाक्यार्थो न पदार्थः। तथा हि प्रवर्तनाविषयीभूतार्थभावना किं भावयेद् इति भाव्याकाङ्क्षायां समानपदोपात्तमपि धात्वर्थमपुरुषार्थत्वाद्भाव्यतयाऽन्वयायोग्यं विहाय भिन्नपदोपात्तमन्यविशेषणमपि स्वर्गं कामपदसम्बन्धात् पुरुषार्थतयाऽवगतं साध्यत्वान्वययोग्यं भाव्यत्वेनाश्रयति, अपुरुषार्थकर्मिकायास्तस्याः प्रवर्तनासाध्यत्वानुपपत्तेः। एवञ्च स्वर्गभावनासाधनत्वात्स्वर्गरूपेष्टसाधनत्वमपि प्रवर्तनायाः सिद्ध्यति पुरुषप्रवृत्तिरूपार्थभावना च यागव्यापारं विना स्वर्गं साधयितुं नालमिति यागस्य साधनत्वमाक्षिप्यते। न तु यागस्य स्वर्गसाधनत्वं वाक्यप्रमाणगम्यम्, यजधातोरकर्मकत्वेन तत्र द्वितीयान्तस्वर्गपदार्थस्य कर्मत्वेनान्वयायोगात्। तस्मात् फलसाधनत्वस्य प्रवर्तनात्वेनैव वाच्यतेति परे। तत्र मण्डनमिश्रसम्मतिमाह—उक्तमिति।

पुंसामिति। पुरुषाणां क्रियासु प्रवर्तक इष्टसाधनत्वादन्यो नास्ति। किन्तु इष्ट-

---

१. मधुविषसम्पृक्तान्नभोजनादौ प्रवृत्तिं वारयितुं बलवदनिष्टाजनकत्वज्ञानस्यापि प्रवृत्तिं प्रति कारणत्वं वाच्यं, तथा च तत्राऽपि लिङः शक्तिकल्पनाऽऽवश्यकीति प्राचीननैयायिकमतं दूषयति—बलवदिति। अननुबन्धित्वम् = अजनकत्वम्। २. ननु तस्य प्रवृत्तिं प्रत्यहेतुत्वे किं कारणमत आह—द्वेषाभावेनेति। अयंभावः—मधुविषसम्पृक्तान्नभोजनं द्विष्टसाधनमिति ज्ञानाद् द्वेषविषये प्रवृत्त्यभावाय "तद्विषयकप्रवृत्तिं प्रति तद्विषयकद्वेषः प्रतिबन्धक इति प्रतिबन्ध्यप्रतिबन्धकभाव आवश्यकस्तथा च कार्यत्वावच्छिन्नं प्रति प्रतिबन्धकाभावस्य कारणतेति रीत्या प्रवृत्तिं प्रति द्वेषस्य प्रतिबन्धकत्वेन तदभावस्य हेतुता सिद्धेति द्वेषाभावेनान्यथासिद्धत्वाच्च बलवदनिष्टाजनकत्वज्ञानस्य हेतुतेति तत्त्वम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम् ॥ इति ।

*प्रपञ्चितं चैतद्वैयाकरणभूषणे । आदिना "हेतुहेतुमतोर्लिङ्" "आशिषि लिङ्लोटौ" इतिसूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते । "यो

साधनत्वमेवेत्यर्थः । तस्य प्रवर्तनापदेन व्यवहारे साधकमाह—प्रवृत्तिहेतुमिति । प्रपूर्वकवृतुधातोर्हेतुमण्णिजन्ताद् भावे युचि निष्पन्नं प्रवर्तनापदं प्रवृत्तिप्रयोजकव्यापारपरमिति प्रवृत्तिप्रयोजकमिष्टसाधनत्वरूपं धर्मं प्रवर्तनां प्रवदन्ति इति कारिकार्थः ।

प्रपञ्चितमिति । कृतिसाध्यताज्ञानं न प्रवर्तकम् । कृत्यसाध्ये प्रवृत्त्यभावश्च तत इष्टाभावेन वृथाश्रमजनकत्वेन द्वेषात् । नातस्तच्छक्यम् । न च चिकीर्षानुरोधेन तच्छक्यमस्तु, लोकतस्तदवगमाच्चिकीर्षासम्भवात् । न चेष्टसाधनताज्ञानस्यापि प्रवर्तकत्वं न स्यात् अनिष्टसाधने उदासीने च 'कष्टं कर्म' इति न्यायेन वृथाश्रमजनकत्वेन द्वेषात् न प्रवृत्तिरिति वाच्यम्, इष्टाजनके आन्तरालिकश्रमे द्वेषाभावदशायामप्रवृत्तेः सर्वसिद्धाया अनुरोधेन तस्य प्रवर्तकत्वावश्यकत्वात् । किञ्चेष्टसाधनत्वम्—इच्छाविषयसाधनत्वं, तत्र शक्यत्वं स्वर्गादिसाधनत्वादिना तेन रूपेण ज्ञानस्यैव प्रवर्तकत्वात्, न त्विष्टत्वेन इच्छाज्ञानानपेक्षणात् तस्याः स्वरूपत एव हेतुत्वात् ।

यद्यपि लोके बलाद् गुरुप्रवर्तनया प्रवृत्तिस्थले किञ्चिदिष्टं ज्ञात्वा गुरुर्मां प्रवर्तयति इति ज्ञात्वैव प्रवर्तते, तथापि बहुवित्तव्ययायाससाध्य आमुष्मिके च विशिष्य तज्ज्ञानं विना न प्रवृत्तिरिति विशिष्यैव विधिना बोधनीयमिति विशिष्यैव तस्य शक्तिरुपेया । अत एव लोके फलसन्देहात् प्रवृत्तावप्येतादृशस्थले तन्निश्चयोऽपेक्ष्यते । तत्र चेच्छा तदादाविव शक्यतावच्छेदकानामनुगमिकेति न नानार्थत्वम् । एवञ्च स्वर्गादिसाधनत्वमनन्यलभ्यत्वाच्छक्यमेव । न चेदमपि स्वर्गकामादिपदसमभिव्याहाराल्लभ्यते इत्यन्यलभ्यमेवेति न तच्छक्यमिति वाच्यम्, कामान्तपदात् स्वर्गाद्युपस्थितावपि साधनत्वबोधाभावाद्, विश्वजिदादौ स्वर्गकामादिपदसमभिव्याहारस्याभावाच्च ।

नन्विष्टसाधनत्वस्य चन्द्रमण्डलादिसाधारणत्वात् तत्रापि प्रवृत्तिरिति चेन्न । अतीतकार्ये कार्यतासत्त्वेऽपि इदानीं कार्यताज्ञानाभावेन तव मतेऽप्रवृत्तिवद् ममेष्टसाधनताज्ञानाभावादप्रवृत्तेः ।

किञ्च नेष्टसाधनत्वादन्यत् कार्यम् । तथा हि—

कार्यता न च काचित् स्यादिष्टसाधनतां विना ।
कार्यं न हि क्रियाव्याप्यं निषिद्धस्य समत्वतः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*ब्राह्मणायावगुरेत्, तं शतेन यातयेत्" इति यथा।

न भविष्यत्क्रियाकार्यं स्रक्ष्यतीश इति ह्यपि।
कार्यं स्यान्नैव चाकर्तुमशक्यं कार्यमिष्यते ॥
साम्यादेव निषिद्धस्य तदिष्टं साधनं तथा।

अस्यार्थः। कार्यत्वविशिष्टबोधकत्वेनैव वाक्यपर्यवसानाद् वृद्धव्यवहारात्कार्यान्विते एव व्युत्पत्तेश्च सिद्धार्थानामबोधकत्वात् कथं वेदान्तैः शुद्धं ब्रह्म प्रतिपाद्यते इत्याशङ्कां निराकर्तुं तामेव निर्धारयति—कार्यता चेति। इष्टसाधनतामित्यत्र इष्टत्वं च विनेति शेषः। उपसंहारे तथाभिधानात्।

कार्यमिति। व्याप्यं जन्यम्। निषिद्धस्य—ब्रह्महननादेः क्रियाजन्यत्वेन समत्वान्नैतत् कार्यमित्यर्थः। नेदं मया कृतं वा क्रियते किं तु कार्यमिति व्यवहाराद् भविष्यत्क्रियाकार्यं क्रियानिष्ठं भविष्यत्त्वं वा कार्यमिति निराचष्टे—न भविष्यदिति।

स्रक्ष्यतीति। हिशब्दो हेतौ। यतः स्रक्ष्यतीत्यत्र सर्जनानुकूलक्रियाया भविष्यत्त्वेऽपि कार्यत्वाभाव इत्यर्थः। न चैतत्कार्यमेव, लिङ्वाच्यताङ्गीकारात्। "कृत्याश्च" इत्यवश्यकार्ये कृत्या भवन्ति। तच्चाकर्तुमशक्यमिति तदेव कार्यमिति निराचष्टे—कार्यमिति। परनारीगमनादेरकर्तुमशक्यत्वात्कार्यत्वापत्तिरत आह—साम्यादेवेति। तदिति। तस्मादित्यर्थः। इष्टं तत्साधनं च कार्यत्वमित्याह—इष्टमित्यादि। तथा चेष्टत्वस्येष्टसाधनत्वस्य च ब्रह्मण्यबाधात् कार्यत्वविशिष्टप्रतिपादकत्वेऽपि वेदान्तवाक्यानां न क्षतिरिति। स्पष्टश्चेदं न्यायसुधायाम्। एवञ्चेष्टसाधनत्वान्यकार्यत्वस्य निर्वक्तुमशक्यत्वाद् वाच्यत्वे मानाभावाच्च कृतिसाध्यत्वं न विध्यर्थ इति।

अथ मधुविषसंपृक्तान्नभोजनादौ प्रवृत्तिवारणाय बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवृत्त्यौपयिकतया शक्यत्वं स्यादिति चेन्न। बह्वायाससाध्ये प्रवृत्त्यनापत्तेः। तत्र बहुतरदुःखानामपि जायमानत्वात्, अल्पदुःखस्यापि कुतश्चिद्बलवत्त्वात्, अनुगतबलवत्त्वस्य दुर्वचत्वाच्च। तस्मात् तद्विषयको बलवान् द्वेषः स्वातन्त्र्येण प्रतिबन्धक इति न तत्कल्पनं युक्तम्। अत एवान्तरालिकश्रमे बलवद्द्वेषवान् न ज्योतिष्टोमादौ प्रवर्ततेऽन्यस्तु प्रवर्तत एवेति बृहद्वैयाकरणे स्पष्टमिति दिक्।

ब्राह्मणायावगुरेदिति। हननार्थं दण्डमुद्यच्छेदित्यर्थः। पत्ये शेते इतिवद् ब्राह्मणपदाच्चतुर्थी। प्रत्ययानां द्योतकतापक्षे कारकविशिष्टावगोरणक्रियाया हेतुहेतु-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लुङर्थमाह—भूतमात्र इति । भूतसामान्य इत्यर्थः, भूते इत्यधिकृत्य "लुङ्" इति सूत्रात् । अत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वम् । तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे घटोऽभूदिति प्रयोगः* । विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्त्याद्यनुकूलो व्यापार इति बोधः ।

अयमत्र संग्रहः । कालो द्विविधः—अद्यतनोऽनद्यतनश्च । आद्यस्त्रिविधः—भूतभविष्यद्वर्तमानभेदात्, अन्त्यो द्विविधः—भूतो भविष्यंश्च । तत्र वर्तमानत्वे ल_ । भूतत्वमात्रे लुङ् । भविष्यन्मात्रे लृट् । हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामनयोर्लृङ् । अनद्यतने भूते *तत्त्वेन विवक्षिते लङ् । तत्रैव परोक्षत्वविवक्षायां लिट् । तादृशे भविष्यति लुडिति द्रष्टव्यम् ।

लृङर्थमाह—सत्यामिति । क्रियाया अतिपत्तिरनिष्पत्तिस्तस्यां गम्यमानायाम् । *भूते भाविनि । हेतुहेतुमद्भावे सति लङित्यर्थः । "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" इति सूत्रात् । लिङो निमित्तं हेतुहेतुमद्भावादि । यथा 'सुवृष्टिश्चेदभविष्यत्, सुभिक्षमभविष्यत्' 'वह्निश्चेत्प्राज्वलिष्यद्, ओदनमपक्ष्यत्' इत्यादौ । अत्र वह्न्यभिन्नाश्रयकप्रज्वलनानुकूलव्यापाराभावप्रयुक्त ओदनाभिन्नाश्रयकविक्लित्त्यनुकूलव्यापाराभाव इति

मद्भावसम्बन्धेनान्वयो यादनक्रियायां बोध्यः । तत्पक्षे तादृशसम्बन्धान्वयबोधे तेषां तात्पर्यग्राहकत्वात् ।

प्रयोग इति । उपपद्यते इति शेषः ।

तत्त्वेनेति । अनद्यतनभूतत्वेनेत्यर्थः ।

भूते भाविनीति । ननु सुवृष्टिभवनसुभिक्षभवनयोः साधनवैकल्यान्नियतानुत्पत्तिं स्वयमवगत्यैवोक्तप्रयोगः प्रयुज्यते तत्र कथं भविष्यत्त्वं भूतत्वं वा ? सामग्रीसमवधाने एव हि सम्भावितोत्पत्तिकस्य भविष्यत्त्वम् । उत्पन्नस्यैव च सत्त्वादिकमपि भूतत्वमिति चेन्न । निषेधप्रतियोगित्वाय भविष्यत्त्वं भूतत्वं वाऽऽरोप्य तथा प्रयोगेण

---

१. ननु कालगतं भूतत्वं किमित्यत आह—विद्यमानेति । विद्यमानो यो ध्वंसस्तत्प्रतियोगित्वमिति । यथा घटोत्पत्त्यनुकूलक्रियाध्वस्तेति व्यवहारे ध्वंसप्रतियोगित्वं क्रियायां तदुपाधिकतया तदाश्रये कालेऽपि तत्त्वम् । अथवा घटोत्पत्तिजनकव्यापारकालो ध्वस्त इति ध्वंसमादाय काले एव तत्प्रतियोगित्वात्तत्र लक्षणसमन्वय इति बोध्यम् ।

२. सुवृष्टिरिति—अत्र सुवृष्टिभवनं हेतुः । सुभिक्षभवनं हेतुमद् (कार्यम्)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शाब्दबोध इति रीत्या द्रष्टव्यम्। अथ चार्थनिर्देश उपलक्षणम्। अर्थान्तरेऽपि बहुशो विधानदर्शनात्। प्रसिद्धत्वादेष्वेवार्थेषु शक्तिरन्यत्र लक्षणेति मतान्तररीत्या वोक्तम्। एतेषां क्रमनियामकश्चानुबन्धक्रम एव। अत एव पञ्चमो लकार इत्यनेन मीमांसकैर्लेड व्यवह्रियत इति दिक्॥ २॥ (२३)

इति श्रीकौण्डभट्टविरचिते वैयाकरणभूषणसारे
लकारविशेषार्थनिरूपणं समाप्तम्।

अथ सुबर्थनिर्णयः।

*सुबर्थमाह[1]—

आश्रयोऽवधिरुद्देश्यः संबन्धः शक्तिरेव वा।
यथायथं विभक्त्यर्थः सुपां कर्मेति भाष्यतः॥ १॥ (२४)

द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः। तथा हि—"कर्मणि द्वितीया"।

दोषाभावात्। एवञ्च लङ्स्थले भूतत्वाद्यभावनिश्चयसत्त्वेन तत्प्रकारकबोध आहार्यारोपात्मक एवेति बोध्यम्।

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां
लकारविशेषार्थनिर्णयः।

सुबर्थमाहेति। पदत्वप्रयोजकतिङर्थनिरूपणानन्तरं तत्प्रयोजकसुबर्थनिर्णयस्याऽऽवश्यकत्वमिति भावः।

वाहप्रहेतुहेतुमद्भावप्रयोजकाभ्यां द्वाभ्यामपि धातुभ्यां लृङ्।

---

१. अवसरसङ्गत्या नामार्थे निरूपणीये 'प्रकृतिप्रत्ययाविति नियमेन नामार्थं प्रति प्रधानत्वात् क्रियया आकाङ्क्षितत्वाच्च पूर्वं सुबर्थं निरूपयति—सुबर्थमाहेति। पदत्वप्रयोजकतिङर्थनिरूपणानन्तरं पदत्वप्रयोजक, सुबर्थनिरूपणे कार्यैक्यसङ्गतिरपि अत्र बोध्या।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तच्च कर्तुरीप्सिततमं *क्रियाजन्यफलाश्रय इत्यर्थः । *क्रियाजन्यफलवत्त्वेन कर्मण एव कर्तुरीप्सिततमत्वात् । "तथा युक्तं चानीप्सितम्" इत्यादिसंग्रहाच्चैवमेव युक्तम् । ईप्सितानीप्सितत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव तदुपयोगो न तु वाच्यकोटौ तत्प्रवेशः । तथा च क्रियाफलस्य धातुनैव लाभादनन्यलभ्य आश्रय एवार्थः । तच्च चाखण्डशक्तिरूप*मवच्छेदकम्[1] । ओदनं पचतीत्यत्र विक्लित्त्याश्रयत्वात्कर्मता ।

नन्वभिप्रेतवाचकेप्सितशब्दात्तमप्यतिशयिताभिप्रेत इत्येवार्थ इत्यभिप्रेत्याह—क्रियाजन्यफलाश्रय इति । तथा च ईप्सितशब्दः क्रियावाची न तु रूढ इति भावः । तेन पयसौदनं भुङ्क्ते इत्यादौ पयआदेरीप्सितत्वेऽपि प्रकृतधात्वर्थव्यापारजन्यगलविलाधः संयोगफलाश्रयत्वाभावेन न कर्मत्वम् ।

ननु सम्बन्धार्थकाद् आप्धातोः सन्नन्तात् "मतिबुद्धिपूजार्थेभ्यश्च" इति सूत्रेण कर्मणि क्ते ईप्सितशब्दः सिद्ध्यति । कर्तुरिति "क्तस्य च वर्तमाने" इति कर्तरि षष्ठी । तथा च कर्तुः समभिव्याहृतधात्वर्थव्यापाराश्रयस्याप्तुं सम्बन्धुमिष्टतमं कारकं कर्मसंज्ञमिति सूत्रार्थः । कर्तुः सम्बन्धश्च कर्तृपदार्थविशेषणीभूतक्रियाद्वारक एव ग्रहीतुमुचित उपस्थितत्वादिति । सम्बन्धश्चात्र क्रियाजन्यफलाश्रयत्वमिति । सन्नर्थ इच्छा क्तप्रत्ययार्थो विषयता "सविषयकधातुसमभिव्याहारे कर्मप्रत्ययार्थो विषयता" इति न्यायात् । तथा च फलाश्रयत्वप्रकारकेच्छाविषय इत्यर्थस्य लाभात् कथं क्रियाजन्यफलाश्रयमात्रमर्थ इत्यत आह—क्रियाजन्येति । कर्मण एव—तादृशफलाश्रयस्यैव । तथा च तादृशफलवत्त्वेन कर्तुरुद्देश्यत्वं तादृशसंज्ञायामेवोपयोगि, न तु वाच्यकोटौ तत्प्रवेश इति भावः । सम्बन्धस्वरूपे प्रयोज्यत्वनिवेशेन विभागाद्यनुकूलव्यापारानुकूलव्यापारार्थकत्वे पयआदेरप्यनेनैव कर्मत्वसिद्धिरिति "अकथितं च" इति सूत्रं न कर्तव्यं भवतीति शब्देन्दुशेखरे विस्तरः ।

अखण्डशक्तिरूपमिति । तेन निरूपकादिभेदेनाश्रयभेदेऽपि न शक्तिभेद इति शक्यतावच्छेदकाश्रयत्वस्यैकस्यैव सत्त्वादितिः भावः । शक्तेर्भेद एवेति सिद्धान्तपक्षे तु आश्रयतात्वेनाश्रयतानामनुगम इति बोध्यम् ।

---

१ अवच्छेदकमिति—द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः, तत्राश्रयत्वं यद्यपि भिन्नं भिन्नमेवेति तस्य घटत्वादिवदनुगमकत्वाभावेन शक्यतावच्छेदकत्वं न सम्भवति, तथापि तस्याखण्डशक्तिरूपत्वे (अखण्डोपाधिधर्मात्मकत्वे) अवच्छेदकत्वं निर्वहत्यतीति संक्षेपः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वटं करोतीत्यत्रोत्पत्त्याश्रयत्वात्। *उत्पत्तेर्धात्वर्थत्वात्। जानातीत्यत्राऽऽवरणभङ्गरूपज्ञाधात्वर्थफलाश्रयत्वात्। अतीतानागतादिपरोक्षस्थलेऽपि ज्ञानजन्यस्य तस्याऽऽवश्यकत्वात्। अन्यथा यथापूर्वं न जानामीत्यापत्तेः। *अतीतादेराश्रयता च विषयतया ज्ञानाश्रयताया नैयायिकानामिव *सत्कार्यवादसिद्धान्ताद्वोपपद्यत इति।

उक्तं च—

तिरोभावाभ्युपगमे भावानां सैव नास्तिता।
लब्धक्रमे तिरोभावे नश्यतीति प्रतीयते॥ इति

ननु चैत्रो ग्रामं गच्छतीत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यग्रामसंयोगरूपफलाश्रयत्वात्कर्मतापत्तौ चैत्रश्चैत्रं गच्छतीत्यापत्तिः, प्रयागतः काशीं गच्छति चैत्रे 'प्रयागं गच्छति' इत्यापत्तिश्च। क्रियाजन्यसंयोगस्य काश्यामिव *विभागस्य प्रयागेऽपि सत्त्वादिति चेन्न। ग्रामस्येव चैत्रस्यापि फलाश्रयत्वेऽपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया *बाधेन चैत्रश्चैत्रमिति प्रयोगासं-

---

उत्पत्तेर्धात्वादिति। यथा चैतत् तथोक्तं धात्वर्थनिर्णये इति तत एवावगन्तव्यम्। तस्येति। आवरणभङ्गस्येत्यर्थः। यथापूर्वं न जानामीत्यापत्तेरिति। यथापूर्वं जानामीति प्रयोगस्यानापत्तेरित्यर्थः। ज्ञानसमये घटादेरसत्त्वेन तत्र ज्ञानाश्रयत्वाभावादित्यर्थः। नन्वयं दोषो भवतामपि सम एवातीतघटे आवरणभङ्गाश्रयताया असत्त्वादित्यत आह—अतीतादेरिति। नैयायिकमतेऽतीतानागतयो विषयतया ज्ञानाश्रयताङ्गीकारवदस्माभिरपि व्यापारेण स्वाव्यवहितोत्तरकाले एवोत्पादितावरणभङ्गात्मकफलाश्रयताऽङ्गीक्रियते इति भावः।

ननु विषयतासत्त्वेऽपि अतीतादिघटे विषयतया ज्ञानाश्रयतासत्त्वे न मानमित्यरुचेराह—सत्कार्येति।

विभागस्येति। तस्यापि प्रकृतधात्वर्थक्रियाजन्यत्वादिति भावः। बाधेनेति।

---

१. सत्कार्यवादेति—"सदेव सोम्येदमग्र आसीत्" इत्यादिश्रुतिबलेनायं सत्कार्यवादः साङ्ख्यानामभिप्रेतः, तन्मते घटादिकं कार्यं सूक्ष्मरूपेण पूर्वमपि अवस्थितमेव, कारणीभूतसामग्रीसमवधानेन केवलं तस्याभिव्यक्तिरिति तत्त्वम्।

२. काशीं गच्छतीति—अत्र गच्छतीति शत्रन्तम्। चैत्रे प्रयागतः काशीं गच्छति सति, इत्यन्वययोजना।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवात् । द्वितीयोत्पत्तौ संज्ञाया एवं नियामकत्वात् ॐअन्यथा गमयति कृष्णं गोकुलमित्यत्रेव पाचयति कृष्णेनेत्यत्रापि ॐकृष्णपदाद् द्वितीयापत्तेः । ॐशाब्दबोधश्चैत्रश्चैत्रमित्यत्र स्यादिति चेन्न । तथा व्युत्पन्नानामिष्टापत्तेः । ॐउच्यतां वा प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणाश्रयोपस्थितिर्हेतुरिति कार्यकारणभावान्तरम् । प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः । प्रयागस्य कर्मत्वं तु संभावितमपि न । समभिव्याहृतधात्वर्थफलशालित्वस्यैव क्रियाजन्येत्यनेन विवक्षणस्योक्तप्रायत्वात्ॐ ।

आकडारीयत्वादिति बोध्यम् । **अन्यथा**—फलाश्रयत्वस्य द्वितीयोत्पत्तिप्रयोजकत्वे । **कृष्णपदादिति** । कृष्णस्य प्रयोजकवृत्तिप्रेरणजन्यविक्लित्त्यनुकूलव्यापाररूपफलाश्रयत्वादिति शेषः । णिजन्तधात्वर्थातिरिक्तव्यापारप्रयोज्यफलाश्रयत्वस्य तन्नियामकत्वाङ्गीकारे नायं दोष इति शङ्कानिवारणाय गमयति कृष्णमिति दृष्टान्ताभिधानम् । तथा चोक्तनियमाङ्गीकारेऽत्रापि द्वितीया न स्यादिति न तथा वक्तुं शक्यमिति बोध्यम् ।

ननु नोक्तस्थले द्वितीयान्तस्य साधुत्वमापादयामि किन्तु तादृशप्रयोगाच्छाब्दबोधमिति परिहरति—**शाब्दबोधइति** । चैत्रकर्तृकं चैत्रकर्मकं गमनमिति भावः । ननु तादृशवाक्यादुक्तः शाब्दबोधोऽनुभवविरुद्ध इत्यत आह—**उच्यतां वेति** ।

उक्तप्रायत्वादिति । सूत्रे तमप्प्रत्ययोपादानादिति शेषः । ईप्सितशब्दस्य फलाश्रयत्वेनेच्छोद्देश्यकतया ततो विहिततमप्प्रत्ययार्थातिशयस्य प्रकृत्यर्थेऽन्वये फलातिशयितत्वं प्रकृतधात्वर्थएवेति स्पष्टं "कर्तुरीप्सिततमं कर्म" इति सूत्रे कैयटे । तथा च प्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वं कर्मत्वमिति फलति । एवञ्च विभागस्य प्रकृतधात्वर्थगमिक्रियाजन्यत्वेऽपि गम्धात्वर्थत्वाभावेन न दोषः ।

वस्तुतस्तु 'प्रयागात् काशीं गच्छति' इत्यत्र नवीनमते प्रयागपदात् पञ्चम्युपपत्तये गम्धात्वादिसमभिव्याहारेऽपि "ध्रुवमपायेऽपादानम्" इति सूत्रे शब्देन्दुशेखरे विभागस्य धात्वर्थत्वाम्नानात्तस्य गम्धात्वर्थत्वेन प्रयागपदोत्तरं द्वितीयावारणं फले धात्वर्थत्वविशेषणदानेनायुक्तम् । किन्तु फलतावच्छेदकसम्बन्धेन फलाश्रयस्यैव कर्मत्वविवक्षणेन वारणीयमिति ।

अयं भावः । फलस्य व्यापारे स्वानुकूलत्वं—स्वेच्छाधीनेच्छाविषयत्वमेतद्-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नैयायिकास्त्वाद्यदोषवारणाय परसमवेतत्वं, द्वितीयदोषवारणाय धात्वर्थतावच्छेदकत्वं फले विशेषणं द्वितीयावाच्यमित्युपाददते। परसमवेतत्वं धात्वार्थक्रियायामन्वेति। तथैव कार्यकारणभावान्तरकल्पनात्। परत्वमपि द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते। तथा च चैत्रस्तण्डुलं पचतीत्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिशालित्वात्तण्डुलानां कर्मता। शाब्दबोधस्तु—तण्डुलसमवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतण्डुलान्यसमवेतक्रियाजनककृतिमांश्चैत्र इत्याहुः।

भयसम्बन्धेनान्वयः। तादृशसम्बन्धघटकेच्छीयविषयतावच्छेदकश्च सम्बन्धः फलतावच्छेदकः। तथा च तण्डुलं पचतीत्यादौ 'समवायेन विक्लित्त्याश्रयस्तण्डुलो भवतु' इत्याकारकेच्छायाः कर्तृनिष्ठत्वेन तादृशेच्छीयफलनिष्ठविषयतावच्छेदकत्वस्य समवाये एव सत्त्वेन तत्सम्बन्धेन फलाश्रयस्यैव कर्मत्वं न तु कालिकादिना फलाश्रयस्य। तत्सम्बन्धस्य निरुक्तेच्छीयविषयतावच्छेदकत्वाभावात्। एवं 'ग्रामाद्विभजते' इत्यादौ विभागसमानाधिकरणव्यापारार्थकविपूर्वकभजधातुयोगे ग्रामादेर्न कर्मत्वम्। तस्य प्रकृतधात्वर्थव्यापारप्रयोज्यविभागरूपफलाश्रयत्वेऽपि 'अनुयोगित्वेन विभागाश्रयोऽहं भवानि' इत्याकारकेच्छाया एव तत्र कर्तृनिष्ठायाः प्रतीयमानत्वेनानुयोगित्वस्यैवेच्छीयविषयतावच्छेदकत्वेन तेन सम्बन्धेन विभागरूपफलाश्रयत्वाभावात्। 'ग्रामं त्यजति' इत्यादौ 'त्यज्' धातुयोगे तु ग्रामादेः कर्मत्वं भवत्येव। तत्र 'त्यज्' धातुना कर्तृव्यापारव्यधिकरणविभागस्यैव प्रतीत्या 'प्रतियोगित्वेन विभागविशिष्टो ग्रामो भवतु' इत्याकारकेच्छाया एव तत्समभिव्याहारे प्रतीत्या च प्रतियोगित्वस्यैवेच्छीयविषयतावच्छेदकत्वेन तत्सम्बन्धेन फलाश्रयत्वस्य सत्त्वात् 'गम्' धातुस्थले च 'अनुयोगित्वेन ग्रामसंयोगाश्रयोऽहं भवानि' इतीच्छासत्त्वेनानुयोगित्वस्यैव फलतावच्छेदकत्वात्तेन सम्बन्धेन फलाश्रयत्वेन प्रयागस्यानुद्देश्यत्वान्न कर्मता। जन्यतावच्छेदकस्य वा फलतावच्छेदकसम्बन्धत्वमिति तु न युक्तम्, तथा सति 'ग्रामं त्यजति' 'ग्रामाद्विभजते' इत्यादौ समवायस्यैवाविशेषेण फलतावच्छेदकत्वादुभयत्रापि ग्रामादेः कर्मत्वापत्तेरिति दिक्।

---

१. ननु परसमवेतत्वस्य धात्वर्थक्रियायामन्वयेऽपि परत्वमन्यत्वं तच्च भेद इति तत्प्रतियोगी क इत्याकाङ्क्षा तिष्ठत्येवेत्यत आह—परत्वमपीति—तथा च चैत्रस्तण्डुलं पचतीत्यादौ द्वितीयाप्रकृत्यर्थभूततण्डुलस्य प्रतियोगित्वमेवं च तण्डुलान्यो यः कर्तृभूतचैत्रादिस्तत्समवेतो यो व्यापारस्तज्जन्येत्याद्यर्थः उक्तो मूले इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तन्न रोचयामहे । परसमवेतत्वादेः *गौरवेणावाच्यत्वात् । अतिप्रसङ्गः किं-द्वितीयायाः शाब्दबोधस्य वा । नाऽऽद्यस्तावत् । *वाच्यकथनेऽपि तत्तादवस्थ्यात् गमयति कृष्णं गोकुलमितिवत्पाचयति कृष्णं गोप इत्यापत्तेः, तण्डुलं पचति चैत्र इतिवत्तण्डुलं पच्यते स्वयमेवेत्यापत्तेश्च ।

गौरवेणेति । परसमवेतक्रियाजन्यफलाश्रयत्वमित्युक्तावपि चैत्रमैत्रोभयनिष्ठक्रियाजन्यसंयोगस्य द्वितीयाप्रकृत्यर्थमैत्रान्यचैत्रवृत्तिक्रियाजन्यत्वेन तादृशसंयोगाश्रयत्वात् "मैत्रो मैत्रं गच्छति" इति प्रयोगापत्तेस्तद्वारणाय द्वितीयाप्रकृत्यर्थविशिष्टफलाश्रयत्वं कर्मत्वमिति परिष्करणीयम् । वैशिष्ट्यं च स्वसमवेतक्रियाजन्यत्वाभाववत्वं स्वेतरसमवेतक्रियाजन्यत्वमित्युभयसम्बन्धेन । तथा च प्रकृते संयोगरूपफलस्योभयनिष्ठक्रियाजन्यत्वेन चैत्रवृत्तिसंयोगे स्वं द्वितायाप्रकृत्यर्थो मैत्रः तत्समवेता क्रिया गमनरूपा तज्जन्यत्वमेवेति स्वेतरचैत्रसमवेतक्रियाजन्यत्वसत्वेऽपि प्रथमसम्बन्धाभावेन न दोषः । द्वित्वादिना चैत्रभेदमादाय "चैत्रश्चैत्रं गच्छति" इति प्रयोगापत्तिरपि नास्ति । चैत्रसमवेतसंयोगे स्वं—द्वितीयाप्रकृत्यर्थश्चैत्रस्तदितरो द्वित्वादिना चैत्रभेदसत्वाच्चैत्र एव तद्वृत्तिक्रियाजन्यत्वेऽपि स्वसमवेतक्रियाजन्यत्वाभाववत्वस्यासत्वात् ।

"मल्लो मल्लं गच्छति" इति प्रयोगस्तु व्यक्तिभेदे भवत्येव । मल्लस्य तन्मल्लसमवेतक्रियाजन्यत्वाभाववत्वस्य तदितरो मल्लः कर्तृत्वेन निवक्षितस्तत्समवेतक्रियाजन्यत्वस्य च तन्मल्लनिष्ठसंयोगे सत्वेन द्वितीयाप्रकृत्यर्थविशिष्टफलाश्रयत्वात् । एवं च कर्मलक्षणे परत्वस्य तल्लक्षणे इतरत्वस्य च निवेशाद् गौरवं स्पष्टमेव ।

एव प्रयागतः काशीं गच्छति चैत्रे 'चैत्रः प्रयागं गच्छति' इति प्रयोगस्य फले धात्वर्थत्वविशेषणमात्रेण फलतावच्छेदकसम्बन्धेन फलाश्रयस्य कर्मत्वविवक्षणमात्रेणैव वा वारणे धात्वर्थतावच्छेदकपर्यन्तानुधावने गौरवमिति ।

परोक्तनिवेशे गौरवमुपपाद्य तदसम्भवमपि निराक्रियमाणदोषतादवस्थ्येनाह—वाच्यकथनेऽपीति । परसमवेतत्वधात्वर्थतावच्छेदकत्वयोर्वाच्यत्वकथनेऽपीत्यर्थः । द्वितीयोत्पत्तौ कर्मसंज्ञाया एव निमित्तत्वात् कर्मसंज्ञायाश्च "कर्तुरीप्सिततमम्" इति सूत्रेण कर्तृवृत्तिव्यापारजन्यफलाश्रयमात्रस्यैव विधानेन चैत्रवृत्तिव्यापारजन्यफलस्य संयोगस्य विभागस्य च चैत्रे प्रयागे च सत्वेन द्वितीयावारणस्य कर्तुमशक्यत्वात् । परसमवेतक्रियाजन्यधात्वर्थतावच्छेदकफलाश्रयत्वरूपमेव कर्मत्वं द्वितीयोत्पत्तौ निमित्त-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूपधात्वर्थाश्रयत्वात् । शाब्दबोधातिप्रसङ्गोऽप्युक्तरीत्यैव निरस्तः । परसमवेतत्वस्य शक्यत्वेऽपि परत्वस्य चेष्टान्वयलाभायानेकशः कार्यकारणभावाभ्युपगमे गौरवतरत्वादिति स्पष्टं भूषणे ।

एतच्च सप्तविधम्—

"निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम् ।
तच्चेप्सिततमं कर्म चतुर्धाऽन्यत्तु कल्पितम् ॥
औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥

इति वाक्यपदीयात् ॥

यदसज्जायते सद्वा जन्मना यत्प्रकाशते ।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम् ॥
प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादि भस्मवत् ।
किंचिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥

मिति तु वक्तुमशक्यम् । चैत्रप्रयागयोस्तादृशकर्मत्वस्यासत्त्वेन दोषाभावेऽपि "पाचयति कृष्णं गोप" इति प्रयोगापत्तेः । "गमयति कृष्णं गोकुलम्" इत्यत्र ण्यन्त 'गमि' धात्वर्थतावच्छेदक—प्रयोजक 'पर' समवेतक्रियाजन्यसंयोगानुकूलव्यापाराश्रयत्वात् कृष्णस्येव, कृष्णस्य ण्यन्त 'पचि' धात्वर्थतावच्छेदक—गोपवृत्तिक्रियाजन्यविक्लित्यनुकूलव्यापाररूपफलाश्रयत्वात् । सिद्धान्ते तु न "गमयति कृष्णं गोकुलम्" इत्यत्रेव "गतिबुद्धि" इति सूत्रस्य "पाचयति कृष्णं गोपः" इत्यत्र प्रवृत्तिरिति ।

एवं तन्निवेशेऽपि परत्वस्य तत्समवेतत्वस्य चेष्टान्वयलाभाय प्रकृत्यर्थप्रकारक शाब्दबोधं प्रति प्रकारतासम्बन्धेन द्वितीयाजन्यपरसमवेतत्वोपस्थितेः, परसमवेतत्वप्रकारकबुद्धिं प्रति विशेष्यतासम्बन्धेन धातुजन्यव्यापारोपस्थितेः कारणत्वं कल्पनीयमिति दिक् ।

---

१. विक्लित्यनुकूलेति—विक्लित्तिरवयवानां शिथिलीभवनं तदनुकूलः, तण्डुलान्यसमवेतः, अग्निसंयोगरूपो धात्वर्थस्तदाश्रयत्वात् (तज्जन्यफलाश्रयत्वात्) अग्निसंयोगः पच्धात्वर्थ इति मतेऽयं दोषः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रियाकृत[1]विशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनु[2]मानाद्वा तत्प्राप्यमिति कथ्यते॥

इति च तत्रैवोक्तम्। घटं करोतीत्याद्यम्। काष्ठं भस्म करोतीति, सुवर्णं कुण्डलं करोतीति च *द्वितीयम्। घटं पश्यतीति *तृतीयम्। *तृणं स्पृशतीत्युदासीनम्। विषं भुङ्क्ते इति द्वेष्यम्। गां दोग्धीति *संज्ञान्तरैरनाख्यातम्। *क्रूरमभिक्रुध्यतीत्यन्यपूर्वकम्।

कर्तृतृतीयाया आश्रयोऽर्थः। तथा हि—"स्वतन्त्रः कर्ता"। स्वातन्त्र्यं च धात्व[3]र्थव्यापाराश्रयत्वम्।

द्वितीयमिति। विकार्यमित्यर्थः। तत्र "काष्ठं भस्म" इत्यस्य काष्ठप्रकृतिविनाशोद्भूतं भस्मेत्यर्थः; "सुवर्णं कुण्डलं करोति" इति गुणान्तरोत्पत्त्येति बोध्यम्।

अन्ये तु काष्ठसुवर्णयोः प्रकृत्योः परिणामित्वेन विवक्षायां भस्मकुण्डले कर्मणी विकार्ये। तत्त्वेनाविवक्षायां निर्वर्त्ये एव। तदुक्तं वाक्यपदीये—

सती वा विद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते॥
प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा। इति।

तृतीयमिति। प्राप्यमित्यर्थः। यद्यप्येतन्मते ज्ञानार्थकधातूनामावरणभङ्गरूपफलवाचकत्वस्वीकारेण दर्शनजन्यावरणभङ्गो घटे प्रतीत्याऽवगम्यते, तथापि प्रतिपत्त्यतिरिक्तक्रियाकृतविशेषोपलभ्यमानत्वमिति विवक्षणान्न दोषः। तृणं स्पृशतीति। 'ग्रामं गच्छन्' इत्यादिः। तथा च ग्रामस्य कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्वेनेच्छोद्देश्यत्वे तृणस्योदासीनत्वं फलति। संज्ञान्तरैरनाख्यातमिति। अपादानादिभिरविवक्षितमित्यर्थः। "अकथितञ्च" इति सूत्रेणेति भावः। क्रूरमभिक्रुध्यतीति। "क्रुधद्रुहोरुपसृष्टयोः कर्म" इति सूत्रेणात्र कर्मसंज्ञा।

---

१. प्राप्यं कर्म लक्षयति—क्रियाकृतेति। २. अनुमानादिति—यथा चैत्रः सुखमनुभवतीत्यत्र सुखगतप्रसादादिधर्मेण तदीयं सुखमनुमीयते इति।
३. धात्वर्थव्यापाराश्रयत्वमिति—प्रधानधात्वर्थव्यापाराश्रयत्वमर्थः, प्रधानत्वञ्चात्र कारकान्तरप्रयोज्यत्वेनाऽविवक्षितत्वम्। अत्राविवक्षितत्वनिवेशादेव काष्ठानि पचन्तीत्यादौ काष्ठस्य कर्तृत्वे विवक्षिते तद्व्यापारस्य वस्तुतोऽन्यप्रयोज्यत्वेऽपि न क्षतिः। एवं च स्वतन्त्रपदमत्रैतदर्थे पारिभाषिकमिति तत्त्वम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते ।

इति वाक्यपदीयात् । *अत एव यदा यदीयो व्यापारो धातुनाऽभिधीयते तदा स कर्तेति स्थाली पचति, अग्निः पचति, एधांसि पचन्ति, तण्डुलः पच्यते स्वयमेवेत्यादि संगच्छते ।

*नन्वेवं "कर्मकर्तृव्यपदेशाच्च" [ब्र० सू० १-२-४] इति सूत्रे "मनोमयः प्राणशरीर" इति वाक्यस्थमनोमयस्य *जीवत्वे वाक्यशेषे तस्य *'एतमितः प्रेत्याभिसंभविताऽस्मि' इति प्राप्तिकर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं संगच्छताम् ? उच्यते—जीवस्यैव ज्ञेयत्वे प्राप्तिकर्मत्वमपि वाच्यम् । कर्तृत्वं च तस्याऽऽख्यातेनोक्तम् । न चैकस्यैकदा संज्ञाद्वयं युक्तम् । कर्तृसंज्ञया कर्मसंज्ञाया बाधात् । तथा चैतमिति द्वितीया न स्यात् । कर्मकर्तृतायां च यगाद्यापत्तिरिति शब्दविरोधद्वारा भवति स भेदहेतुः । एवं च व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रं तृतीयाऽर्थः । कारकचक्रप्रयोक्तृत्वं *कृत्याश्रयत्वं वा 'दण्डः करोति' इत्यत्राव्याप्तम् * ।

धातुनेति । धातुना उक्तक्रिये (उक्ता क्रिया यस्य तादृशे) कारके नित्यं कर्तृता इष्यते इत्यन्वयः । यन्निष्ठक्रियाया धातुवाच्यत्वेन विवक्षा स कर्तेति भावस्तदाह—अत एवेति । तदुक्तं वाक्यपदीये—

धर्मैरभ्युदितैः शब्दे नियमो न तु वस्तुनि—
कर्तृधर्मविवक्षायां शब्दात् कर्ता प्रतीयते ॥
एकस्य बुद्धयवस्थाभिर्भेदेन परिकल्पने ।
कर्मत्वं करणत्वं च कर्तृत्वं चोपजायते ॥ इति ।

वैवक्षिककर्तृत्वकर्मत्वयोरेकस्यापि विवक्षाभेदेन सम्भवात्कथं तद्विरोधो व्यासेनाभिहित इत्याशङ्क्य समाधत्ते—नन्वेवमिति । जीवत्वे इति । संकल्पकर्तृरूपत्वे, ब्रह्मभिन्नत्वे इति यावत् । एतमित इति । इतः—अस्मात् शरीरात् , प्रेत्य—निःसृत्य, एतं—स्वप्रकाशत्वादिगुणविशिष्टं पूर्वोक्तमात्मानम् , अभिसम्भविताऽस्मि—प्राप्तास्मि इत्यर्थः । कृत्याश्रयत्वमिति । 'कर्ता' इत्यत्र 'कृ' धातोः कृतिवाचकत्वात् तृचश्चाश्रयवाचकत्वात् । तत्र चाश्रयांशस्य प्रकृतिमात्रं तृतीयार्थ इति भावः । अव्याप्तमिति । दण्डस्याचेतनत्वेन करणादिप्रयोक्तृत्वासम्भवात् । कृतेरपि आत्मधर्मत्वेनाचेतनदण्डेऽसम्भवात् कृतेर्धातुलभ्यत्वाच्च ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अयं च त्रिविधः—शुद्धः, प्रयोजको हेतुः, कर्मकर्ता च। मया हरिः सेव्यते । कार्यते हरिणा । गमयति कृष्णं गोकुलम् । मदभिन्नाश्रयको हरिकर्मकसेवनानुकूलो व्यापारः, हर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः, गोकुलकर्मकगमनानुकूलकृष्णाश्रयकव्यापारानुकूलो व्यापार इति शाब्दबोधः ।

करणतृतीयायास्त्वाश्रयव्यापारौ वाच्यौ । तथा हि—"साधकतमं करणम्" । तमबर्थः प्रकर्षः । स चाव्यवधानेन[1] फलजनकव्यापारवत्ता । तादृशव्यापारवत्कारणं च करणम् ।

उक्तं च वाक्यपदीये—

*क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥
*वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम् ।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः ॥ इति ॥

विवक्ष्यत इत्यनेन सकृदनेकेषां तदभावाद् द्वितीयासप्तम्यादेरवकाशं *सूचयति । *न चैवं "कर्ता शास्त्रार्थवत्त्वात्" [ब्र० सू० २-३-३३] इत्युत्तरमीमांसाऽधिकरणे "शक्तिविपर्ययात्" [ब्र० सू० २-३-३८] इति सूत्रणान्तःकरणस्य कर्तृत्वे करणशक्ति*विपर्ययापत्तिरुक्ता न युज्ये-

---

क्रियाया इति । फलस्येत्यर्थः । क्रियते—उत्पाद्यते सा क्रिया इति योगाश्रयणात् । तथा च यत्र कर्मणि यद्व्यापाराव्यवधानेन फलसिद्धिर्विवक्षिता तत् करणमिति कारिकाऽर्थः । करणतृतीयाप्रयोजिका विवक्षैवेति फलितं, तदेव स्पष्टयति—

वस्तुत इति ।

सूचयतीति । द्वितीयादिविभक्तीनां विषयेऽपि विवक्षया करणत्वादाश्रयार्थ उपलक्षणं तत्तदर्थानामिति सूचयतीत्यर्थः । सर्वेषां कारकाणां करणत्वेन विवक्षाया असम्भवात् न युगपत्सर्वत्र तृतीयापत्तिः, फलसिद्धिप्रागनन्तरकालिकव्यापारवत एव तत्त्वेन एकस्यैव तादृशव्यापारवत्त्वेन विवक्षितुं शक्यत्वात्; एतदेवोत्तरमीमांसाऽधिकरणविरोधपरिहाराभ्यां व्याचष्टे—**न चैवमिति** । एवं—सर्वेषां कारकाणां विवक्षया करणत्वे । **विपर्ययापत्तिरिति** । "कर्ता शास्त्रार्थवत्त्वात्" (ब्र० सू०

---

1. अव्यवधानेनेति—अव्यवधानेन फलजनको यो व्यापारस्तद्वत्त्वमित्यर्थः । अव्यवधानेनेति तृतीयाया वैशिष्ट्यमर्थस्तेन तद्विशिष्टकाल इत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तेति वाच्यम्। "तदेवैतेषां प्राणानां विज्ञानेन विज्ञानमादाय" इति श्रुत्यन्तरे करणतया क्लृप्तस्य कर्तृतां प्रकल्प्य शक्तिविपर्ययापत्तिर्निष्प्रमाणा *कल्प्येतेत्यभिप्रायात्। वस्तुतस्त्वभ्युच्चयमात्रमेतदिति "यथा च तक्षोभयथा" [ब्र० सू० २-३-४०] इत्यधिकरणे *भाष्ये एव स्पष्टमित्यादि प्रपञ्चितं भूषणे।

२—३—३३) इति सूत्रेण जीवोद्देशेन कर्तव्यविशेषोपदेशानां "यजेत" "जुहुयात्" "दद्यात्" इत्यादीनाम् "एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः" इत्यादिशास्त्राणां चार्थवत्त्वाय जीवस्य कर्तृत्वे बोधिते "यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात् स स्वतन्त्रः सन् प्रियं हितं चैवात्मनो नियमेन सम्पादयेत्, न विपरीतं; विपरीतमपि तु सम्पादयन्नुपलभ्यते, न च स्वतन्त्रस्याऽऽत्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यते" इति भाष्येण जीवस्य कर्तृत्वमाक्षिप्य बुद्धेः कर्तृत्वे आशङ्किते "शक्तिविपर्ययात्" (ब्र० सू० २-३-३८) इति सूत्रेण "तदेवैतेषां प्राणानां विज्ञानेन विज्ञानमादाय" इति श्रुतौ विज्ञानेनेतिपदबोधितकरणशक्तिर्बुद्धेर्हीयेत, कर्तृशक्तिश्चापद्येतेत्युक्ता कर्तृत्वकरणत्वशक्त्योर्विपर्ययापत्तिरित्यर्थः।

कल्प्येतेति। न हि बुद्धेः कर्तृत्वं करणान्तरकल्पनां विना प्रामाण्यमधिगच्छति करणसाहाय्येनैव कर्तुः प्रवृत्तिदर्शनात्। करणान्तरकल्पना च नानुभवानुसारिणीति निष्प्रमाणेति भावः।

भाष्ये एवेति। तत्र भाष्ये "यथा तु तक्षा वास्यादिकरणहस्तः कर्ता दुःखी

---

१. निष्प्रमाणेति—क्लृप्ता या बुद्धेः करणशक्तिः सा प्रामाणिकी, तदेवैतेषां प्राणानां विज्ञानेनेति श्रुतिबोधितत्वात् तस्यास्त्यागे अक्लृप्ता या कर्तृत्वशक्तिः साऽप्रामाणिकी तस्याः कल्पने च शक्तिविपर्ययापत्तिर्निष्प्रमाणा स्यात्। अतो बुद्धेः कर्तृत्वनिरासे शक्तिविपर्ययादिति सूत्रं भगवता व्यासेन हेतुत्वेनोपन्यस्तम्, तस्य निष्प्रमाणशक्तिविपर्ययापत्तेरित्यर्थः। एतेन कारकाणां वैवक्षिकतया शक्तिविपर्ययः सोढव्यः, परन्तु निष्प्रमाणस्य तस्य सोढुमशक्यत्वमेवेति परोक्तं बुद्धेः कर्तृत्वं शक्तिविपर्ययादिति सूत्रेण निरस्तमिति न तेनास्माकं विरोध इति। अयमाशयः—बुद्धेर्वैवक्षिककर्तृतया शक्तिविपर्ययो भवेत्तर्हि भवेन्नाम परन्तु अक्लृप्तशक्तिकल्पने प्रमाणाभावात् करणशक्तिविपर्ययोऽत्र सोढुमशक्योऽतो बुद्धिः कर्तृत्वाभाववती शक्तिविपर्ययादिति प्रघट्टकार्थः। २. एकत्र श्रुतौ करणतया क्लृप्तत्वेऽप्यन्यत्र कर्तृत्वविवक्षायां न किञ्चिद् बाधकं युगपदुभयविवक्षाया एव विरुद्धत्वादित्यत आह—वस्तुतस्त्विति।
३. एतदिति = शक्तिहान्यापत्तिरूपं दूषणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सप्तम्या अप्याश्रयोऽर्थः। "सप्तम्यधिकरणे च" इत्यधिकरणे सप्तमी। तच्च "आधारोऽधिकरणम्" इति सूत्रादाधारः। तत्त्वञ्चाऽऽश्रयत्वम्। तत्राऽऽश्रयांशः शक्यः। तत्त्वमवच्छेदकम्। न चाऽऽश्रयत्वमात्रेण कर्तृकर्मकरणानामाधारसंज्ञा स्यात्। स्यादेव यदि ताभिरस्या *न बाधः स्यात्। "कारके" इत्यधिकृत्य विहितसप्तम्याः क्रियाश्रय इत्येव यद्यपि तात्पर्यं तथाऽप्यत्र कर्तृकर्मद्वारा तदाश्रयत्वमस्त्येव स्थाल्यादेर्भूतलकटादेश्चेति 'स्थाल्यां पचति' 'भूतले वसति' 'कटे शेते' इत्याद्युपपद्यते।

उक्तं च वाक्यपदीये—

*कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम्।
*उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्॥ इति॥

एतच्च त्रिविधम्। *औपश्लेषिकं *वैषयिकमभिव्यापकं* च। कटे

भवति, स एव स्वगृहं प्राप्तो विमुक्तवास्यादिकरणः स्वस्थो निर्वृत्तो निर्व्यापारः सुखी भवति" इत्युक्त्या वास्याद्युपाधिसहितासहितस्यैकस्यैव तद्गतो दुःखित्वं सुखित्वं च, तथैव विवक्षाऽविवक्षारूपोपाधिनैकस्यैव कर्तृत्वं करणत्वं च "योधै राजा युध्यते" "योधा युध्यन्ते" इत्यादिना स्पष्टम्।

न बाधः स्यादिति। एवं च साक्षात्क्रियाश्रये कर्तृकर्मसंज्ञाभ्यां बाधात् सूत्रारम्भसामर्थ्यात्तद्द्वारकक्रियाश्रये एषाऽधिकरणसंज्ञा पर्यवस्यतीति भावः। अत एव "गेहं प्रविशति" "मोक्षमिच्छति" इत्यादौ द्वितीया। "मोक्षे इच्छा" इति तु आख्यातार्थकर्तृद्वारा इच्छतिक्रियायां मोक्षस्यान्वयाद्बोध्यम्। एतेन आश्रयत्वमात्रार्थकतया द्वितीयातृतीयासप्तमीनां पर्यायतापत्तिर्निरस्तेति दिक्।

कर्तृकर्मव्यवहितामिति। स्वाश्रितकर्त्राद्याश्रितामित्यर्थः।

उपकुर्वत् क्रियासिद्धौ—स्वनिष्ठव्यापारेण प्रधानक्रियानिर्वर्तकमित्यर्थः।

औपश्लेषिकमिति। श्लेषस्य सम्बन्धस्य समीपम् उपश्लेषः। तत्र भवम्, एकदेशावच्छेदेन स्वसम्बन्धि इति यावत्। उप-समीपे श्लेषः—सम्बन्धस्तत्र भवमिति वा। तत्राद्यार्थस्य 'कटे शेते' इत्युदाहरणं, द्वितीयस्य 'गुरौ वसति' इति हरिकृतकाशिकायां स्पष्टम्। 'गुरौ वसति' इत्यस्य गुर्ववधिकसमीपदेशवृत्तिशिष्यकर्तृकोवास इत्यर्थः।

परे तु तादृशावधित्वसमानाधिकरणापादानत्वशक्तेः पञ्चम्यर्थतया 'गुरौ वसति' इति वैषयिकोदाहरणमिति "संहितायाम्" इति सूत्रे कैयटे स्पष्टमित्याहुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शेते, गुरौ वसति, मोक्षे इच्छाऽस्ति, तिलेषु तैलमिति । *एतच्च "संहितायाम्" इति *सूत्रे भाष्ये स्पष्टम् ।

अवधिः पञ्चम्यर्थः । "अपादाने पञ्चमी" । *तच्च[1] "ध्रुवमपायेऽपादानम्" इति सूत्रादपायो *विश्लेषस्तज्जनकक्रिया *तत्रावधिभूतमपादानमित्यर्थकाद् अवधिभूतमिति भावः ।

उक्तं च वाक्यपदीये—

अपाये यदुदासीनं चलं वा यदि वाऽचलम् ।
ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥
पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते ॥
उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके ।
विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते ॥
मेषान्तरक्रियापेक्षमवधित्वं पृथक्पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक् ॥ इति ।

अस्यार्थः—अपाये—विश्लेषहेतुक्रियायाम् । उदासीनम्—अनाश्रयः । अतदावेशात्—तत्क्रियानाश्रयत्वात् । एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम् । वृक्षात्पर्णं पततीत्यत्र पर्णस्य तद्वारणाय सत्यन्तम्[2] । धावतोऽश्वात्पततीत्यत्राश्वस्य *क्रियाश्रयत्वाद्विश्लेषहेत्विति ।

व्यापकमिति । एतदुदाहरणं 'मोक्षे इच्छाऽस्ति' इति 'गुरौ वसति' इति च । अभिव्यापकमिति । सर्वावयवावच्छेदेनाऽऽधेयसम्बन्धाश्रय इत्यर्थः । 'तिलेषु तैलम्' इत्युदाहरणम् ।

एतच्च—अधिकरणत्रैविध्यञ्च । सूत्रे भाष्ये इति । तत्र हि "अयं योगः शक्योऽवक्तुम् । कथम् ? अधिकरणं नाम त्रिःप्रकारं—व्यापकम् औपश्लेषिकं वैषयिकमिति" इत्युक्तम् ।

तच्च—अपादानञ्च । विश्लेषः—विभागः । तत्रावधिभूतमिति । विभागजनकक्रियानाश्रयत्वे सति विभागाश्रयत्वमित्यर्थः ।

क्रियाश्रयत्वादिति । धावनक्रियाश्रयत्वादित्यर्थः । विश्लेषजनकेति ।

---

१. ननु अपादाने पञ्चमीति सूत्रेण अपादानं पञ्चम्यर्थं इत्येवायातं तर्हि अवधेः तदर्थत्वमत आह—तच्चेति । २. सत्यन्तमिति—एतद्विशेषणानुपादाने कर्तृ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कुड्यात्पततोऽश्वात्पततीत्यत्राश्वस्य *विश्लेपजनकक्रियाश्रयत्वेऽपि तन्न विरुद्धमित्याह—यस्मादश्वादिति। तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति *विशेषणीयमिति भावः। एवमश्वनिष्ठक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह—तस्यापीति।

उभयकर्मजविभागस्थले विभागस्यैक्यात्तद्विश्लेषजनकक्रियानाश्रयत्वाभावात्परस्परस्मान्मेषावपसरत इति न स्यादित्याशङ्क्य समाधत्ते—उभावपीति। मेषान्तरेति। यथा [1]निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्यापसरन्मेषक्रियामादाय ध्रुवत्वं तथाऽत्रापि विभागैक्येऽपि *क्रियाभेदादेकक्रियामादाय परस्य* ध्रुवत्वमिति। तथा च विश्लेषाश्रयत्वे सति तज्जनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वं वाच्यम्। क्रिया चात्र धात्वर्थो न तु स्पन्दः। तेन वृत्तकर्मजविभागवति वस्त्रे वृत्ताद्वस्त्रं पततीति संगच्छते।

वस्तुतो नैतावत्पञ्चम्या वाच्यम्, किं त्ववधेर्लक्षणमात्रम्। *द्वितीयार्थोक्तरीत्या प्रयोगातिप्रसङ्गस्यासंभवेन वाच्यकोटौ प्रवेशस्य गौरवेण*

अस्य कुड्यावधिकेत्यादिः। विशेषणीयमिति। अन्निरूपितमवधित्वमिष्यते, तद्विभागव्यक्तित्वेन निवेशनीयमित्यर्थः। क्रियाभेदादिति। भिन्नमेषगतत्वेन तत्तत्क्रियाभेदादित्यर्थः। अस्य विभागभेदे कल्पिते इति शेषः। ध्रुवत्वमितीति। तदवधिकविभागजनकक्रियानाश्रयत्वादिति बोध्यम्। एवञ्च तद्विभागजनकक्रियानाश्रयत्वे सति धात्वर्थतत्क्रियाजन्यतद्विभागाश्रयत्वं तत्त्वम्।

द्वितीयार्थोक्तरीत्येति। तद्विभागजनकक्रियानाश्रयत्वस्य पञ्चम्यर्थवाच्यत्वे "पर्णात् पर्णं पतति" इति प्रयोगस्यातिप्रसङ्गः शाब्दबोधस्य वा? नाद्यः। कर्तृसंज्ञाया अपादानसंज्ञाबाधकत्वेन तद्विषये पञ्चम्यप्राप्तेः। न द्वितीयः। तथा व्युत्पन्नानामिष्टापत्तेः, पञ्चमीजन्यबोधविषयविभागनिष्ठविशेष्यतानिरूपितप्रकारतासम्बन्धेन शाब्दबोधं प्रति तद्विभागजनकधात्वर्थव्यापारानाश्रयोपस्थितेर्हेतुत्वकल्पनाच्चेति रीत्येत्यर्थः।

संज्ञाया अपवाद इयं स्यात्, अपायविषये यत्कारकं कथितापायरूपक्रियाऽश्रयात्मकं तदपादानमित्यर्थात्। कर्तृसंज्ञा तु पचति चैत्र इत्यादौ सावकाशेति भावः।

1. निश्चलमेषादिति—यत्रैको मेषो निश्चलं स्थितस्तन्मेषादितरो मेषोऽपसरति तत्रेति दृष्टान्ताशयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संभवादिति तु प्रतिभाति* । न चैवमपि* वृक्षात्स्पन्दत इति स्यादिति शङ्क्यम् । आसनाच्चलितः, राज्याच्चलित इतिवदिष्टत्वात्* । एतेन पञ्चमीजन्यापादानत्वबोधे* सकर्मकधातुजन्योपस्थितेर्हेतुत्वमिति समाधानाभासोऽप्यपास्तः* । न चैवमपि वृक्षात्त्यजतीति दुर्वारम् । कर्मसंज्ञ-

---

असम्भवादिति । एतेन परसमवेतत्वं विभागश्च पञ्चम्यर्थः, विभागमात्रार्थस्वीकारे 'पर्णात् पर्णं पतति' इति प्रयोगापत्तेः । न च 'धात्वर्थतावच्छेदकफलानाश्रत्वे सति इत्यपि विशेषणीयमिति न दोष इति वाच्यम् । अधोदेशे वृक्षे एव लग्ने पर्णे वृक्षस्य संयोगरूपधात्वर्थतावच्छेदकफलाश्रयत्वेन 'वृक्षात् पतति' इत्यनापत्तेः । न च विभागार्थकपञ्चम्याः परसमवेतत्वविशिष्टे लक्षणा, तस्य च धात्वर्थेऽन्वयः, परत्वं च स्वप्रकृत्यर्थापेक्षयेति वाच्यम् । शुद्धशक्त्या प्रयोगादर्शनेन शक्यार्थग्रहं विना तत्सम्बन्धरूपलक्षणाया असम्भवात् । अन्यथैवकारस्य व्यवच्छेदमात्रे शक्तिः पार्थान्यत्वादिविशिष्टे लक्षणा, फलमेव द्वितीयाऽर्थः परसमवेतत्वे लक्षणेत्यपि स्यात् । एवञ्च परसमवेतत्वं शक्यमेव । तथा च 'वृक्षात् पर्णं पतति' इत्यादौ वृक्षनिष्ठविभागानुकूलवृक्षान्यसमवेतपतनानुकूलव्यापाराश्रयः पर्णमिति बोध इति नैयायिकोक्तमपास्तम् । परसमवेतत्वांशे शक्तिकल्पनस्यानुपयोगात् ।

प्रतिभातीति । एवञ्च पञ्चम्यर्थो विभागमात्रम् उक्तावधित्वान्तर्गतव्यापारांशस्य धातुनाऽऽश्रयस्य च प्रकृतितो लाभसम्भवात्, विभागजनकव्यापारानाश्रयत्वस्य चोक्तरीत्या वाच्यत्वाभावादित्याशयः । एवमपीति । 'पर्णात् पर्णं पतति' इत्यादिदोषासम्भवेन विशेषणांशस्यावाच्यत्वेऽपीत्यर्थः । वृक्षात् स्पन्दते इति । तादृशधात्वर्थानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वस्य वृक्षे सत्त्वात्, इयमापत्तिः सत्यन्तार्थस्य वाच्यत्वकथनेऽपीति बोध्यम् । इष्टत्वादिति । "आसनाच्चलितः" "राज्याच्चलितः" इत्यादिप्रयोगोपपत्तये 'चल' धातोर्विभागजनकव्यापारवाचकत्ववत् न्देरपि तदर्थकत्वस्वीकारात् ।

सकर्मकेति । सकर्मकधातुजन्या अर्थाद् व्यापारानधिकरणवृत्तिफलावच्छिन्नव्यापारत्वावच्छिन्ना या उपस्थितिः सा कारणमित्यर्थः । तथा च 'स्पन्द' धातोः फलसमानाधिकरणव्यापारवाचकत्वेन तज्जन्योपस्थितेस्तादृक्त्वाभावेन न पञ्चम्यापत्तिरिति तात्पर्यम् । अपास्त इति । 'आसनाच्चलितः' इत्यादावपि 'चल' धातुजन्योपस्थि-

---

१. दुर्वारमिति—वृक्षे विभागावच्छिन्नव्यापारानाश्रयत्वस्य सत्त्वेनापादानत्वप्राप्तेरिति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चाऽपादानसंज्ञाया बाधेन पञ्चम्यसंभवात् । अमात्क्षते तथा प्रयोगे यदि बोधाभावोऽनुभवसिद्धस्तर्हि पञ्चमीजन्यापादानत्वबोधे त्यजादिभिन्नधातुजन्यबुद्धेर्हेतुत्वं वाच्यम् । बलाहकाद्विद्योतते विद्युदित्यादौ निःसृत्येत्यध्याहार्यम् । रूपं रसात्पृथगित्यत्र तु बुद्धिपरिकल्पितमपादानत्वं द्रष्टव्यम् । पृथग्विना इति पञ्चमी वा ।

इदं च—

निर्दिष्टविषयं किंचिदुपात्तविष तथा ।
अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते ॥

इति वाक्यपदीयात्त्रिविधम् । यत्र साक्षाद्धातुना* गतिर्निर्दिश्यते तन्निर्दिष्टविषयम् । यथा–अश्वात्पतति । यत्र धात्वन्तरार्थाङ्ग स्वार्थं धातुराह, तदुपात्तविषयम् । यथा–बलाहकाद्विद्योतते । निःसरणाङ्गे विद्योतने द्युतिर्वर्तते । अपेक्षिता क्रिया यत्र तदन्त्यम् । यथा–कुतो भवान् पाटलिपुत्रात् । अत्राऽऽगमनमर्थमध्याहृत्यान्वयः कार्यः ॥

उद्देश्यश्चतुर्थ्यर्थः । तथा हि—संप्रदाने चतुर्थी । तच्च "कर्मणा यमभिप्रैति स संप्रदानम्" इति सूत्रात्कर्मणा करणभूतेन यमभिप्रैति ईप्सति तत्कारकं संप्रदानमित्यर्थकादुद्देश्यः । इदमेव शेषित्वम् । तदुद्देश्यकेच्छाविषयत्वं च शेषत्वमित्येव पूर्वतन्त्रे[1] निरूपितम् । अत एव "प्रासनवन्मैत्रावरुणाय दण्डप्रदानम्" [अ० ४ पा० २ अधि० ६] इत्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति विहितं दण्डदानं न प्रतिपत्तिः, किन्तु *चतुर्थीश्रुत्याऽर्थकर्मेति तत्र निर्णीतम् । रजकाय[2] वस्त्रं ददातीत्यपि

तेस्ताहक्त्वाभावेन पञ्चम्यनापत्तेरिति तदाशयः । गतिरिति । विभागजनकक्रियेत्यर्थः ।

चतुर्थीश्रुत्याऽर्थकर्मेति । दीक्षितस्य दण्डप्रदानं विधाय पुनराम्नातं–"क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति" इति । तत्र द्वितीयाश्रुत्या दण्डस्यैवेच्छाविषयत्वावगतेः प्राधान्यात् तस्य च दीक्षितहस्ते धारणेन कृतार्थत्वादिदं दण्डदानं प्रतिपत्तिकर्म, इत्याशङ्क्य 'मैत्रावरुणाय' इति चतुर्थीश्रुत्या मैत्रावरुणस्यैवोद्देश्यत्वलक्षणार्थप्राधा-

१. पूर्वतन्त्रे निरूपितं मीमांसकमतमाह–तदुद्देश्यकेति, तथा चेच्छीयविषयताविशेष उद्देश्यत्वमिति भावः । २. स्वस्वत्वध्वंसविशिष्टपरस्वत्वाऽनुकूलेच्छारूपदानार्थस्थले एव सम्प्रदानत्वमिति न नियमः किन्तु अन्यत्रापीत्याह–रजकायेति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खण्डिकोपाध्यायः शिष्याय* चपेटां ददातीति* भाष्योदाहरणादिष्टमेव। *वृत्तिकारास्तु सम्यक्प्रदीयते यस्मै तत्संप्रदानमित्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तो रजकस्य वस्त्रमित्येवाऽऽहुः।

इदं च—

अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुमतिभ्यां च लभते संप्रदानताम्॥

इति वाक्यपदीयात्त्रिविधम्। "सूर्यायार्घ्यं ददाति" इत्याद्यम्। नात्र सूर्यः प्रार्थयते, नानुमन्यते, न निराकरोति। प्रेरकं-"विप्राय गां ददाति"। अनुमन्तृ-"उपाध्यायाय गां ददाति"। अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः। विभक्तीनां धर्मिवाचकत्वात्। धर्ममात्रवाचकत्वे "कर्मणि द्वितीया" इति सूत्रस्वरसभङ्गापत्तेः। *कर्मार्थकक्तद्धितादौ

न्यावगतेः "दण्डी प्रैषानन्वाह" इति प्रैषानुवदनेऽवलम्बाय दण्डस्योपयोक्ष्यमाणत्वाच्च मैत्रावरुणार्थमिदं दण्डप्रदानमित्यर्थकर्मेति तत्र निर्णीतं; न तु द्वितीयाश्रुत्या प्रतिपत्तिकर्मेति भावः।

चपेटाम्—प्रसृतकरतलम्। भाष्योदाहरणादिति। संयोगविशेषानुकूलव्यापारार्थकत्वेऽपि ददातेरत्र भाष्यकृता चतुर्थ्या उपादानात् संप्रसारणसंज्ञाया अन्वर्थत्वानङ्गीकारेण 'रजकाय वस्त्रं ददाति' इत्यत्राधीनीकरणार्थददातेर्योगेऽपि चतुर्थी। 'रजकस्य वस्त्रं ददाति, इति तु शेषत्वविवक्षायामिति भाष्यकृदाशयः। अत एव "न शूद्राय मतिं दद्यात्" इति स्मार्तप्रयोगः सङ्गच्छते। अत्र ददातिर्बोधनार्थः। मतिशब्दस्तज्जनकवेदादिपरः। सम्प्रदानसंज्ञायाः सम्यक् प्रदीयते यस्मै तत्सम्प्रदानम्' इति योगार्थेनान्वर्थत्वं स्वीकृत्य ,स्वस्वत्वनिवृत्ति—परस्वत्वोत्पत्ति एतदुभयार्थकस्यैव ददातेर्योगे सा संज्ञा नान्यत्रेति स्वीकर्तॄणां मतमाह—वृत्तिकारास्त्विति।

कर्मार्थकक्तद्धितादाविति। 'पक्वस्तण्डुलः' 'शत्योऽश्वः' इत्यत्र। आदिपदात् कर्त्रर्थकलडादेशशानचः 'पच्यमानस्तण्डुल' इत्यस्य संग्रहः। आश्रयत्वस्य

---

१. इष्टमेवेति—न च 'रजकाय वस्त्रं ददातीति प्रयोगो लक्षणया निर्वाह्य इति शङ्क्यम्, क्रियाग्रहणं कर्तव्यमिति वार्तिकप्रत्याख्यानपरभाष्येण सम्प्रदानसंज्ञाया अन्वर्थत्वाऽनङ्गीकारेण अस्य प्रयोगस्य मुख्यत्वात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथा दर्शनाच्च। द्वितीयाद्यर्थकबहुव्रीहौ 'प्राप्तोदक' इत्यादौ धर्मिवाचकता-लाभाच्च।

सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्।

इति भाष्याच्चेति दिक्। आश्रयस्यापि प्रकृत्यैव लाभान्न विभक्तिवाच्यता, किन्त्वाश्रयत्वमात्रं वाच्यम्। *तदेव च तादात्म्येनावच्छेदकम्। करणतृतीयायाश्च व्यापारोऽपि, पञ्चम्या विभागमात्रं, चतुर्थ्या उद्देश्यत्वमात्रम्, अत एवाऽऽकृत्यधिकरणमपि न विरुध्यत इत्यभिप्रेत्याऽऽह— शक्तिरेव वेति। षण्णामपीति शेषः। "षष्ठी शेषे" इति सूत्रात्तस्याः सम्बन्धमात्रं वाच्यम्। कारकषष्ठ्यास्तु शक्तिरेवेत्यूह्यम्। "सप्तमीपञ्चम्यौ कारकमध्ये" इति सूत्रे *शक्तिः कारकमिति पक्षस्य भाष्ये दर्शनात्। एवं च 'देवदत्तस्य गौर्ब्राह्मणाय गेहाद् गङ्गायां हस्तेन मया दीयते' इत्यत्र देवदत्तसम्बन्धिनी या गौस्तदभिन्नाश्रयकत्यागानुकूलो ब्राह्मणोद्देश्यको गेहनिष्ठविभागजनको गङ्गाधिकरणको हस्तकरणको मन्निष्ठो व्यापार इति बोधः। यथायथम्—उक्तप्रकारेण। अत्र मानमुपदर्शयन् "घटं जानाति" इत्यादौ द्वितीयाया विषयतायां लक्षणेति बहाकुलं वदतो नैयायिकादीन्प्रत्याह—सुपां कर्मेति। अय भावः—

वाच्यत्वे आश्रयत्वत्वस्यावच्छेदकत्वं कल्प्यं, तथा च गौरवमित्याशङ्कां परिहरति— तदेव चेति। शक्तिः कारकमिति। अत्र प्रवृत्तिनिमित्तं तु स शब्द एव संज्ञाशब्दत्वादिति बोध्यम्। उक्तं च हरिणा—

नित्याः षड व्यक्तयोऽन्येषां भेदाभेदसमन्विताः।
क्रियासंसिद्धयेऽर्थेषु जातिवत् समवस्थिताः॥
द्रव्याकारादिभेदेन ताश्चापरिमिता इव।
दृश्यन्ते, तत्त्वप्रासां तु षट् शक्तीर्नातिवर्तते॥
निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते।
षोढा शक्तित्वमेवाहुस्तत्प्रवृत्तिनिबन्धनम्॥ इति।

---

१. तादात्म्येनेति—यद्यपि तादात्म्यं न संयोगसमवायादिवद् वृत्तितानियामकं तथापि सम्बन्धितानियामकं स्वस्येव स्वस्वामिभावादिवत्, अतश्चाश्रयत्वस्य तादात्म्येन स्वसम्बन्धितया न स्वनिष्ठवाच्यताऽवच्छेदकत्वाऽनुपपत्तिरित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुपां कर्मादयोऽप्यर्थाः संख्या चैव *तथा तिङाम् ।
प्रसिद्धो[1]नियमस्तत्र* नियमः *प्रकृतेषु वा ॥

इति वार्तिकतद्भाष्याभ्यां कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः। तथा हि—"स्वौजसमौट्" "कर्मणि द्वितीया" "द्व्येकयोर्द्विवचनैकवचने" इत्यादेः "लस्य" "तिप्तस्झि" "ताऽन्येकवचनद्विवचन" इत्यादेश्चैकवाक्यतया कर्मादेस्तत्संख्यायाश्च वाच्यता लभ्यते। तथा तन्नियमश्च द्विविधो लभ्यते। द्वितीया कर्मण्येव, तृतीया करणे एवेत्येवमादिरर्थनियमः* । कर्मणि द्वितीयैव, करणे तृतीयैवेत्येवं शब्दनियमश्च। उभयथाऽपि सिद्धनियमविरुद्धं लक्षणादिकमसाधुत्वप्रयोजकमिति याज्ञे कर्मणि "नानृतं वदेत्" इति निषेधविषयो भवत्येवेति स्वेच्छया लक्षणाऽपि विभक्तावप्रयोजिकैव। अत एव "विभक्तौ न लक्षणा" इत्यादिर्नैयायिकवृद्धानां व्यवहार इति दिक् ॥ १ ॥ (२४)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरण-
भूषणसारे सुबर्थनिर्णयः समाप्तः ।

शक्तिः कारकमिति मते "अनभिहिते" इति सूत्रस्य तत्तच्छक्त्यनभिधाने इत्यर्थः। तथा—कर्मादिः संख्या चेत्यर्थः। अत्र आदिपदेन कर्त्रर्थो गृह्यते इति बोध्यम्। तत्र—सुपां कर्मादिवाचकत्वे। प्रकृतेषु—अर्थेषु। कर्मादीनां सुब्वाच्यत्वे इत्यर्थः।

अर्थनियम इति। अयं शब्दनियमश्चेति द्वावपि नियमौ सोपपत्तिकौ गुरुचरणकृतशब्देन्दुशेखरदीपकेऽव्ययप्रकरणे निरूपिताविति तत्र द्रष्टव्यौ ॥ १ ॥ (२४)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां सुबर्थनिर्णयः समाप्तः ॥

---

१. दिगिति—एवं च नव्यनैयायिकमतमनुपादेयम्, वृद्धनैयायिकाविरोधाद् व्याकरणविरोधाच्चेति भावः।

इति भूषणसारे सुबोधिन्यां सुबर्थनिर्णयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ नामार्थनिर्णयः।

अथ नामार्थानाह[1]—

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥१॥ (२५)

एकं—जातिः, लाघवेन तस्या एव वाच्यत्वौचित्यात्। *अनेकव्यक्तीनां वाच्यत्वे गौरवात्। *न च व्यक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः, *एवं ह्येकस्यामेव व्यक्तौ शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां *स्वसमवेताश्रयत्वं संसर्ग इति गौरवम्। जात्या तु सहाऽऽश्रयत्वमेव संसर्ग इति लाघवम्। *किंच विशिष्टवाच्यत्वमपेक्ष्य *नागृ-

---

अनेकव्यक्तीनामिति। 'एकस्या जातेर्वाच्यत्वमुपेक्ष्य' इत्यादिः। ननु जातेर्वाच्यत्वे 'गामानय' इत्यादौ गोव्यक्तेरानयनकर्मत्वेन बोधाय व्यक्तौ लक्षणा त्वयाऽभ्युपगन्तव्या। तथा च व्यक्तेरेवैकस्या वाच्यत्वमस्तु व्यक्त्यन्तरबोधस्तु लक्षणया भविष्यतीति न गौरवमित्याशङ्कते—न च व्यक्तीनामपीति। व्यक्तेर्वाच्यत्वेऽप्येकस्यैव तत्त्वेन लाघवस्य विनिगमकत्वाभावेऽपि सम्बन्धलाघवं विनिगमकं भवतीति समाधत्ते—एवमित्यादिना। एवं—विनिगमनाविरहे।

स्वसमवेताश्रयत्वमिति। स्वं—वाच्यव्यक्तिः तत्समवेता—गोत्वादिजातिः तदाश्रयत्वं—समवायेन तदधिकरणत्वं व्यक्त्यन्तरे इति समन्वयः। स्वसमवेतसमवायित्वमिति यावत्। ननु व्यक्तिशक्तिवादिनाऽपि जातेर्वाच्यत्वमभ्युपेयमेव। अन्यथा शुद्धव्यक्तेर्वाच्यत्वस्वीकारे व्यक्तीनामानन्त्याद् व्यभिचाराच्च शक्तिग्रहानुपपत्तेः। एवं च आवश्यकत्वात् प्रथमोपस्थितेश्च जातेरेव वाच्यत्वमस्तु। उक्तं च भट्टपादैः—

अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः।
आकृतेः प्रथमज्ञानात् तस्या एवाभिधेयता ॥ इति।

व्यक्तिबोधस्तु लक्षणयोपपत्स्यते इत्याह—किंचेति। नागृहीतेति। 'नागृहीतविशेषणा बुद्धिर्विशेष्यमवगाहते' इति–विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतयाऽ-

---

१ प्रत्ययेन नियमतः प्रकृतेरपेक्षितत्वात् सुपां प्रातिपदिकप्रकृतिकतया तैः प्रकृतिभूतप्रातिपदिकस्य स्मरणेन अर्थंबुबोधयिषया शब्दप्रयोग इति नियमेन तदर्थः क इति जिज्ञासायां प्रसङ्गसङ्गत्या नामार्थं निरूपयति–अथ नामार्थानिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हीतविशेषणन्यायेन जातिरेव वाच्येति युक्तं, व्यक्तिबोधस्तु लक्षणया[1]। *एवं च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यत इति दिक्। *यद्वा केवलव्यक्तिरेवैकशब्दार्थः। केवलव्यक्तिपक्ष एव। *एग्रहणस्यैकशेषस्य चाऽऽरम्भेण तस्यापि शास्त्रसिद्धत्वात्। युक्तं चैतत्। *व्यवहारेण व्यक्तावेव* तद्ग्रहणात् *सम्बन्धितावच्छेदिकाया जातेरैक्याच्छक्तिरप्येकैवेति न गौरवमपि। न चैवं* घटत्वमपि वाच्यं स्याच्छक्यतावच्छेदकत्वात्। तथा च नागृहीतविशेषणन्यायात्तदेव वाच्यमस्त्विति शङ्क्यम्। *अकारणत्वेऽपि कारणतावच्छेदकत्ववदलक्ष्यत्वेऽपि लक्ष्यतावच्छेदकत्ववत्तथाऽत्रापि सम्भवात्।

उक्तं च—

*आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति ॥ इति ॥

गृहीतविशेषणा एतादृशी बुद्धिर्न विशेषणविशिष्टविशेष्यविषयिणी भवतीत्यर्थकन्यायेनेत्यर्थः। एवं च—व्यक्तौ लक्षणास्वीकारे च।

ननु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः प्रकृतिनिष्ठशक्तिनिरूपकस्यैव च प्रकृत्यर्थतया व्यक्तेः शक्त्यनिरूपकत्वेन तत्र विभक्त्यर्थान्वयो न स्यात् 'गामानय' इत्यादौ पदार्थान्तरान्वयानुपपत्तिश्चेति। उक्तं च तद्भूताधिकरणे भट्टपादैः—

गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम्।
शब्दान्तरैर्विभक्त्या वा धूमोऽयं ज्वलतीतिवत् ॥ इति।

किञ्च व्यक्तौ लक्षणाऽपि अनुपपत्तिज्ञानमन्तरेणैव 'गां दद्यात्' इत्यादितो व्यक्तिबोधदर्शनान्न सम्भवति। अत एव नार्थापत्तिरपि इत्यरुचेराह—यद्वेति। अणग्रहणस्येति। "अणुदित्सवर्णस्य" इति सूत्रे इत्यादिः। व्यवहारेण—गवानयनादिव्यवहारेण। तद्ग्रहणात्—शक्तिसम्बन्धग्रहणात्। सम्बन्धितावच्छेदिकायाः—शक्यतावच्छेदिकायाः। एवं—केवलव्यक्तिशक्तिवादे। अकारणत्वे इति। अस्य दण्डत्वादेरित्यादिः, अलक्ष्यत्वे इत्यस्य तु तीरत्वादेरित्यादिरित्यर्थः। आनन्त्येऽपीति। भावानां—पदार्थानाम् (व्यक्तीनामिति यावत्) आनन्त्येऽपि जातिरूप-

---

१. लक्षणयेति—निरूढलक्षणयेत्यर्थः। सा चानादितात्पर्योहितरूपा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*वस्तुतस्तु "न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थः" इति भाष्याद्विशिष्टं *वाच्यम्। *एकमित्यस्य चायमभिप्रायः-शक्तिज्ञाने च विषयतयाऽवच्छेदिका*जातिरेकैव। *तथा च घटत्वप्रकारकघटत्वविशिष्टबोधे *घटत्वांशेऽन्याप्रकारकघटत्वशक्तिज्ञ। नत्वेन हेतुतेति कार्यकारणभाव इत्यादि प्रपञ्चितं भूषणे। तदेतदभिप्रेत्याऽऽह—द्विकमिति। जातिव्यक्ती इत्यर्थः। पूर्वपक्ष-विरोधपरिहारः पूर्ववत्। त्रिकमिति। जातिव्यक्तिलिङ्गानीत्यर्थः। सत्त्व-

---

मेकमुपलक्षणं कृत्वा शब्दस्य सकलव्यक्तिभिः सम्बद्धशक्तिकत्वाद् व्यभिचारो न भविष्यतीति कारिकाऽर्थः।

ननु केवलव्यक्तिपदार्थस्वीकारे घटत्वादिप्रकारकघटादिविशेष्यकशाब्दबोधं प्रति घटादिव्यक्तिविषयकशक्तिज्ञानाधीनोपस्थितिः कारणमिति कार्यकारणभावो वक्तव्यः। तथा च द्रव्यादिपदानामप्येवमापत्तौ घटपदाद् द्रव्यत्वप्रकारकशाब्दबोधापत्तिः। न च द्रव्यत्वप्रकारकबोधे द्रव्यपदजन्योपस्थितेः कारणत्वेन न दोष इति वाच्यम्। तात्पर्यान्तरात्तथाबोधानापत्तेः। द्रव्यत्वार्थकपदज्ञानत्वेन कारणता तु जातिशक्तिं विना न सम्भवति इत्यरुचिं मनसि निधायाह—वस्तुतस्त्विति। विशिष्टमिति। जातिविशिष्टा व्यक्तिरित्यर्थः। एवञ्च व्यक्त्योरुभयोरपि वाच्यत्वमत्र पक्षे इति बोध्यम्

एकमित्यस्य चायमिति। एकमेवान्तर्भाव्य कार्यकारणभाव इत्यर्थः। जातिरेकैवेति। एकपदेन व्यक्तिनिरासः। एवं च घटत्वप्रकारकघटविशेष्यकशाब्दबोधे घटत्वनिरूपितशक्तिज्ञानाधीनोपस्थितित्वेन कारणतेति फलितम्। नन्वेवं 'घटोऽस्ति' इत्यत्रेव 'घटत्वमस्ति' इत्यत्रापि तथा बोधापत्तिरिति चेत्तत्राह—तथा चेति। घटत्वांशेऽन्याप्रकारकेति। अन्यनिष्ठप्रकारतानिरूपितविशेष्यत्वाभाववद्वृत्तिशक्तिज्ञानत्वेनेत्यर्थः। निरवच्छिन्नप्रकारतासम्बन्धेन घटत्वशक्तिज्ञानत्वेन कारणतेति तात्पर्यम्। तथा च 'घटत्वमस्ति' इत्यत्र न घटत्वं प्रकार इति न दोषः। एतेन घटत्वशक्तिज्ञानत्वेन कारणतास्वीकारे घटत्वस्य प्रवेशाद् गौरवमित्यपास्तम्। अयमेव कुब्जशक्तिवादो मीमांसकसम्मतः। आधिक्यमिति। सत्त्व-

---

१. पूर्वपक्षविरोधेति—एकं नामार्थं इति पूर्वपक्षाद् विरोधस्तु इत्थं परिहर्तव्यो यद् द्विकमित्यादिपक्षेष्वपि जातिशक्तिज्ञानत्वेनैव कारणता लाघवान्न तु व्यक्त्यादिविषयकशक्तिज्ञानत्वेनाऽपीति शाब्दबोधीयकारणताऽवच्छेदकतया जातिरूपमेकमेवेति न पूर्वपक्षे एकस्यैव नामार्थता. अत्र तु द्वयोरित्याकारको विरोध इति हृदयम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्, *आधिक्यं पुंस्त्वम्, *अपचयः स्त्रीत्वम्, *तत्तच्छब्दनिष्ठं तत्तद्वाच्यं च। तमेव विरुद्धधर्ममादाय नटादिशब्दा भिद्यन्ते। केषांचिदनेकलिङ्गत्वव्यवहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात्। एवं च पदार्थपदे पुंस्त्वमेव, व्यक्तिपदे स्त्रीत्वमेव, वस्तुपदे नपुंसकत्वमेवेति सर्वत्रैव 'अयं पदार्थः' 'इयं व्यक्तिः' 'इदं वस्तु' इति व्यवहारः तटः तटी तटमिति चोपपद्यते। तच्च लिङ्ग*मर्थपरिच्छेदकत्वेनान्वेतीति *पश्वादिशब्दोक्तं पशु स्त्रियां नास्तीति पशुनेत्यादिविधिर्न च्छाग्यादीनङ्गत्वेन प्रयोजयतीति विभावनीयम्। न च व्यक्त्यादिशब्दोक्तलिङ्गस्येव पश्वादिशब्दोक्तस्यापि *साधारण्यं शङ्क्यम्। व्यक्तिशब्दस्य नित्यस्त्रीलिङ्गत्वेन तथा सम्भवेऽपि पशुशब्दस्य नित्यपुंलिङ्गत्वे प्रमाणाभावात्। "पश्वानतायुं गुहा चरन्तम्" "पश्वे नृभ्यो यथा गवे" इत्यादि *वेदे दर्शनाच्च। *मीमांसायां *चतुर्थे पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोर्विवक्षितत्वान्नानेकपशुभिः पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च। वस्तुतस्तु विशेषविध्यभावे उप्रत्ययान्तानां पुंस्त्वस्य व्याकरणे निर्णीतत्वाद्वेदभाष्येऽपि "जसादिषु च्छन्दसि वा वचनम्" इति नाभावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुंस्त्वनिर्णयात्, प्रकृते "छागो वा मन्त्रवर्णात्" इति न्यायेनैव *निर्णयः। मन्त्रवर्णो हि "छाग-

---

स्येत्यादिः। अपचयः—सत्वस्य न्यूनता। तत्तच्छब्दनिष्ठमिति। यथा चैतत्तथोपपादितं शब्देन्दुशेखरदीपके गुरुचरणैरिति तत एवावगन्तव्यम्।

अर्थपरिच्छेदकत्वेनेति। तद्विशेषणत्वेनेत्यर्थः। स्वाश्रयपदवाच्यत्वसम्बन्धेनेति यावत्। एवं च पुंलिङ्गस्य पशुपदस्य पुंव्यक्तिवाचकत्वेन पुंस्त्वविशिष्टपशोरेव विधानात् न छागया यागकरणत्वम्। अन्यथा परम्परया लिङ्गस्यार्थविशेषणत्वाभ्युपगमवैयर्थ्यापत्तेरित्याह—पश्वादिशब्दोक्तमिति। अस्य 'पुंस्त्वं पशुशब्दार्थपरिच्छेदकत्वेनान्वेतीति' इति शेषः। साधारण्यमिति। स्वाश्रयपदवाच्यत्वसम्बन्धेन स्त्रीपुंवृत्तित्वमित्यर्थः। वेदे इति। अस्य स्त्रीलिङ्गपशुशब्दस्येति शेषः। तेन नादेशाभावे, "ङिति ह्रस्वश्च" इति नदीत्वेन छान्दसत्वादाडभावे चोक्तरूपयोः सिद्धिरिति वोध्यम्। मीमांसायाम्—पूर्वमीमांसायाम्। चतुर्थे—अस्य 'अध्याये प्रथमपादे पञ्चमेऽधिकरणे' इति शेषः। निर्णय इति। "अग्नीषोमीयं पशुमालभेत"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्य वपाया मेदसः” इति श्रूयते । तत्र च्छागस्येति च्छागयामसंभावितमिति भवति ततः पुंस्त्वनिर्णय इति *विस्तरेण प्रपञ्चितं भूषणे । चतुष्कं-[1]संख्यासहितं त्रिकमित्यर्थः । पञ्चकं-कारकसहितं चतुष्कमित्यर्थः । नन्वन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव तद् वाच्यम् । तत एव लिङ्गादीनामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति चेत्सत्यम् । प्रत्ययवर्जिते दधि पश्येत्यादौ प्रत्ययमजानतोऽपि बोधात्प्रकृतेरेव वाचकत्वं कल्प्यते । लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्चेति । अत एवैषु पक्षेषु न निर्बन्धः प्रत्ययस्यैव वाचकताया युक्तत्वात् ।

“द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः” ।

इति वाक्यपदीयेऽपि पक्षद्वयस्य व्युत्पादनात् । शास्त्रे इति बहुषु स्थलेषु व्युत्पादनं व्यञ्जयितुम् । प्राधान्येन सरूपसूत्रादौ व्यक्तम् ॥१॥(२५)

शब्दस्तावच्छाब्दबोधे भासते ।

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
[2]अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥

इत्यत्र पशुपदेन नाश्वादीनां ग्रहणं, किन्त्वजस्यैव “छागस्य वपाया” इति श्रुतेः, इतिवत् तत एव पुंस्त्वस्यापि निर्णय इत्यर्थः । यत्र तु विधौ सन्दिग्धं तत्रापि “सन्दिग्धे तु वाक्यशेषात्” [जै०सू० १-४-१९-२९] इति न्यायेन निर्णयः । यथा “सारस्वतौ मेषौ भवतः”इत्यत्र तद्धितप्रकृतिः स्त्रीलिङ्गः पुँल्लिङ्गो वेति ‘सरस्वत्यै चरुम्’ ‘सरस्वते चरुम्’ इत्युभयथाऽपि दर्शनात् सन्देहे ‘एतद्वै दैव्यं मिथुनम्” इत्यर्थवादादेकशेषेणोभयोर्ग्रहणम्, “आग्नेयोऽष्टाकपालोऽमावास्यायाम्” इत्यत्र च तद्धितप्रकृतिरेकवचनान्ता बहुवचनान्ता वेति “अग्नये कृत्तिकाभ्यस्ते अस्मै” “अग्नयो दयिणं दत्वा” इत्यादिदर्शनात् सन्देहे “सोऽग्नये ध्रियस्व” इति वाक्यशेषादेकवचनान्तस्यैव ग्रहणमित्यादिविस्तरो बृहद्भूषणतोऽनुसन्धेय इत्याशयेनाह—विस्तरेण प्रपञ्चितं भूषणे

---

१. द्व्येकयोर्द्विवचनैकवचने इत्यादिशास्त्रप्रामाण्यात् सङ्ख्याऽपि प्रातिपदिकार्थोऽन्यथा द्वित्वादौ वर्तमानं यत्प्रातिपदिकं ततो द्विवचनादि इत्याद्यर्थस्यासङ्गत्याऽपत्तिः स्यादत आह—सङ्ख्यासहितमिति ।

२. अनुविद्धमिवेति—तादात्म्येन सम्बद्धमिवेत्यर्थः । शब्दतादात्म्यं ज्ञाने आरोपितमिति सूचयितुमिवपदप्रयोगः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्याद्यानुभविकोक्तेः। "विष्णुमुच्चारय" इत्यादावर्थोच्चारणासंभवेन विना शब्दविषयं शाब्दबोधासंगतिश्चेति सोऽपि प्रातिपदिकार्थः। न च लक्षणया निर्वाहः। निरूढलक्षणायाः शक्त्यनतिरेकात्। "जबगडदशमुच्चारय" इत्यादौ शक्याग्रहेण शक्यसम्बन्धरूपलक्षणाया अग्रहाच्च। अज्ञातायाश्च वृत्तेरनुपयोगात्। "गावमुच्चारय" इत्यादिभाषाशब्दानामनुकरणे साधुतासम्प्रतिपत्तेस्तेषां शक्त्यभावेन परनये लक्षणाया असम्भवाच्चेत्यभिप्रेत्य षोढाऽपि क्वचित्प्रातिपदिकार्थ इत्याह—

शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा।
नो चेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थोऽवभासते ॥२॥ (२६)

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः। यदि न भेदविवक्षा तदा श्रोत्रादिभिरुपस्थितोऽप्यर्थवद्भासते। अपिर्हेतौ। उपस्थितत्वाद्भासत इत्यर्थः। अयं भावः—अनुकार्यानुकरणयोर्भेदेऽनुकार्यस्य पदानुपस्थितत्वात्तत्सिद्धये शक्तिरुपेया। शब्दर्थयोरभेदे[1] प्रत्यक्षे विषयस्य[2] हेतुत्वात्स्वप्रत्यक्षरूपां[3] पदजन्योपस्थितिमादाय[4] शाब्दबोधविषयतोपपत्तिरिति। यद्यप्यतिप्रसङ्गवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुस्तथाऽप्यत्राऽऽश्रयतया[5] वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः। निरूपकताश्रयता-

१. अभेदे इति—अभेदपक्षे इत्यर्थः।

२. प्रत्यक्षे विषयस्येति—तत्तद्विषयकप्रत्यक्षं प्रति तत्तद्विषयस्य हेतुता। तत्र कार्यता विषयतासम्बन्धेन, कारणता तु तादात्म्येन बोध्या।

३. ननु अनुकार्यानुकरणयोर्भेदपक्षे अनुकार्येऽनुकरणनिरूपितशक्तेरभावेन शक्त्याऽनुकार्योपस्थित्यसम्भवेनानुकार्यस्य शाब्दविषयत्वं न सम्भवति, यतो हि तद्विषयकशाब्दबोधे शक्त्या पदजन्यतदर्थोपस्थितेर्हेतुतेति चेत्तत्राह—स्वप्रत्यक्षरूपामिति–स्वमनुकार्यमनुकरणंवा, तत्प्रत्यक्षरूपाम्=तद्विषयकश्रावणप्रत्यक्षरूपाम्।

४. पदजन्योपस्थितिमिति—अनुकरणात्मकपदजन्योपस्थितिं कारणत्वेनादाय स्वविषयकशाब्दबोधविषयत्वमुपपादनीयम्, अर्थादनुकरणजन्या याऽनुकार्यस्य श्रावणप्रत्यक्षरूपोपस्थितिः सैव शाब्दबोधे हेतुः। अत्र प्रत्यक्षे विषयस्य हेतुत्वकथनमुपस्थितौ पदजन्यत्वप्रदर्शनाय, तथाहि अनुकार्यप्रत्यक्षे विषयविधयाऽनुकरणात्मकपदस्य हेतुत्वमतः सा प्रत्यक्षरूपोपस्थितिः पदजन्येत्यायातम्, कारणस्य कार्यजनकत्वात्।

५. आश्रयतयेति—अनुकार्ये गो इत्यादौ मांसपिण्डार्थनिरूपिता शक्तिरस्त्येव,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्यतरसम्बन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यत इत्यनवद्यम्। सम्बन्धस्योभयनिरूप्यत्वात्पदादर्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसम्भवाच्चेति।

उक्तं च वाक्यपदीये—

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते॥ इति।
विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते।

इति चेति॥ २॥ (२६)

प्रसङ्गादनुकार्यानुकरणयोरभेदपक्षे साधकमाह—

अत एव गवित्याह भू सत्तायामितीदृशम्।
न प्रातिपदिकं नापि पदं साधु तु तत्स्मृतम्॥ ३॥ (२७)

"गवित्ययमाह" "भू सत्तायाम्" इत्येवमादयो यतोऽनुकरणशब्दा अनुकार्यान्न भिद्यन्तेऽतस्तेषामर्थवत्त्वाद्यभावात् "अर्थवदधातुः" इत्याद्यप्रवृत्तौ न पदत्वं न वा प्रातिपदिकत्वम्, अथ च साधुत्वमित्युपपद्यते। अन्यथा "प्रत्ययः" "परश्च" "अपदं न प्रयुञ्जीत" इति निषेधादिलङ्घनादसाधुतापत्तिरित्यर्थः॥ ३॥ (२७)

इति [२]रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे नामार्थनिर्णयः समाप्तः॥

ति॥ १-२-३॥ (२५-२६-२७)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां नामार्थनिर्णयः समाप्तः॥

या एव अनुकार्याभिन्नेऽनुकरणेऽपि आश्रयतासम्बन्धेन सत्त्वादनुकरणात्मकपदेऽपि वृत्तिमत्त्वमायातमिति भावः।

२. वृत्तिमत इति—आश्रयतासम्बन्धेन पदस्य निरूपकतासम्बन्धेन अर्थस्य विमरवाच्छाब्दबोधविषयत्वम्। इदं च बोधकत्वं शक्तिरिति सिद्धान्तिमताऽभिप्रायेण

इति सुबोधिन्यां नामार्थनिर्णयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ समासशक्तिनिर्णयः।

समासान्विभजते—

सुपां सुपा तिङा नाम्ना धातुनाऽथ तिङां तिङा ॥
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः ॥ १ ॥ (२८)

सुपां सुपा पदद्वयमपि सुबन्तम्। राजपुरुष इत्यादिः। सुपां तिङा पूर्वपदं सुबन्तमुत्तरपदं तिङन्तम्। पर्यभूषत्, अनुव्यचलत्। "गतिमतोदात्तवता तिङाऽपि समासः" इति वार्तिकात्समासः। सुपां नाम्ना कुम्भकार इत्यादिः। "उपपदमतिङ्" इति समासः। स च "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः" इति परिभाषया भवति सुबुत्पत्तेः प्राक्। अत्रोत्तरपदे सुबुत्पत्तेः प्रागित्यर्थात्। अन्यथा चर्मक्रीतीत्यादौ नलोपानापत्तेः। सुपां धातुना। उत्तरपदं धातुमात्रं न सुप्तिङन्तम्। कटप्रूः, आयतस्तूः। "क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च" इति वार्तिकात्। तिङां तिङा। पिवतखादता, पचतभृज्जता इत्यादि। आख्यातमाख्यातेन क्रियासातत्ये" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। तिङां सुबन्तेन पूर्वपदं तिङन्तमुत्तरं सुबन्तम्। जहिस्तम्ब "जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्। अयं षड्विधोऽपि समासः "सह सुपा" इत्यत्र योगविभागेन भाष्ये व्युत्पादितः स्पष्टः शब्दकौस्तुभादौ ॥ १ ॥ (२८)

स्वयं भाष्यादिसिद्धं तद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्य व्याप्त्यतिव्याप्त्यादिभिस्तल्लक्षणस्य प्रायिकत्वं च दर्शयति—

समासस्तु चतुर्धेति प्रायोवादस्तथा परः ॥
योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च ॥ २ ॥ (२९)
भौतपूर्व्यात्सोऽपि रेखागवयादिवदास्थितः ॥

---

१. सामान्यतो नामार्थं निरूप्य समासस्याऽपि नामविशेषत्वात्तत्र वक्ष्यमाणनिर्वाहाद्यातिरिक्ता शक्तिरिति तार्किकादिमतं खण्डयिष्यन् समासार्थं निरूपयितुं प्रसङ्गाद् समासभेदान् दर्शयति—समासानिति।

२. भौतपूर्व्यादिति—पूर्वं भूतो भूतपूर्वस्तस्य भावो भौतपूर्व्यं तस्मात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चतुर्धा, अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात्। अयं प्रायोवादः। भूतपूर्वः, दन्भूः, कारासूः, आयतस्तूः, वागर्थाविव इत्याद्यसंग्रहात्। तथा पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः, उभयपदार्थप्रधानो द्वन्द्वः, अन्यपदार्थप्रधानो बहुव्रीहिः, इत्यादिलक्षणमपि प्रायिकम्। उन्मत्तगङ्गम्, सूपप्रति, अर्धपिप्पली, द्वित्राः, शशकुशपलाशमित्यादौ परस्परव्यभिचारात्। तथा हि—उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः, अन्यपदार्थप्राधान्याद् बहुव्रीहिलक्षणातिव्याप्तिश्च "अन्यपदार्थे च संज्ञायाम्" इति समासात्। सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च। "सुप्प्रतिना मात्रार्थे" इति समासात्। अर्धपिप्पली इतितत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च "अर्धं नपुंसकम्" इति समासात्। एवं पूर्वकाय इत्यादौ द्रष्टव्यम्। द्वित्रा इति बहुव्रीहावुभयपदार्थप्राधान्याद् द्वन्द्वातिव्याप्तिर्बहुव्रीह्यव्याप्तिश्च। शशकुशपलाशमित्यादिद्वन्द्वे समाहारान्यपदार्थप्राधान्याद्बहुव्रीह्यतिव्याप्तिर्द्वन्द्वाव्याप्तिश्च स्यादिति भावः। सिद्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि द्रष्टव्यम्। *असम्भवश्चैषामित्याह—भूतपूर्वादित्यादि। रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तवपश्वलक्षणत्ववदेतेषामपि न समासलक्षणत्वम्। बोधकता तु *तद्वदेव स्यादिति भावः॥ २३॥ (२९३)

असम्भव इति। समासे विशिष्टशक्तेरेव वक्ष्यमाणतया तत्र पूर्वपदार्थोत्तरपदार्थादिभेदबुद्धेरभावेन पूर्वपदार्थप्रधानत्वादिलक्षणानामव्ययीभावादिसमासेषु न सम्भव इति भावः।

तद्वदेवेति। रेखागवयादिनिष्ठलाङ्गूलादेर्वास्तवपशुस्वरूपपरिचायकत्वेन तद्बोधकत्ववद् वृत्तेः पूर्वं विग्रहवाक्यगतपूर्वपदार्थादिप्राधान्यमादाय तत्तद्वृत्तिपरिचायकत्वादुक्तलक्षणानां तत्तद्वृत्तिबोधकतेति भावः॥ २३॥ (२९३)

भावेऽप्यत्र वृत्तेः पूर्वकालिकभवनाश्रयीभूतत्वादित्यर्थः। न तु वृत्त्यन्तरभावित्वमेतेषां लक्षणानाम्। वृत्तौ समुदाये एव शक्त्यङ्गीकारेणावयवानामानर्थक्येन पूर्वपदार्थादेवाऽभावेन तत्प्रधानत्वादेः सुतरां दौर्लभ्यादिति तत्त्वम्।

१. सूपप्रतीति—सूपस्य लेश इति विग्रहे सूपसम्बन्धिलेश इत्यर्थबोधे उत्तरपदार्थविशेष्यकत्वेन तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावलक्षणाऽव्याप्तिश्चेति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु पूर्वपदार्थप्राधान्यादि समासे सुवचम् । तथा हि—"समर्थः पदविधिः" इति सूत्रे भाष्यकारैरनेकधोक्तेष्वपि पक्षेषु जहत्स्वार्थाजहत्स्वार्थपक्षयोरेवैकार्थीभावव्यपेक्षारूपयोः पर्यवसानं लभ्यते । तत्राजहत्स्वार्थपक्ष उक्तव्यवस्था *नासम्भविनीत्याशङ्कां मनसिकृत्याऽऽह—

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ॥ ३ ॥ (३०)

भेदः संसर्ग उभयं वेति वाच्यव्यवस्थितेः ।

जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था । पक्षे वर्णवद् वृत्तौ पदानामानर्थक्यमित्यर्थः । अयं भावः—समासशक्त्यैव राजविशिष्टपुरुषभानसम्भवे न राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यम् , वृषभयावकादिषदेषु वृषादिपदानामिव । *अन्यथा राजपदेन विग्रहवाक्ये इव राज्ञः स्वातन्त्र्येणोपस्थितिसत्वाद् ऋद्धस्य राज्ञः पुरुषः इत्यत्रेव ऋद्धस्य राजपुरुष इत्यस्याप्यापत्तेरिति ।

अजहदिति । न जहति पदानि स्वार्थं यस्यां साऽजहत्स्वार्था ।

नासम्भविनीति । पूर्वपदार्थप्रधानत्वमव्ययीभावत्वमित्यादिपूर्वोक्तलक्षणव्यवस्थायास्तत्पक्षे वृत्तिघटकपूर्वोत्तरपदार्थयोः सत्वेन तदन्यतरस्य प्राधान्यसम्भव एवेत्यर्थः ।

अन्यथा । समासे विशिष्टशक्त्यस्वीकारे । व्यपेक्षासामर्थ्याविगमे इति यावत् । इत्यस्याप्यापत्तेरिति । सिद्धान्ते तु वृत्तौ विशिष्टशक्तेः सत्त्वेन 'राजपुरुषः' इत्यतो विशिष्टस्यैव राजस्वत्ववत्पुरुषरूपार्थस्योपस्थितौ मुख्यविशेष्यतया राजन्रूपार्थस्यानुपस्थितेस्तत्र न ऋद्धादिविशेषणान्वयः 'पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इति व्युत्पत्तः । एतद्बीजं तु (१९) कारिकाव्याख्यानावसरे पूर्वमेवोक्तम् ।

ननु यत्र व्यस्तस्थलेऽर्थबोधाय तत्तत्पदनिष्ठया क्लृप्तशक्त्यैव समासेऽपि पदार्थोपस्थितौ आकाङ्क्षादिवशादन्वयबोधेनाभीप्सितार्थलाभो न तत्र विशिष्टशक्तिः कल्प्यते, किन्तु यत्र 'प्राप्तोदकः' इत्यादौ पदज्ञानक्रमेण पदार्थोपस्थितेः प्राप्तिकर्त्रभि-

---

१. जहति पदानीति—जहति स्वानि वृत्तिघटकपदानि यमर्थं स जहत्स्वः, तादृशोऽर्थो यस्यामिति विग्रहेण समानाधिकरणयोरेवाऽत्रापि बहुव्रीहिः । मूलं तु व्यधिकरणाभिप्रायेण ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अयमभिप्रायः—राजपुरुषादिसमासादौ नातिरिक्ता शक्तिः, कल्पकाभावात्, क्लृप्तराजादिपदादेवार्थोपस्थितिसम्भवे तत्कल्पनस्य गौरवपराहतत्वाच्च। क्लृप्तशक्तित्यागोप्यप्रामाणिकः कल्प्येत। तथा चाऽऽकाङ्क्षादिवशात्क्लृप्तशक्त्यैव विशिष्टार्थबोधः। अयमेव व्यपेक्षापक्षो मतान्तरत्वेन भाष्यकारैरुक्तः। न चात्र मते समासे ऋद्धस्येतिविशेषणान्वयापत्तिः। "सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणायोगो न" इति वार्तिकात्[1]। तथा चैतन्मतवादिनां पूर्वोत्तरपदार्थसत्त्वात्पूर्वपदार्थप्रधान इत्यादिव्यवस्था सूपपादेति भावः।

प्रसङ्गाद् वृत्तिभेदमपि निरूपयति—ते पुनरिति। द्वे अपि वृत्ती त्रिविधे वाच्यत्रैविध्यात्। वाच्यमेवाऽऽह—भेद इत्यादि। भेदोऽन्योऽन्याभावः। तथा च राजपुरुष इत्यादाव*राजकीयभिन्न इति बोधः। अस्यावाच्यत्वे च राजपुरुषः सुन्दर इतिं वद्राजपुरुषो *देवदत्तस्येत्यपि स्यात्। *वाच्यत्वे *तद्विरोधान्नैवं प्रयोग इति भावः।

राजसम्बन्धवानित्येव शाब्दभानं, भेदस्तूत्तरकालमुपतिष्ठत इत्याशङ्कनाऽऽह—संसर्ग इति।

*विनिगमनाविरहम*स्वामिकेऽपि राजपुरुष इत्यादिप्रयोगापत्तिं च

पुदकमित्येवार्थबोध इति नाभीप्सितार्थलाभस्तत्रैव विशिष्टशक्तिः कल्प्यते इति मतमाह—अयमभिप्राय इति।

अराजकीयभिन्न इति। राजेतरनिरूपितस्वत्वसम्बन्धवद्भिन्न इत्यर्थः। देवदत्तस्येति। सुन्दरादिविशेषणान्तरान्वयवद् 'देवदत्तस्य' इति विशेषणान्वयः स्यात्। वाच्यत्वे इति। 'भेदस्य' इत्यादिः। तद्विरोधादिति। 'राजपुरुष' इत्यतः प्रतीयमाने राजेतरदेवदत्तादिस्वत्वाभाववति पुरुषे 'देवदत्तस्य' इति विशेषणान्वये देवदत्तस्वत्ववत्त्वस्य प्रत्यय इति अभावप्रतियोगिनोः समानाधिकरण्यविरोधादित्यर्थः।

विनिगमनाविरहमिति। अस्य 'अन्यतरस्य वाच्यत्वे' इत्यादिः। अस्वा-

---

१. वार्तिकादिति—समासेऽतिरिक्तशक्तिकल्पनापेक्षयैतद्वार्तिकारम्भे लाघवमिति भावः। एतेन नवीनवचनस्वीकारे गौरवमित्यपास्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मनसि कृत्वोभयं वाच्यमित्याह—उभयं वेति। तथा चाराजकीयभिन्नराजसम्बन्धवांश्चायमिति बोधः ॥ ३३ ॥ (३०३)

व्यपेक्षावादस्यैव युक्तिभाष्यविरुद्धत्वात्तन्मूलकः[1] पूर्वपप्रधान दार्थइत्याद्युत्सर्गोऽप्ययुक्तः। किं तु रेखागवयेनोत्सर्गोऽपि परम्परयैव बोधक इत्यान समाधत्ते—

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ॥ ४ ॥ (३१)
बहूनां वृत्तिधर्माणां वचनैरेव साधने ॥
स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः ॥ ५ ॥ (३२)

समास इति वृत्तिमात्रोपलक्षणम्। "समर्थः पदविधिः" इत्यत्र पदमुद्दिश्य यो विधीयते समासादिः स समर्थः, विग्रहवाक्याभिधाने शक्तः सन् साधुरिति सूत्रार्थस्य भाष्याल्लाभात्। *पदोद्देश्यकविधित्वं च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चस्वपि वृत्तिष्वस्त्येव। शक्त्यस्वीकर्तॄणां व्यपेक्षावादिनां मते दूषणं शक्तिसाधकमेवेत्याशयेनाऽऽह—पङ्कजशब्दवदिति। पङ्कजनिकर्तुरपि योगादेवोपस्थितौ *तत्रापि समुदायशक्तिर्न सिध्येत्। न च पद्मत्वरूपेणोपस्थितये तत्कल्प्यत इति वाच्यम्। चित्रग्वादिपदेऽपि स्वामित्वेनोपस्थितये *तत्कल्पनावश्यकत्वात्। लक्षणयैव तथोपस्थितिरिति चेत्पङ्कजपदेऽपि *सा सुवचा। *एवं *रथकारपदेऽपि। तथा च "वर्षासु रथकारोऽग्निमादधीत" इत्यत्रापि *विना

मिकेऽपीति। अस्य 'राजेतरदेवदत्तादिस्वत्वाभावस्यात्र सत्वेन' इति शेषः ॥ ३३ ॥ ३०३।

पदोद्देश्यकविधित्वमिति। पदसंज्ञाप्रयोजकसुप्तिङन्यतरविधायकशास्त्रीयोद्देश्यतावच्छेदकसम्पादकविधित्वमित्यर्थः। तत्रापि—पङ्कजपदेऽपि। तत्कल्पनेति। समुदायशक्तिकल्पनेत्यर्थः। सा—लक्षणा। एवम्—विशिष्टशक्त्यनभ्युपगमे। रथकारपदेऽपीति। समुदायशक्तिर्न सिद्ध्येत्' इत्यनुषङ्गेणात्र सम्बध्यते। विना लक्षणामिति। रथकारपदस्य 'रथं करोति' इति योगमात्रेण द्विजपरकत्वस्यापि सम्भवात् तस्य चाधाने कर्तृत्वेनान्वयसम्भवेन लक्षणाबीजस्य मीमांसकीयाऽ

१. तन्मूलक इति—व्यपेक्षावादमूलक इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लक्षणां क्लृप्तप्रयोगेन ब्राह्मणादिविषयतयैवोपपत्तौ *तत्कल्पनां कृत्वा *जातिविशेषस्याधिकारित्वं प्रकल्प्या*पूर्वविद्याकल्पनमप्ययुक्तं स्यादिति भावः।

साधकान्तरमाह—बहूनामिति। वृत्तेर्धर्मा विशेषणांलिङ्गसंख्याद्ययोगादयस्तेषां वचनैः साधने गौरवमित्यर्थः। अयं भावः—विशिष्टशक्त्यस्वीकारे 'राज्ञः पुरुषः' इत्यत्रेव 'राजपुरुष' इत्यत्रापि स्याद्विशेषणाद्यन्वयः राजपदेन स्वतन्त्रोपस्थितिसत्त्वात्। विभाषावचनं च *समासनियमवारणाय कार्यम्।

ननु "सविशेषणानाम्" इति वचनान्न विशेषणाद्यन्वयः। विभाषावचनं च कृतमेवेत्याशङ्कां समाधत्ते—वचनैरेवेति। न्यायसिद्धमेव सूत्रम्। व्यपेक्षाविवक्षायां वाक्यस्यैकार्थीभावे समासस्येति स्वभावत एव प्रयोगनियमसंभवात्। सविशेषणेत्यपि विशिष्टशक्तौ राज्ञः पदार्थैकदेशतयाऽन्वयासंभवान्न्यायसिद्धमिति भावः। *अत एव व्यपेक्षापक्षमुद्भाव्य "अथैतस्मिन् व्यपेक्षायां सामर्थ्ये योऽसावेकार्थीभावकृतो विशेषः *स वक्तव्यः" इति भाष्यकारेण दूषणमप्युक्तम्॥ ५॥ (३२)

न्वयानुपपत्तिरूपस्याभावात् लक्षणाया अभावे इति तदर्थः। तत्कल्पनाम्। रूढिशक्तिकल्पनाम्। **जातिविशेषस्य—**

रथकारस्तु माहिष्यात् करण्यां यस्य सम्भवः।

इति स्मृत्युक्तप्रतिलोमजातीयस्येत्यर्थः। **अपूर्वविद्याकल्पनमिति।** रथकाराधिकरणे हि रथकारपदस्य योगरूढत्वेन (विशिष्टशक्तिमत्त्वेन) न ब्राह्मणादिविषयकत्वं "वर्षासु रथकारोऽग्निमादधीत" इति विधेः किन्तु प्रतिलोमजातीयविषयकत्वम्। तस्य च वेदाध्ययनाभावाद्वेदविहिताधानाधिकाराऽन्यथाऽनुपपत्त्या तावन्मात्रोपयोगिवेदभागाध्ययनं कल्पनीयमिति मीमांसकैः सिद्धान्तितम्। तच्चात्र पक्षेऽयुक्तमित्यर्थः।

समासनियमवारणायेति। समासस्य नित्यत्ववारणायेत्यर्थः। तेन "राज्ञः पुरुषः" इत्यादिव्यस्तप्रयोगोपपत्तिः। **अत एवेति।** व्यपेक्षापक्षस्य गौरवपराहतत्वादेवेत्यर्थः। **स वक्तव्य इति।** वाचनिक एव वक्तव्यः स्यात्। एकार्थीभावे तु सोऽर्थसिद्ध इति तदर्थः॥ ५॥ (३२)

---

१. स्वतन्त्रोपस्थितिसत्त्वादिति—उपस्थितौ स्वातन्त्र्यञ्च मुख्यविशेष्यताकत्वम्। तेन नित्यो घट इत्यत्र घटत्वे नित्यपदार्थाऽन्वयो न।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथा धवखदिरौ, निष्कौशाम्बिः, गोरथो, घृतघटो, गुडधानाः, केशचूडः, सुवर्णालङ्कारो, द्विदशः, सप्तपर्ण, इत्यादावितरेतरयोग-अति-क्रान्त-युक्त-पूर्ण-मिश्र-संघात-विकार-सुच्प्रत्ययलोपो वीप्साद्यर्थो वाचनिको वाच्य इत्यतिगौरवं स्यादिति दूषणान्तरमाह—

*चकारादिनिषेधोऽथ बहुव्युत्पत्तिभञ्जनम् ।
कर्तव्यं ते न्यायसिद्धं त्वस्माकं तदिति स्थितिः ॥६॥ (३३)

आदिना घनश्यामः, हंसगमनः, इत्यादाविवादीनां च संग्रहः । दूषणान्तरमाह—बहुव्युत्पत्तिभञ्जनमिति । अयमाशयः—चित्रगुरित्यत्र स्वाम्यादिप्रतीतिरनुभवसिद्धा । न च *तत्र लक्षणा । प्राप्तोदको ग्राम इत्यादौ* तदसंभवात् । *प्राप्तिकर्त्रभिन्नमुदकमित्यादिबोधोत्तरं तत्संबन्धिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्म ग्राम इत्यर्थालाभात् । प्राप्तेतिक्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चेत् ? तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नप्राप्तिकर्मेति स्यात् । *अन्यथा *समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः । प्राप्तेर्धात्वर्थतया कर्तृतासंबन्धेन भेदेनोदकस्य तत्रा*न्वयासंभवाच्च । अन्यथा 'देवदत्तः पच्यते' इत्यतः कर्तृतासम्बन्धेन देवदत्तस्यान्वयसंभवेनानन्वयानापत्तेः । अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोत्तरं तत्संबन्धिग्रामो लक्ष्यत इति चेन्न । प्राप्तेर्धात्वर्थतया क्तार्थकर्तरि विशेष्यताया असंभवात् । "प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यम्" इति व्युत्पत्तेः । प्राप्तपदे प्राप्तेर्विशेष्यत्वे तस्या एव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च । एवमूढरथः, उपहृतपशुः, उद्धृतौदना, बहुपाचिकेत्यादावपि द्रष्टव्यम् । अत्र हि

चकारादिनिषेध इति । विशिष्टशक्त्यस्वीकारे धवखदिरावित्यादावितरेतरयोगादीनां प्रतीतये तद्वाचकचकारादीनामावश्यकतया तेषामृते लोपात् समासे श्रवणाभावाऽनुपपत्त्या चकारादीनां निषेधो—लोपो वक्तव्यः स्यादित्यर्थः । तत्र—स्वामिनि । पदद्वयस्येतिशेषः । तदसम्भवादिति । पदद्वयलक्षणयाऽप्यभीप्सितार्थवाक्यानिर्वाहादिति भावः । तदेव विशदयति—प्राप्तेति ।

अन्यथा—अभेदेन तयोरन्वयानङ्गीकारे । समानाधिकरणेति । समानविभक्त्यन्तेत्यर्थः । अन्वयासम्भवादिति । भेदसम्बन्धेन नामार्थनिष्ठप्रकारता-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रथकर्मकवहनकर्ता, पशुकर्मकोपहरणोद्देश्यः, ओदनकर्मकोद्धरणावधिः, बहुपाककर्त्रधिकरणम्, इति बोधाभ्युपगमात्। अतिरिक्तवृत्तिपक्षे च घटत्वविशिष्टे घटपदस्ये[1] वोदककर्तृकप्राप्तिकर्मत्वविशिष्टे प्राप्तोदक इत्यादिसमुदायशक्त्यैव निर्वाह इति भावः॥ ६॥ (३३)

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना।

क्लृप्तत्यागश्चास्ति तव तत्किं शक्तिं न कल्पयेः॥७ (३४)

अयं भावः—चित्रगुरित्यादिषु चित्रगोस्वाम्यादिप्रतीतिर्न विना शक्तिमुपपद्यते। न च *तत्र लक्षणा। सा हि न चित्रपदे। चित्रस्वामी गौरितिबोधापत्तेः। नापि गोपदे।। गोः स्वामी चित्र इत्यन्वयबोधापत्तेः। चित्रादिमात्रस्य लक्ष्यैकदेशत्वेन तत्र गवादेरन्वयायोगात्। न च चित्राभिन्ना गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं तादृशगोस्वामी गोपदेन लक्ष्यत इति वाच्यम्। गोपदस्य चित्रपदस्य वा विनिगमनाविरहेण लक्षकत्वासंभवात्। न च गोपदे साक्षात्संबन्ध एव विनिगमक इति वाच्यम्। *एवमपि प्राप्तोदकः, कृतविश्व इत्याद्यषष्ठ्यर्थबहुव्रीहौ विनिगमकाप्राप्तेः। यौगिकानां कर्त्रर्थकतया साक्षात्संबन्धाविशेषात्।

न च पदद्वये लक्षणेति नैयायिकोक्तं युक्तम्। बोधावृत्तिप्रसङ्गात्। न च परस्परं तात्पर्यग्राहकत्वादेकस्यैवैकदा लक्षणा न द्वयोरिति न बोधावृत्तिरिति वाच्यम्। एवमपि विनिगमनाविरहतादवस्थ्येन लक्षणाया असंभवात्। न च चरमपद एव सा, प्रत्ययार्थान्वयानुरोधात्, प्रत्ययानां संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेरिति वाच्यम्। एवं हि बहुव्रीह्यसंभवापत्तेः। "अनेकमन्यपदार्थे" इत्यनेनानेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे *तद्विधानात्।

निरूपितधात्वर्थनिष्ठविशेष्यतया शाब्दबोधे प्रातिपदिकप्रकृतिकविभक्तिपदजन्योपस्थितेः कारणत्वेनात्र विभक्त्यर्थमन्तरा तादृशान्वयासम्भवादित्यर्थः॥ ६॥ (३३)

तत्र—स्वाम्याद्यर्थे। 'समुदायघटकपूर्वोत्तरपदयोः' इति शेषः। एवम्—उत्तरपदमात्रस्य लक्षकत्वे। तद्विधानादिति। अस्य 'प्रकृते चोत्तरपदस्यैवान्य-

---

१. घटपदस्येवेति—यथा घटत्वविशिष्टे घटपदस्य शक्तिरतस्तस्य विशिष्टोपस्थापकत्वं, तथैव प्राप्तोदकादिसमुदायस्याऽपि विशिष्टे शक्तिस्वीकारेणोदककर्तृकप्राप्तिकर्म-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किं चैवं सति घटादिपदेष्वपि चरमवर्ण एव वाचकताकल्पना स्यात्। पूर्वपूर्ववर्णानां तात्पर्यग्राहकत्वेनोपयोगसंभवात्। एवं सति चरमवर्णमात्रश्रवणेऽर्थबोधापत्तिरिति चेदत्राप्युदकपदमात्रश्रवणादर्थप्रत्ययापत्तिस्तुल्येत्यन्यत्र विस्तरः। एवं चाषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना, *उक्तयुक्तेः, अगत्या शक्त्यन्तरकल्पना। क्लृप्तत्यागः क्लृप्तशक्त्योपपत्तिरिति *व्युत्पत्तित्यागश्च तथास्ति, तत्किं सर्वत्र समासे शक्तिं न कल्पयेरिति वाक्यार्थः।

यत्तु व्यपेक्षावादिनो नैयायिकमीमांसकादयः—न समासे शक्तिः। राजपुरुष इत्यादौ राजपदादेः संबन्धिलक्षणयैव राजसंबन्ध्यभिन्नः पुरुष इति बोधोपपत्तेः। अत एव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्येत्यादिविशेषणान्वयः। न वा घनश्यामो निष्कौशाम्बिर्गोरथ इत्यादाविवादिप्रयोगापत्तिः उक्तार्थतयेव क्रान्तादिपदप्रयोगासंभवात्। न वा "विभाषा" इति सूत्रावश्यकत्वम्। लक्षणया राजसंबन्ध्यभिन्न इति बुबोधयिषायां समासस्य राजसंबन्धवानिति बुबोधयिषायां विग्रहस्येत्यादिप्रयोगनियमसंभवात्। *नापि पङ्कजपदप्रतिबन्दी शक्तिसाधिका। तत्रावयवशक्तिमजानतोऽपि बोधात्। न च शक्त्यग्रहे लक्षणया तेभ्यो विशिष्टार्थप्रत्ययः संभवति। अत एव राजादिपदशक्त्यग्रहे 'राजपुरुषः' 'चित्रगुः' इत्यादौ न बोधः। न च चित्रगुरित्यादौ लक्षणासंभवेऽप्यषष्ठ्यर्थबहुव्रीहौ लक्षणाया असंभवे बहुव्युत्पत्तिभञ्जनापत्तेरिति वाच्यम्।

पदार्थप्रतिपादकत्वेन तदप्राप्तेः' इति शेषः। उक्तयुक्तेरिति। प्राप्तोदकादावन्वयानुपपत्तिरुपयुक्तेरित्यर्थः। व्युत्पत्तित्याग इति। "प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यम्" इति व्युत्पत्तित्याग इत्यर्थः। तथा च पूर्वोक्तेन 'अथोदकाभिन्नकर्तृका प्राप्तिः' इत्यादिमूलस्थप्रकारेण तत्राभीप्सितार्थबोधोपपत्तिरिति भावः।

पङ्कजदृष्टान्ते वैषम्यं दर्शयति—नापीति।

स्वविशिष्टस्योपस्थापकत्वेन नोक्ताऽनुपपत्तिः। नामार्थयोरित्यादिव्युत्पत्तिर्हि पृथगुपस्थितिविषयणी इति भावः।

१. पङ्कजपदप्रतिबन्दीति—अनिष्टान्तरापादकोक्तिः प्रतिबन्दी। पङ्कजपदे समुदाये शक्तिस्वीकारोक्तिर्न समासेऽनभिलषितविशिष्टशक्तिसाधिकेति तत्त्वम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तोदकइत्यादावुदकपद एव लक्षणास्वीकारात् । पूर्वपदस्य यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलम्बितत्वात् । प्रत्ययानां संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्त्यनुरोधाच्च । घटादिपदे चातिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते विशिष्टस्यैव सङ्केतितत्वात् । बोधकत्वस्यापि प्रत्येकं वर्णेष्वसत्त्वात् । प्रकृते चात्यन्तसंनिधानेन प्रत्ययार्थान्वयसौलभ्यायोत्तरपद एव सा कल्प्यत इति विशेषः[1] । स्वीकृतं च घटादिपदेष्वपि चरमवर्णस्यैव वाचकत्वं मीमांसकमन्यैरित्याहुः ।

अत्रोच्यते—समासे शक्त्यस्वीकारे तस्य प्रातिपदिकसंज्ञादिकं न स्यात्, अर्थवत्त्वालाभेन "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यस्याप्रवृत्तेः । न च "कृत्तद्धितसमासाश्च" इत्यत्र समासग्रहणात्सा, तस्य नियमार्थताया भाष्यसिद्धाया वैयाकरणभूषणे स्पष्टं प्रतिपादितत्वात् । समासवाक्ये शक्त्यभावेन शक्यसंबन्धरूपलक्षणाया अप्यसंभवेन लाक्षणिकार्थवत्त्वस्याप्यसंभवात् । अथ "तिप्तस्" इत्यारभ्य "ङ्योस्सुप्" इति तिप्प्रत्याहारो भाष्यसिद्धः । तमादाय "अतिप्प्रातिपदिकम्" इत्येव सूत्र्यताम्, कृतमर्थवदादिसूत्रद्वयेन, समासग्रहणं च नियमार्थमस्तु, तथा च अतिप्—तिबन्तभिन्नं प्रातिपदिकमित्यर्थात्समासस्यापि सा स्यादिति चेत्तथाऽपि प्रत्येकं वर्णेषु संज्ञावारणायार्थवत्त्वावश्यकत्वेन समासाव्याप्तितादवस्थ्यमेव । तथा च प्रातिपदिकसंज्ञारूपं कार्यमेवार्थवत्त्वमनुमापयति[2] धूम इव वह्निम् । किंचैवं चित्रगुमानयेत्यादौ कर्मत्वाद्यनन्वयापत्तिः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः । विशिष्टोत्तरमेव प्रत्ययोत्पत्तेर्विशिष्टस्यैव प्रकृतित्वात् ।

यत्तु संनिहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरेव कल्प्यत इति, तन्न, उपकुम्भम्' अर्धपिप्पली' इत्यादौ पूर्वपदार्थे विभक्त्यर्थान्वयेन व्यभिचारात् । न च तत्रापि संनिधानमेव, आनुशासनिकसंनिधेर्विवक्षितत्वात् । तथा च यत्पदोत्तरं याऽनुशिष्टा सा तदर्थगतं स्वार्थं बोधयति । समासे च समस्यमानपदोत्तरमेवानुशासनमिति वाच्यम्, अर्थवत्सूत्रेण विशिष्टस्यैव प्रातिपदिकत्वेन विशिष्टोत्तरमेव विभक्त्यनुशासनात् ।

---

१. विशेष इति—घटादिपदापेक्षया समासस्य लक्षणायां वैषम्यमित्यर्थः ।

२. अनुमापयतीति—यथा पर्वतो वह्निमान् धूमादित्यत्र धूमेन (धूमज्ञानेन)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रकृतित्वाश्रये विभक्त्यर्थान्वय इत्येव कल्प्यत इति चेत्तर्हि 'पङ्कजमानय' 'दण्डिनं पश्य' 'शूलिनं पूजय' इत्यादौ पङ्कदण्डशूलेष्वानयनदर्शनपूजनादेरन्वयप्रसङ्गः। 'अघटानानय' इत्यत्र घटेऽप्यानयनान्वयापत्तिश्च। न च दण्डादीनां विशेषणतया न तत्राऽऽयनाद्यन्वयः, 'पाकान्नीलः' 'धर्मात्सुखी' इत्यादौ पाकधर्मादिजन्यताया रूपसुखादावनन्वयप्रसङ्गात्। यच्च प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमिति, तन्न, घटं पश्येत्यत्र घटपदात्समवायेनोपस्थिताकाशवारणाय वृत्त्या प्रकृत्यर्थत्वस्याऽऽवश्यकत्वात्। अथ प्रत्ययप्राग्वर्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वमिति चेन्न 'गामानयति कृष्णो दण्डेन' इत्यत्र कृष्णे तृतीयार्थान्वयप्रसङ्गात्। अथ समस्यमानपदार्थगतस्वार्थबोधकत्वं समासोत्तरविभक्तेः कल्प्यत इति चेन्न, अक्लृप्तकल्पनां क्लृप्तव्युत्पत्यागं चापेक्ष्य समुदायशक्तिकल्पनस्यैव युक्तत्वादिति दिक्।

अपि च समासे विशिष्टशक्त्यस्वीकारे 'राजपुरुषः' 'चित्रगुः' 'नीलोत्पलम्' इत्यादौ सर्वत्रानन्वयप्रसङ्गः, राजपदादेः संबन्धिनि लक्षणायामपि 'तण्डुलः पचति' इत्यादौ कर्मत्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्रातिपदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात्पुरुषादेस्तथात्वाभावात्। 'तण्डुलः शुभ्रः' इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तण्डुलादेस्तस्य च शुक्लेऽभेदेनैवान्वयः। "शुभ्रेण तण्डुलेन" इत्यादौ च विशेषणविभक्तिरभेदार्था, पार्ष्णिको वाऽन्वय इति नातिप्रसङ्गः। तथा च समासे परस्परमन्वयासंभवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः।

वह्नेरनुमानं पर्वतात्मकपक्षे तथैवाऽत्रापि समासोऽर्थवान् प्रातिपदिकसंज्ञोद्देश्यत्वात् यद्यत्प्रातिपदिकसंज्ञोद्देश्यं तत्तदर्थवद् यथा घटपटादि, तथाचाऽयं समासोऽपि तस्मात्तथेति पञ्चावयववाक्यप्रयोगेण समासेऽर्थवत्त्वं विज्ञाय परेऽप्यतिरिक्तां शक्तिं स्वीकुर्वन्त्विति भावः।

१. ननु तावताऽपि शुभ्रं तण्डुलं शुभ्रेण तण्डुलेनेत्यादौ द्वितीयादेः प्रातिपदिकार्थे विधानाभावेन व्यभिचारो दुर्वार एवात आह—शुभ्रेण तण्डुनेति।

२. अभेदार्थेति—नन्वत्र द्वितीयादीनामभेदार्थेऽविधानात्कथमिदं सङ्गच्छते इति चेन्न, कर्माद्यभेदस्य कर्मादिरूपतया कर्मणि द्वितीयेत्यादिभिरेव अभेदे द्वितीयादिविधानात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किं च 'राजपुरुषः' इत्यादेः संबन्धिनि संबन्धे वा लक्षणा ? नाऽऽद्यः, 'राज्ञः पुरुषः' इति विवरणविरोधात्समासऽमानार्थकवाक्यस्यैव विग्रहत्वात् । अन्यथा तस्माच्छक्तिनिर्णयो न स्यात् । नान्त्यः, 'राजसंबन्धरूपः पुरुषः' इति बाधप्रसङ्गात् । विरुद्धविभक्तिरहितप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरित्यादि प्रपञ्चितं वैयाकरणभूषणे । अत एव "वषट्कर्तुः प्रथमभक्षः" इत्यत्र न भक्षमुद्दिश्य प्राथम्यविधानं युक्तमेकप्रसरत्वभङ्गापत्तेरिति* तृतीये, "त्र्यङ्गैः स्विष्टकृतं यजति" इत्यत्राङ्गानुवादेन त्रित्वविधानं न युक्तम्, एकप्रसरताभङ्गापत्तेरिति *दशमे च निरूपितं संगच्छते । संगच्छते चारुणाधिकरणारम्भः । अन्यथा "अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति" इत्यत्रारुणपदवदितरयोरप्येकाब्दत्वादिगुणमात्रवाचकतयाऽमूर्तत्वात्क्रीणातौ करणत्वासंभवस्य तुल्यत्वादारुण्यस्यैव वाक्याद्भेदशङ्काया *असंभवादिति प्रपञ्चित भूषणे । तस्मात्समासशक्तिपक्षो जैमिनीयैरवश्याभ्युपेय इत्यास्तां विस्तरः ॥ ७ ॥ (३४)

'राजपुरुषः' इत्यादौ राजा चासौ पुरुषश्चेत्येव विग्रहः । 'चित्रगुः' इत्यादौ च चित्राणां गवामयमित्येव, समानार्थत्वानुरोधात् । यद्यपि प्रथमान्तानामेव बहुव्रीहिरिति "शेषो बहुव्रीहिः" इति सूत्राल्लभ्यत* इति प्रथमान्तं पक्षे वाक्यं 'चित्रा गावो यस्य' इत्येवं संभवत्येव, "षष्ठी" इति समासविधानाद् 'राज्ञः पुरुषः' इति पक्षे वाक्यं, तथाऽपि तस्य न विग्रहत्वं भिन्नार्थत्वात्, किं तूक्तस्यैवेति मीमांसकाः । तान्प्रसङ्गान्निरस्यति—

आख्यातं तद्धितकृतोर्यत्किंचिदुपदर्शकम् ।

गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः ॥ ८ ॥ (३५)

तद्धितकृतोर्यत्किंचिदर्थबोधकं विवरणम् *आख्यातं, तत्र विपर्ययो

तृतीये इति । अस्य 'अध्याये पञ्चमपादे दशमाधिकरणे' इति शेषः । दशमे इति । अस्य 'अध्याये सप्तमपादे तृतीयाधिकरणे' इति शेषः । असम्भवादिति । अयं चास्मत्कृतलघुपूर्वमीमांसाधिकरणकौमुदीस्थपरिशिष्टप्रकरणेऽरुणाधिकरणे एव शङ्कामुखेन निरूपित इति तत एवावगन्तव्यम् ॥ ७ ॥ (३४)

लभ्यते इति । निरूपितं चैतत् शब्देन्दुशेखरदीपकेऽस्मत्कृतबहुव्रीहिप्रकरणटिप्पणे इति तत एवावगन्तव्यम् । आख्यातम्—तिङन्तम् ॥ ८ ॥ (३५)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दृष्टः। तथा हि—'आक्षिकः' 'कुम्भकारः' इत्यत्राक्षकरणकव्यापाराश्रयः, कुम्भानुकूलव्यापाराश्रय इति बोधः। 'अक्षैर्दीव्यति' 'कुम्भं करोति' इत्यत्राक्षकरणिका देवनानुकूला भावना, कुम्भोत्पत्त्यनुकूला भावनेति बोधः कृत्प्रत्यये कारकाणामाख्याते भावनायाः प्राधान्यं वदतो मीमांसकस्यापीति गुणप्रधानभावांशव्यत्यासो न विवरणत्वबाधक इति नात्र पाक्षिकस्य 'चित्रा गावो यस्य' इत्यादेर्विग्रहत्वे बाधकमस्तीति भावः ॥ ८ ॥ (३५)

नन्वस्तूक्तरीत्या सर्वत्र समासे शक्तिः, अस्तु च तथा विग्रहस्तथाऽपि षष्ठीतत्पुरुषकर्मधारययोः शक्तिमत्त्वाविशेषात् *निषादस्थपत्यधिकरणसिद्धान्तसिद्धिर्न स्यादित्यत आह—

पर्यवस्यच्छाब्दबोधाददूरप्राक्क्षणस्थितेः।
शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम् ॥ ९ ॥ (३६)

---

*निषादस्थपत्यधिकरणेति। "वास्तुमयं रौद्रं चरुं निर्वपेत्" इति प्रकृत्य श्रूयते "एतया निषादस्थपतिं याजयेत्" इति। वास्तुशब्दः किञ्चित्प्रकृतिद्रव्यविशेषमाह। एतस्यामिष्टावधिकारी स्थपतिशब्दवाच्यस्त्रैवर्णिकः। कुतः। निषादानां स्थपतिः—अधिपतिः इति षष्ठीसमासस्य त्रैवर्णिके सम्भवात्, तस्य चाधीतवेदत्वेन विद्यासम्भवाच्च इति चेत्—

मैवम्। 'निषादश्चासौ स्थपतिश्च' इति कर्मधारयसमासस्य मुख्यत्वेन संकरजातिविशेषस्यैवाधिकारात्। षष्ठीसमासे तु संकीर्णजातिविशेषवाचिना निषादशब्देन तत्सम्बन्ध उपलक्ष्येत, नत्वयं कर्मधारये दोषोऽस्ति। अतस्तात्कालिकाचार्योपदेशादिना विद्यां सम्पाद्य धनिको निषादो रौद्रयागं कुर्यादिति "निषादः स्याच्छब्दसामर्थ्यात्" [जै० सू० ६–१–१२–५२] निषादाभिन्नः स्थपतिरेव निषादस्थपतिशब्दबोध्यः। अन्तरङ्गत्वेन तथाविधेऽर्थे शीघ्रोपस्थितिजनकत्वानुकूलशक्तिमत्त्वसामर्थ्यात्' इत्यर्थकसूत्रव्याख्याने मीमांसकैः सिद्धान्तितम्। विशिष्टशक्तिपक्षे तूभयोरपि समासयोः शक्तिमत्त्वाविशेषात् 'निषादशब्दस्य तत्सम्बन्धोपलक्षकतापत्त्या कर्मधारयेण निषादस्यैव तदधिकारावगतेस्तद्विद्यान्यथाऽनुपपत्त्या तावन्मात्रोपयोगिवेदाध्ययनकल्पना' इति सिद्धान्तोऽसङ्गतः स्यादित्यर्थः।

---

१. पर्यवस्यदिति—पर्यवस्यच्छाब्दबोधे यद्यपि निषादस्थपतिरूपसङ्करजाति-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पर्यवस्यंश्चासौ शाब्दबोधश्च तस्माददूरश्चासौ प्राक्क्षणश्च *तदानींतनलाघवमादायाधिकरणाविरोध इत्यर्थः। अयं भावः—निषादस्थपतिपदं समासशक्तिपक्षे *निषादरूपे *निषादानां च स्थपतौ *निषादस्वामिके पुरुषान्तरे चेत्येवं सर्वत्र शक्तत्वान्नानार्थकम्। तथा च *"नानार्थे तात्पर्याद्विशेषावगतिः" इति न्यायेन *तत्कल्पनायां पदद्वये *पूर्वोपस्थितार्थ एवोपस्थित्यादिलाघवात्* तत् कल्प्यत इति। परेषामपि सति तात्पर्ये *'यष्टीः प्रवेशय' इतिवल्लक्षणाया दुर्वारत्वात्तात्पर्यमेव कल्प्यकोटाववशिष्यत इति दिक्॥ ६) (३६)

इति कौण्डभट्टविरचिते वैयाकरणभूषणसारे समासशक्तिनिर्णयः समाप्तः।

तदानींतनेति। तादृशवाक्यजन्यशाब्दबोधाव्यवहितप्राक्क्षणवृत्तिशक्तिग्रहनिष्ठान्तरङ्गबहिरङ्गभावचिन्तनप्रयुक्तलाघवमादायेत्यर्थः। **निषादरूपे**—संकरजातिविशेषरूपे। अस्य 'स्थपतौ' इत्यनेनान्वयः। इदं च कर्मधारयसमासे। तत्पुरुषे त्वाह—**निषादानामिति**। तज्जातीयानां **स्थपतौ**—स्वामिनि अन्यजातीये इत्यर्थः। **निषादस्वामिके इति**। **निषादः स्थपतिः**—'अधिपतिर्यस्य' इति बहुव्रीहिस्वीकारे तत्स्वामिकपुरुषान्तरस्यापि प्रतीतिरिति तत्तत्समासस्वीकारेण तदेव पदं नानार्थकं भवतीति भावः। **नानार्थे**—अस्य 'क तात्पर्यमिति सन्देहे सति' इति शेषः। **तत्कल्पनायाम्**—तात्पर्यकल्पनायाम्। **पूर्वोपस्थितार्थे एवेति**। समासतः पूर्वं तद्बोधकविग्रहवाक्यघटकपदजन्योपस्थितार्थे एवेत्यर्थः। **तत्**—तात्पर्यम्। **यष्टीः प्रवेशयेतिवदिति**। तत्र यथा मुख्येऽन्वयानुपपत्त्यभावेऽपि तात्पर्यानुपपत्त्या यष्टिधरे लक्षणा तथा प्रकृतेऽन्वयानुपपत्त्यभावेऽपि षष्ठीतत्पुरुषाद्यर्थे तात्पर्यानुपपत्त्या लक्षणा दुर्वारेत्यर्थः॥ ९॥ (३६)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां समासशक्तिनिर्णयः समाप्तः॥

विशेषस्यापूर्वविद्याकल्पनेनैव याजनाऽन्वये गौरवं तथाऽपि तादृशफलीभूतशाब्दबोधादव्यवहितपूर्वक्षणवृत्तिशक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वविचारे तु निषादश्चासौ स्थपतिश्चेति कर्मधारये षष्ठीतत्पुरुषाद्यपेक्षया लाघवमस्त्येवेति तत्त्वम्।

इति सुबोधिन्यां समासशक्तिनिर्णयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ शक्तिनिर्णयः।

शक्तिप्रसङ्गात्तस्याः स्वरूपमाह—

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा ॥ १ ॥ (३७)

इन्द्रियाणां—चक्षुरादीनां स्वविषयेषु—चाक्षुषेषु घटादिषु यथाऽनादिर्योग्यता—तदीयचाक्षुषादिकारणता, तथा शब्दानामप्यर्थैः सह तद्बोधकारणतैव योग्यता, *सैव शक्तिरित्यर्थः। ननु न बोधकारणत्वमनादिभूतं शक्तिः, *आधुनिकदेवदत्तादिपदे *तदभावात्, *अन्यथा पित्रादिसङ्केताज्ञानेऽप्यन्वयबोधप्रसङ्गः; *लाक्षणिकातिव्याप्तेश्चेति *सङ्केतज्ञा-

---

सैव शक्तिरिति। बोधजनकतारूपैव शक्तिरित्यर्थः। **आधुनिकेति।** आधुनिकसङ्केतितेत्यर्थः। **तदभावादिति।** अनादिशक्तेरभावात्। तथा च ततः शाब्दबोधो न स्यादिति भावः। **अन्यथा**—आधुनिकसंकेतितेऽप्यनादिशक्तिसत्त्वे। संकेतस्य आधुनिकत्वेऽपि तच्छब्दस्य नित्यत्वेन तत्र शक्तेरप्यनादित्वमस्त्येवेति तात्पर्यम्। **लाक्षणिकेति।** लाक्षणिकगङ्गादिपदानामपि तीरादिबोधजनकत्वेन तत्राप्यनादिशक्तिमत्त्वापत्तिरित्यर्थः।

सङ्केतज्ञानमिति। तथा च आधुनिकदेवदत्तादिपदेऽनादिशक्तेः सत्त्वेऽपि पित्रादिकृतसंकेतस्याज्ञान न ततः शाब्दबोधापत्तिः, गङ्गादिपदजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितविशेष्यताकत्वमीश्वरेच्छाया नोपेयते, किन्तु शुद्धविषयत्वेनैव। तथा च तत्पदजन्यबोधविषयत्वत्वावच्छिन्नप्रकारतानिरूपिततत्तद्विशेष्यताकसंकेतज्ञानस्यैव बोधकारणत्वाभ्युपगमेन लाक्षणिके तथाविधसंकेतज्ञानाभावेन बोधाभावाच्च तज्जनकतारूपशक्तिमस्त्वसम्भव इति भावः।

---

१. समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवदित्यादिग्रन्थेन पूर्वप्रकरणे समासेऽतिरिक्तशक्तिसाधनं शक्तिस्वरूपनिर्णयमन्तरा न युज्यतेऽतः प्रकृतोपपादकत्वरूपोपोद्घातसङ्गत्या प्रसङ्गसङ्गत्या च शक्तेः स्वरूपं निरूपयति—शक्तिप्रसङ्गादिति।

२. सैवेति—एवकारेण न्यायादिसम्मतेच्छारूपादिशक्तिनिरासः।

३. स्वसिद्धान्तं स्थापयिष्यन् तार्किकपक्षसंवादिनीं शङ्कामवतारयति—ननु इत्यारभ्य इति चेदित्यन्तेन।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नमपि हेतुर्वाच्यम्। तथाचाऽऽवश्यकत्वात् *स एव शक्तिरस्तु, स चाऽऽधुनिके पित्रादेर्गवादौ चेश्वरस्येति चेत्? अत्रोच्यते—सङ्केतो न *स्वरूपेण हेतुः, *अगृहीतशक्तिकादर्थबोधप्रसङ्गात्। नापि *सामान्यतो[1] ज्ञातः, प्रमेयत्वादिना तज्ज्ञानेऽपि बोधप्रसङ्गात्। नापि सङ्केतत्वेन[2] तज्ज्ञानं हेतुः, गवादिपदे ष्वीश्वरादेः सङ्केतत्वेन *तज्ज्ञानशून्यानां *लौकिकमीमांसकादीनां तत्तदर्थबोधजनकत्वग्रहवतामेव बोधेन व्यभिचारात्। न चा*र्थधीजनकतावच्छेदकत्वेन तज्ज्ञानं हेतुः, ततोऽपि *लाघवेनार्थधीजनकत्वेनैव हेतुतायामस्मत्पक्षसिद्धेः। न चाऽऽधुनिकदेवदत्तादौ सङ्केतज्ञानादेव बोधेनास्य व्यभिचारः, तत्रापि *"इदं पदमेनमर्थं बोधयतु"

स एव—संकेत एव। स्वरूपेण—संकेतत्वेन। अगृहीतशक्तिकात्—अज्ञातसंकेतात्। सामान्यतः—येन केनापि रूपेण। तज्ज्ञानशून्यानाम्—ईश्वरज्ञानरहितानाम्। वैदिकानां कथंचिदीश्वरज्ञानसम्भवादाह—लौकिकेति। निरीश्वरवादिनो मीमांसका इत्यर्थः। आदिपदं च तादृशबौद्धादिपरम्।

अर्थधीजनकतावच्छेदकत्वेनेति। अर्थधीजनकता—अर्थविषयकबोधजनकयोग्यता, सा च तदवच्छेदकधर्मवत्त्वम्। स धर्मश्च क्लृप्तत्वादीश्वरसङ्केत एवेति तज्ज्ञानस्य व्यभिचाराभावाद् हेतुत्वमित्यर्थः।

लाघवेनेति। अवच्छेदककोटौ अर्थधीजनकतावच्छेदकत्वस्यानिवेशरूपेण लाघवेनेत्यर्थः।

इदं पदमिति। "निर्विशेषं न सामान्यम्" इति न्यायेन "घटपदं घटं बोधयतु" इत्यादिवाक्यानां परिचायकमिदम्। पदविशेष्यकेश्वरेच्छाया आकारश्चायम्। अर्थविशेष्यकश्च "घटपदाद् घटो बोद्धव्यः" इत्यादिर्बोध्यः। तत्राऽऽद्ये—बुधधात्वर्थो बोधः, णिच्प्रत्ययार्थो जनकता, 'घटम्' इत्यत्र द्वितीयार्थः कर्म, तदर्थश्च विषयता, "सविषयकधातुसमभिव्याहारे कर्मप्रत्ययार्थो विषयता" इति नियमात्। ज्ञानेच्छाकृत्यर्थका धातवः सविषयाः। तत्र च घटस्य द्वितीयार्थविषयतायां वृत्तित्वस-

1. सामान्यतः इति—सामान्यरूपेण सङ्केतत्वव्यापकधर्मेण प्रमेयत्वादिनेति यावत्। इदं पदमत्रार्थे प्रमेयवदित्यादिरूपेणेत्यर्थः।

2. सङ्केतत्वेनेति—सङ्केतत्वव्याप्यधर्मेण (सङ्केतवृत्तिविशेषधर्मेण) ईश्वरीयसङ्केतत्वादिनेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इतीच्छाग्रहे पदे तदर्थबोधकत्वस्यावगाहनेन[1] व्यभिचाराभावात्। *न च *स्वातन्त्र्येणार्थबोधकताज्ञानं कारणं वाच्यम्। अन्यथा नेदं तद्धीजनकमिति जानतोऽस्माच्छब्दादयमर्थो बुद्धोऽनेनेति जानतस्तद्ग्रहापत्तेरिति वाच्यम्, नेदं तद्धीजनकमिति ग्रहवतो बाधेन पदे परग्रहं जानतोऽपि तद्ग्रहासंभवात्। अन्यथा भ्रान्तिज्ञस्यापि भ्रान्तत्वापत्तेरिति[2]।

इदं चार्थधीजनकत्वं पित्रादिसङ्केतज्ञानाद् गृह्यते। अतस्तज्ज्ञानात्पूर्वं न बोधः

स्वन्धेनाऽन्वयः। विषयतायाश्च निरूपकत्वसम्बन्धेन बुध' धात्वर्थबोधे, तस्य च निष्ठत्वसम्बन्धेन जन्यतायां, तस्याश्च निरूपितत्वसम्बन्धेन णिजर्थजनकतायां, तस्याश्चाश्रयत्वसम्बन्धेन प्रथमान्तघटपदेऽन्वयः। तथा च वृत्ति (त्व) सम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रकारतानिरूपितविशेष्यतासमानाधिकरणनिरूपकत्वसम्बन्धावच्छिन्नविषयतात्वावच्छिन्नविषयतानिष्ठप्रकारतानिरूपिता शेष्यतासमानाधिकरणनिष्ठत्वसम्बन्धावच्छिन्नबोधत्वावच्छिन्नबोधनिष्ठप्रकारतानिरूपितविशेष्यतासमानाधिकरणनिरूपितत्वसम्बन्धावच्छिन्नजन्यतात्वावच्छिन्नजन्यतानिष्ठप्रकारतानिरूपितविशेष्यतासमानाधिकरणाश्रयत्वसम्बन्धावच्छिन्नजनकतात्वावच्छिन्नजनकतानिष्ठप्रकारतानिरूपितविशेष्यताश्रयो घटपदम्' इतीश्वरेच्छाया ग्रहे जाते तद्विशेषणत्वेन बोधजनकत्वग्रहः स्पष्ट एवेति। ईश्वरेच्छाशरीरे बोधजनकतायाः पदे विशेषत्वेन प्रविष्टत्वादिति भावः। अयं विशेष्यकेश्वरेच्छाकारस्यापि शाब्दबोध उपदर्शितरीत्या विशेष्यविशेषणभावव्यत्यासेन तदनुकूलसम्बन्धव्यत्यासेन च स्वयमूह्य इति दिक्।

ननु इच्छाग्रहाधीनार्थधीजनकत्वग्रहेऽपि न तादृशार्थबोधजनकत्वज्ञानं शाब्दबोधे कारणम्। अन्यथा 'नेदं तद्बोधकम्' इति ज्ञानवतोऽपि 'अस्मात् पदादयमर्थो बुद्धोऽनेन' इति परग्रहाधीनतदर्थबोधजनकत्वग्रहेण तद्विषयकशाब्दबोधापत्तः। किन्तु इतराविशेषणत्वेन तज्ज्ञानमिति। तथा च आधुनिकदेवदत्तादिपदेषु ईश्वरेच्छाशरीरस्थप्रथमान्तपदविशेषणतयैव तज्ज्ञानान्न व्यभिचाराभाव इत्याशङ्कते—न चेति। अस्य 'इति वाच्यम्' इत्यनेनान्वयः। स्वातन्त्र्येण – इतराविशेषणत्वेन।

---

१. अवगाहनेन = विषयीकरणेन।

२. भ्रान्तत्वापत्तेरिति—रजतत्वाभाववती शुक्ती रजतत्वेन गृहीताऽनेनेति ज्ञानवतो भ्रान्तिज्ञस्य रजतत्वाभाववच्छुक्तिविशेष्यकरजतत्वप्रकारकज्ञानसम्भवेन रजतत्वभ्रमापत्तिः स्यादिति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नापि लाक्षणिकोच्छेदापत्तिः, *इष्टत्वात्। शक्तिग्राहकव्यवहारस्य *मुख्यलक्ष्यसाधारण्यात्।

*किं च प्रत्यक्षादिजन्योपस्थितेः *शाब्दबोधानङ्गत्वात् शाब्दबोधं प्रति *शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम्। तथा च कार्यकारणभावद्वयकल्पने गौरवं स्यात्। अस्माकं पुनः शक्तिजन्योपस्थितित्वेनैव हेतुतेति लाघवम्।

अपि च लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः, शक्तिजन्योपस्थितिं विनाऽपि लक्षणाजन्योपस्थितितः शाब्दबोधात्। न च *अव्यवहितोत्तरत्वसंबन्धेन तत्तदुपस्थितिमत्त्वं कार्यतावच्छेदकं, तत्तदुपस्थितित्वं च कारणतावच्छेदकम्, *अनन्तकार्यकारणभावप्रसङ्गात्।

इष्टत्वादिति। "सर्वे सर्वार्थवाचकाः" इत्यनेन सर्वेषामपि शब्दानां सर्वार्थनिरूपितशक्तिमत्त्वस्यैव वैयाकरणैः सिद्धान्तितत्वादिति भावः। मुख्यलक्ष्यसाधारण्यादिति। "घटमानय" इत्युक्तौ घटानयनं "घटं नय" इत्युक्तौ च घटनयनं दृष्ट्वा यथा घटपदस्य घटे गृहीतस्य सम्बन्धस्य शक्तित्वं, तथा व्यवहारेणैव "गङ्गायां घोषे वस" इत्युक्तौ वासं "गङ्गायां घोषात् निर्गच्छ" इत्युक्तौ निर्गमं च दृष्ट्वा गृहीतस्य तीरे गङ्गापदसम्बन्धस्य लक्षणात्वमित्यस्यायुक्तत्वादित्याशयः।

ननु "अन्यायश्चानेकार्थत्वम्" इति पूर्वमीमांसाऽधिकरणकौमुदीस्थैकोनपञ्चाशत्तमन्यायविरोधाद् व्यवहारस्य लक्षणाग्राहकत्वेनाप्युपपत्तौ गङ्गादिपदेषु तीरादिशक्तिकल्पनाऽप्रामाणिकीत्यत आह—किञ्चेति। शाब्दबोधानङ्गत्वादिति। अगृहीतशक्तिकस्य घटादिकं पश्यतोऽपि पुंसो घटादिपदैः शाब्दबोधादर्शनादित्यादिः। शक्तिजन्येति। शक्तिज्ञानजन्येत्यर्थः। एवं लक्षणाजन्येत्यस्य—लक्षणाज्ञानजन्येत्यर्थो बोद्धव्यः।

अव्यवहितोत्तरत्वेति। तत्पदनिष्ठशक्तिज्ञानाधीनोपस्थित्यव्यवहितोत्तरशाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदनिष्ठशक्तिज्ञानाधीनोपस्थितिः कारणम्, तत्पदनिष्ठलक्षणाज्ञानाधीनोपस्थित्यव्यवहितोत्तरशाब्दबुद्धित्वावच्छिन्नं प्रति तत्पदनिष्ठलक्षणाज्ञानाधीनोपस्थितिः कारणमिति फलितोऽर्थः। अनन्तेति। स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वं-स्वाधिकरणक्षणध्वंसाधिकरणत्वमेतदुभयसम्बन्धेन यत्किञ्चिद्व्यक्तिविशिष्टत्वरूपाव्यवहितोत्तरत्वसम्बन्धभानाय तत्तदुपस्थितिव्यक्तीनामेव तत्र प्रवेशेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किं च पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणाज्ञानत्वेन च हेतुतेति व्यभिचारो गौरवं च *प्राग्वदेव द्रष्टव्यम् ।

न च "इदं पदमेतदर्थबोधकम्" इति शक्तिज्ञानकार्यकारणभावकल्पनेऽपि *तत्तदर्थभेदेनानेककार्यकारणभावकल्पने गौरवं तवापि समानम्, परस्परव्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वे च सुतरामिति वाच्यम्, *शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभेदेन कार्यकारण-

---

तदानन्त्यात कार्यकारणभावानन्त्यमित्यर्थः । स्व या काचिदेकोपस्थितिव्यक्तिः तद्ध्वंसाधिकरणभूतो यो द्वितीयस्तृतीयो वा क्षणस्तद्ध्वंसानधिकरणत्वं तदन्यतरक्षणे, एवं स्वाधिकरणभूतो यः प्रथमः क्षणस्तद्ध्वंसाधिकरणत्वमपि तत्रैवेति तत्क्षणिकशाब्दबोध एव तदुपस्थितिजन्य इति लक्षणसमन्वयः । चतुर्थादिक्षणव्यावृत्तये प्रथमसम्बन्धोपादानं, द्वितीयसम्बन्धश्च स्वपूर्वक्षणव्यावृत्तये इति स्पष्टमेव । चैत्रीयोपस्थित्यनन्तरं तदुपस्थितेर्मैत्रात्मन्यसत्त्वेऽप्यव्यवहितोत्तरत्वसम्बन्धेनोपस्थितिमत्त्वेन मैत्रस्य शाब्दबोधापत्तिवारणायोपस्थितौ तत्पुरुषीयत्वनिवेशे तु पुरुषानन्त्यप्रयुक्तमपि तदानन्त्यं बोध्यम् ।

प्राग्वदेवेति । शक्तिज्ञानं विनाऽपि लक्षणाज्ञानमात्रेणोपस्थितेः प्रत्येकं व्यभिचारः, शक्तिज्ञानाव्यवहितोत्तरोपस्थितिं प्रति शक्तिज्ञानस्य, लक्षणाज्ञानाव्यवहितोत्तरोपस्थितिं प्रति लक्षणाज्ञानस्य कारणत्वे तु तत्तच्छाब्दव्यक्तिनिवेशस्यावश्यकत्वेन पुरुषान्तरशक्तिज्ञानेन पुरुषान्तरीयोपस्थितिवारणाय च तत्पुरुषीयत्वेन शक्तेर्विशेषणीयत्वेन पदान्तरशक्तिग्रहेण तत्पर्यायाद्बोधवारणाय शक्तेस्तत्पदीयत्वेन विशेषणीयत्वाच्च व्यक्तिपुरुषपदानामानन्त्येनानन्ततत्तन्निवेशेन कार्यकारणभावानन्त्यमिति बोध्यम् ।

तत्तदर्थभेदेनेति । गङ्गादिपदात् प्रवाहत्वावच्छिन्नविषयकशाब्दबोधे गङ्गापदनिष्ठप्रवाहत्वावच्छिन्ननिरूपितशक्तिज्ञानाधीनोपस्थितेः कारणत्वं, तीरत्वावच्छिन्नविषयकशाब्दबोधं प्रति गङ्गापदनिष्ठतीरत्वावच्छिन्ननिरूपितशक्तिज्ञानाधीनोपस्थितेः कारणत्वमित्यादिरीत्या लक्ष्यार्थस्यानन्तत्वेनानेककार्यकारणभावकल्पनेति भावः ।

'घटपदं पटे शक्तम्' इत्यादिशक्तिभ्रमेणापि तद्बोधानुभवेन तत्तदर्थनिरूपितशक्तिग्रहस्य तज्जन्योपस्थितेश्च तत्र शाब्दबोधकारणताकल्पनाऽऽवश्यिकेति तदानन्त्यस्य उभयोरपि समानत्वेऽपि लक्षणाकार्यकारणभावकल्पनागौरवं तवाधिकमेवेत्याह—शक्तिभ्रमानुरोधेनेति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावानन्त्यस्य तवापि साम्यात्। लक्षणाकार्यकारणभावकल्पनागौरवं परं तवातिरिच्यते।

अथ *वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुता, वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणतेत्येवं मया वाच्यमिति चेन्न, शक्तिलक्षणाऽन्यतरत्वस्य शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसंबन्धत्वस्य वा वृत्तित्वस्य कारणतावच्छेदकत्वात् शक्तित्वमपेक्ष्य गौरवाच्छाब्दबोधहेतुतावच्छेदकस्य *पदार्थोपस्थितिवृत्तेरज्ञाने तद्घटितकार्यकारणभावग्रहस्या* संभवात्।

अथ *ममापि शक्तिज्ञानत्वेनैव हेतुता, शक्यसंबन्धरूपलक्षणायां शक्तेरपि प्रवेशादिति चेन्न, शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावे समानविषयत्वस्याऽऽवश्यकत्वात्। अन्यथा गङ्गातीरयोः संबन्धाग्रहवतो गङ्गापदशक्तिं जानतोऽपि 'गङ्गायां घोषः' इति वाक्यात्तीरबोधप्रसङ्गः शक्तिज्ञानस्य हेतोः सत्त्वात्।

अपि च 'घटमानय' इति वाक्यं हस्तिनं च स्मरतो घटपदादिभ्यो घटादेर्गजाद्धस्तिपकस्य च समूहालम्बनस्मरणवतो घटानयनवद्धस्तिपकस्यापि शाब्दबोधापत्तिः, समूहालम्बनरूपायां पदार्थोपस्थितौ वृत्तिजन्यत्वसत्त्वात्। तथा च विषयतया शाब्दबोधं प्रति *तदंशविषयकवृत्तिजन्योपस्थितिर्हेतु

वृत्तिजन्योपस्थितीति। तथा चैकस्यैव कार्यकारणभावस्य सत्त्वेन न व्यभिचारः प्रत्येकं, नाप्यव्यवहितोत्तरत्वादिनिवेशगौरवमिति। **पदार्थोपस्थितिवृत्तेरिति**। पदार्थोपस्थितिनिष्ठस्य शाब्दबोधहेतुतावच्छेदकस्य वृत्तिज्ञानजन्योपस्थितित्वरूपस्येत्यर्थः। **असम्भवादिति**। शाब्दबोधानुकूलत्वं—शाब्दबोधकारणत्वं, तस्य च कारणतावच्छेदकरूपापरिचये दुर्ग्रहत्वेनोक्तहेतुतावच्छेदकस्य दुर्ज्ञेयत्वेन च कार्यकारणभावस्यासम्भवादिति भावः।

ममापीति। लक्षणावादिनोऽपि। 'मते' इति शेषः। **तदंशविषयकेति**।

---

१. वृत्तिजन्योपस्थितित्वेनैवेति—न तु शक्तिज्ञानजन्योपस्थितित्वेन, नाऽपि लक्षणाज्ञानजन्योपस्थितित्वेनेत्यर्थः।

२. पदार्थोपस्थितिवृत्तेरिति—अत्र यद्यपि पदार्थोपस्थितिहेतुवृत्तेरिति हेतुपदघटितः पाठो मूले प्रायो दृश्यते तथाऽपि हेतुपदं तत्रासङ्गतमेव अनन्वितार्थकत्वात्, काशिकाकारादिभिस्तद्रहितस्यैव व्याख्यातत्वाच्च।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रिति वाच्यम्। एवं च लक्षणाया अपि शक्तिज्ञानत्वेन हेतुत्वमसंभवदुक्तिकमिति। *एतेन शक्तिप्रयोज्यैवोपस्थितिर्हेतुरिति न लक्षणाज्ञानकार्यकारणभावान्तरं ममापीति परास्तम्। प्रयोज्यत्वस्यानतिप्रसक्तस्य दुर्वचत्वाच्चेत्यादिकं विस्तरेण प्रपञ्चितं भूषणे॥ १॥ (३७)

नन्वेवं भाषादितो बोधदर्शनाद् बोधकतारूपा शक्तिस्तत्रापि स्यात्। तथा च साधुताऽपि स्यात्। शक्तत्वस्यैव साधुताया व्याकरणाधिकरणे प्रतिपादनादित्याशङ्कां द्विधा[1] समाधत्ते—

असाधुरनुमानेन वाचकः कैश्चिदिष्यते॥

वाचकत्वाविशेषे च नियमः पुण्यपापयोः॥ २॥ (३८)

असाधुर्गाव्यादिः अनुमानेन[2] साधुशब्दमनुमाय वाचको बोधकः कैश्चिदिष्यते। तथा च लिपिवत्तेषां साधुस्मरण एवोपयोगो न तु साक्षात्त्द्वाचकत्वमतो न साधुत्वमिति भावः।

उक्तं हि वाक्यपदीये—

*ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।
*तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः॥

तद्धर्मप्रकारकतद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं कारणमित्यर्थः। प्रकृते च हस्तिपकत्वावच्छिन्ननिरूपितशक्तिग्रहाभावान्न दोषः। विस्तरस्तु **शक्तिवादे** द्रष्टव्यः। **असम्भवदुक्तिकमिति**। गङ्गापदे प्रवाहत्वावच्छिन्ननिरूपितशक्तेरेव ग्रहात् तीरत्वावच्छिन्नविषयकशाब्दबोधानुत्पत्तेरिति। **एतेन**— उक्तस्थले हस्तिपकस्य शाब्दबोधापत्तिरूपदूषणेन। **शक्तिप्रयोज्येति**। प्रयोज्यत्वं च साक्षात्परम्परासाधारणमिति बोध्यम्। **अनतिप्रसक्तेति**। "घटपदं घटे शक्तम्" इतिशक्तिग्रहवतः पुंसो घटपदाद् घटरूपार्थोपस्थितौ तेन स्वसमवाय्युपस्थिताकाशस्य घटपदजन्यशाब्दबोधविषयत्वापत्तिः। तत्रापि घटपदनिष्ठशक्तिप्रयोज्यतावच्छेदकविषयतासम्बन्धेन तादृशोपस्थितेः सत्त्वादिति भावः॥

ते—असाधवः 'गगरी' इत्यादिशब्दाः। **तादात्म्यमुपगम्येव**—अर्थैः सह

---

१. द्विधेति—अपभ्रंशानां साक्षाद्बोधजनकत्वरूपशक्त्यनभ्युपगमेन, वाचकत्वस्य सत्त्वेऽपि साधुत्वस्यान्यथा निर्वचनेन चेति प्रकारद्वयेनेति तत्त्वम्।

२. अनुमानेति—अत्रानुपूर्वकस्य माधातोः स्मरणमर्थः। अनु=पश्चाद् मानं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*न शिष्टैरनुगम्यन्ते पर्याया इव साधवः ।
*न यतः स्मृतिमात्रेण, तस्मात्साक्षादवाचकाः ॥
*अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते ।
अव्यक्तं, तद्विदां तेन व्यक्ते भवति निर्णयः ॥
एवं साधौ प्रयोक्तव्ये योऽपभ्रंशः प्रयुज्यते ।
तेन साधुव्यवहितः कश्चिदर्थोऽभिधीयते ॥ इति ।

नन्वपभ्रंशानां साक्षादवाचकत्वे किं मानं, शक्तिकल्पकव्यवहारादेस्तुल्यत्वादिति चेत् ? सत्यम्, तत्तद्देशभेदभिन्नेषु तेषु शक्तिकल्पने गौरवात् । न च पर्यायतुल्यता शङ्क्या । तेषां सर्वदेशेऽनेकत्वाद्विनिगमनाविरहेण सर्वत्र शक्तिकल्पना, न ह्यपभ्रंशे तथा । अन्यथा भाषाणां पर्यायतया गणनापत्तेश्च । एवं शक्तत्वमेवास्तु साधुत्वमिति नैयायिकमीमांसकादीनां मतेनैव द्रष्टव्यम् ।

इदानीं स्वमतमाह—वाचकत्वाविशेषे चेति । अयं भावः—अपभ्रंशानामशक्तत्वे ततो बोध एव न स्यात् । न च साधुस्मरणात्ततो बोधः, ताननविदुषां पामराणामपि बोधात् तेषां साधोरबोधाच्च । न च शक्तिभ्रमात्तेभ्यो बोधो बोधकत्वस्याबाधेन तद्ग्रहस्याभ्रमत्वात् । ईश्वरेच्छा शक्ति-

---

तादात्म्यं गगर्यादिशब्दानां गृहीत्वेवेत्यर्थः । ग्रहस्य भ्रमत्वसूचनाय 'इव' पदम् । तेन तेषामवाचकत्वं ध्वनितम् ।

न शिष्टैरिति । शिष्टैः साधवः **पर्यायाः**—पर्यायशब्दा इव नानुगम्यन्ते इति योजना । अत्र 'ते' इति कर्माऽनुषङ्गेणान्वेतीति बोध्यम् ।

न यत इति । **यतः**—यस्माद्धेतोः (असाधुशब्दानां) स्मरणमात्रेण नार्थबोधोपपत्तिः, तस्माद् हेतोरित्यर्थः ।

अम्बाम्बेति । **यदा** यस्मिन् काले 'अम्बा अम्बा' इति शिक्ष्यमाणो बालोऽसामर्थ्याद् **अव्यक्तम्**—'अम्मा अम्मा' इति प्रभाषते तदा **तद्विदां**—साधुशब्दज्ञानां **तेन**—अव्यक्तेन व्यक्ते स्मृते **निर्णयः**—अर्थनिश्चयो भवतीत्यर्थः ।

ज्ञानमिति व्युत्पत्तेः । स्मरणस्यानुभवजन्यत्वेन पश्चात्कालिकज्ञानरूपता प्रसिद्धैव । एतश्च "साधुस्मरणे एवोपयोगः" इत्यग्रिमग्रन्थोऽपि सङ्गच्छते इति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रिति मतेऽपि सन्मात्र[1]विषयिण्यास्तस्या बाधाभावात्। शक्तेः पदपदार्थ[2]विशेषघटिताया भ्रमासंभवाच्चेति।

उक्तं च वाक्यपदीये—

पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु।
प्रसिद्धिमागता येन तेषां साधुरवाचकः॥
दैवी वाग व्यवकीर्णेयमशक्तैरभिधातृभिः।
अनित्यदर्शिनां त्वस्मिन् वादे बुद्धिविपर्ययः॥ इति।

अवाचकोऽबोधकः। बुद्धिविपर्ययः—एत एव वाचका नान्ये इति विपर्यय इत्यर्थः। किं च विनिगमनाविरहाद् भाषायामपि शक्तिः। न च तासां नानात्वं दोषः। संस्कृतवन्महाराष्ट्रभाषायाः सर्वत्रैकत्वेन प्रत्येकं विनिगमनाविरहतादवस्थ्यात्। किं चानुपूर्वी पदेऽवच्छेदिका। सा च पर्यायेष्विव भाषायामप्यन्याऽन्यैवेति कस्तयोर्विशेष इति विभाव्यं सूरिभिः। तथा च संस्कृतवद् भाषाशब्दाः शक्ता एव। न च पर्यायतया भाषाणां गणनापत्तिः। साधूनामेव कोशादौ विभागाभिधानात्।

नन्वेवं साधुता तेषां स्यादित्यत आह—नियम इति। पुण्यजननबोधनाय साधूनां साधुभिर्भाषितव्यमिति विधिः। पापजननयोग्यत्वमसाधुत्वम्। तत्र जनकताऽवच्छेदिका च जातिः। तज्ज्ञापकं च कोशादि व्याकरणादि च। एवमेव च राजसूयादेर्ब्राह्मणे*फलाजनकत्ववद् गवादिशब्दानां*नाश्वादौ साधुत्वमिति संगच्छते। आधुनिकदेवदत्तादिनाम्नामपि "डित्थडवित्थ" इत्या-

*फलाजनकत्ववदिति। "राजा राजसूयेन यजेत" इति श्रुत्या राज्ञ एव राजसूयेऽधिकारबोधनादिति भावः। नाश्वादाविति। गोशब्दस्य सास्नादिमति

१. सन्मात्रेति—सकलपदार्थविषयिण्या इत्यर्थः। अयं भावः, गगर्यादिशब्दादपि घटपदार्थविषयकबोधदर्शनाद् गगरीपदजन्यबोधविषयतावान् घटो भवतु इतीश्वरेच्छारूपा शक्तिस्तत्र स्वीकार्याऽन्यथा तस्याः सर्वविषयकत्वं न स्यादेवं त्वापभ्रंशादपि बोधस्य सर्वानुभवसिद्धतया बोधकत्वेनेश्वरेच्छाया अपि तत्र सत्त्वेन तामादायाऽपि न शक्तिज्ञानस्य भ्रमत्वम्, प्रतीतेर्भ्रमत्वे विषयबाधस्यैव प्रयोजकत्वात्। २. पदपदार्थविशेषेति—तत्तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितेश्वरेच्छीयविशेष्यताया एव शक्तित्वेन प्रकृते गगरीपदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितेच्छीयविशेष्यताया घटनिष्ठाया एव गगरीपदीयशक्तित्वं,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिभाष्येण व्युत्पादितत्वात् साधुत्वम् । एवं च यः शब्दो यत्रार्थे व्याकरणे व्युत्पादितः स तत्रैव साधुरिति पर्यवसितम् । गौणानां गुणे व्युत्पादनात्तत्पुरस्कारेण प्रवृत्तौ साधुत्वमेव । आधुनिकलाक्षणिकानां त्वसाधुत्वमिष्टमेव । अत एव ब्राह्मणाय देहीत्यर्थे "ब्राह्मणं देहि" इत्यादिकं लक्षणयाऽप्यसाध्वित्यादि विस्तरेण प्रपञ्चितं भूषणे ॥ २ ॥ (३८)

अतिरिक्तशक्तेर्ग्रहोपायमाह—

*संबन्धिशब्दे संबन्धो योग्यतां प्रति योग्यता ।
समयाद्वु योग्यतासंविन्मातापित्रादियोग्यवत्॥३॥(३९)

संबन्धो विषयः । योग्यतां प्रति योग्यता संबन्धिशब्दं प्रति योग्यता विषय इति । समयाद्वु—व्यवहारात् । योग्यतासंवित्—शक्तिग्रहः । घटपदमत्र योग्यमेतत्संबन्धीति व्यवहारात्सा ग्राह्येत्यर्थः ॥ ३ ॥ (३६)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे शक्तिनिर्णयः॥

गोत्वविशिष्टे एव बोधजनकत्वदर्शनात् तत्रैव साधुत्वमित्यर्थः ॥ ३ ॥ (३८)

सम्बन्धिशब्दे इति । सम्बन्धिशब्दे योग्यतां प्रति—बोधजनकतावच्छेदकधर्मरूपयोग्यतानिरूपितो यः सम्बन्धः—तादात्म्यलक्षणः स योग्यता सैव शक्तिरिति तात्पर्यम् । तद्ग्रहोपायमाह—समयादिति । सा च स्वाभाविक्येवानादिवृद्धव्यवहारपरम्परापर्यालोचनयाऽस्मदादिसमयाद्वा गृहीतादुक्तेश्वरसमयान्निश्चीयते । यथा मातापुत्रयोर्जन्यजनकभावसम्बन्धस्य व्यवहारो निश्चायकस्तद्वदिति कारिकाऽर्थः ॥३॥(३९)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां शक्तिनिर्णयः ।

तस्याश्च घटरूपेऽर्थे सत्त्वेनादोषः । एवं चान्यपदस्यान्यार्थे नास्ति शक्त्यापत्तिः, इच्छारूपशक्तेः तत्तत्पदपदार्थघटितत्वादिति संक्षेपः ।

१. अतिरिक्तेति—अतिरिक्ता ईश्वरेच्छारूपशक्तिभिन्ना योग्यतारूपा या शक्तिस्तस्या ग्रहेत्याद्यर्थः । दर्पणकृतस्तु 'अतिरिक्तत्वमुपाये विशेषणीकृत्येमं ग्रन्थं समलापयन्, तथाहि—ननु शक्तिग्राहकयोः कोशव्याकरणयोर्विद्यमानत्वाच्छक्तिग्रहोपायकथनं व्यर्थमत आह—अतिरिक्तेति, कोशव्याकरणाभ्यामतिरिक्तो यः शक्तिग्रहोपायस्तमित्यर्थं इति । इति सुबोधिन्यां शक्तिनिर्णयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ नञर्थनिर्णयः।

अथ नञर्थमाह[1]—

> नञ्समासे चापरस्य प्राधान्यात्सर्वनामता।
> आरोपितत्वं नञ्द्योत्यं न ह्यसोऽप्यतिसर्ववत् ॥ १ ॥ (४०)

नञ्समासेऽपरस्योत्तरपदार्थस्य प्राधान्यात्सर्वनामता सिध्यतीति शेषः। अत एवाऽऽरोपितत्वमेव नञ्द्योत्यमिति। 'अभ्युपेयम्' इति शेषः। अयं भावः—'असर्वः' इत्यादौ आरोपितः सर्व इत्यर्थे सर्वशब्दस्य प्राधान्याबाधात्सर्वनामता सिध्यति। अन्यथाऽ*तिसर्वं इत्यत्रेव सा न स्यात्। घटो नास्तीत्यादावभावविषयकबोधे तस्य विशेष्यताया एव दर्शनात्। अस्मद्रीत्या च स आर्थो बोधो मानसः। तथा च असर्वस्मै इत्याद्यसिद्धिप्रसङ्ग इति। अत्र चाऽऽरोपितत्वमारोपविषयत्वम्। आरोपमात्रमर्थो*विषयत्वं तु संसर्ग इति निष्कर्षः। द्योत्यत्वोक्तिर्निपातानां द्योतकत्वमभिप्रेत्य ॥ १ ॥ (४०)

घटो नास्ति, अब्राह्मण इत्यादावारोपबोधस्य सर्वानुभवविरुद्धत्वात्पक्षान्तरमाह—

> अभावो वा तदर्थोऽस्तु भाष्यस्य हि तदाशयात्।
> विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम् ॥ २ ॥ (४१)

तदर्थो नञर्थः। अर्थपदं द्योत्यत्ववाच्यत्वपक्षयोः साधारण्येन कीर्तनाय। भाष्यस्येति। तथा च नञ्सूत्रे महाभाष्यम्—"निवृत्तपदार्थकः" इति। निवृत्तं पदार्थो यस्य "नपुंसके भावे क्तः" इति क्तः। अभावार्थक इत्यर्थः। यत्तु निवृत्तः पदार्थो यस्मिन्नित्यर्थः। सादृश्यादिना-

---

अतिसर्वं इति। 'सर्वानतिक्रान्त' इत्यर्थे सर्वशब्दस्यातिक्रमणविशेषणत्वात् "संज्ञोपसर्जनानां प्रतिषेधः" इति वार्त्तिकात् सर्वनामसंज्ञानिषेध इतिवदत्रापीत्यर्थः। अर्थः—नञर्थः ॥ १ ॥ (४०)

---

१. शक्तिस्वरूपं निरूप्य नञ्घटितसमासे नञः शक्तिः क्वेति प्रसङ्गान्निर्णेतुं प्रकरणमारभते—अथ नञर्थमाहेत्यादि। २. आरोपितत्वमिति—न घटोऽघट इत्यादौ आरोपितघटत्वादि घटपदप्रवृत्तिनिमित्तं नञा व्यञ्जनया बोध्यते इति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*ऽध्यारोपितब्राह्मण्याः क्षत्रियादयोऽर्था यस्येत्यर्थ इति कैयटः; तन्न, आरोपितब्राह्मण्यस्य क्षत्रियादेर्नञ्वाच्यत्वात्। अन्यथा सादृश्यादेरपि वाच्यतापत्तेः।

यत्तु—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः"॥

इति पठित्वा अब्राह्मणः, अपापम्, अनश्वः, अनुदरा कन्या, अपशवो वा अन्ये गोऽश्वेभ्यः, अधर्म इत्युदाहरन्ति; तत्तु आर्थिका[1]र्थमभिप्रेत्येति स्पष्टमन्यत्र।

विशेषणमिति। प्रतियोगिनीति शेषः। तथा चासर्वपदे सर्वनामसंज्ञा, "अनेकमन्यपदार्थे" "सेव्यतेऽनेकया संनतापाङ्गया" इत्यादावेकशब्दार्थप्राधान्यादेकवचननियमः, अब्राह्मण इत्यादावुत्तरपदार्थप्राधान्यात्तत्पुरुषत्वम्, अत्वं भवसि, अनहं भवामीत्यादौ पुरुषवचनादिव्यवस्था चोपपद्यते। अन्यथा त्वद्भावो मद्भाव इतिवद्भावांशे युष्मदस्मदोरन्वयेन युष्मत्सामानाधिकरण्यस्य तिङ्व्यक्त्यात्पुरुषव्यवस्था न स्यात्। अस्मन्मते च भेदप्रतियोगित्वदभिन्नाश्रयिका भवनक्रियेत्यन्वयात्सामानाधिकरण्यं नानुपपन्नमिति भावः।

विशेष्यो वेति। प्रतियोगिनीति शेषः। अयं भावः—गौणत्वेऽपि नञ्समासे "एतत्तदोः सुलोपोऽकोरनञ्समासे हलि" इति ज्ञापकात्सर्वनामसंज्ञा नानुपपन्ना। असः शिव इत्यत्र सुलोपवारणायानञ्समास इति हि विशेषणम्। न च तत्र तच्छब्दस्य सर्वनामताऽस्ति गौणत्वात्। अकोरित्यकच्सहितव्यावृत्त्या सर्वनाम्नोरेव तत्र ग्रहणलाभात्। तथा चानञ्समास इति ज्ञापकं सुवचम्। "अनेकमन्यपदार्थे" इत्यादावेकवचनं विशेष्यानुरोधात। "सुबामन्त्रिते पराङ्गवत्स्वरे" इत्यतोऽनुवर्तमानं

---

*अध्यारोपितब्राह्मण्याः। अध्यारोपितं ब्राह्मण्यं येषु—

---

1. आर्थिकेति—आरोपितो ब्राह्मण इत्यादिशाब्दबोधोत्तरं सादृश्यादेर्बोधो मानसो भवति। अनुदरा कन्येत्यादौ अल्पत्वादिप्रयोज्योदराभावारोपेण नञ्साहित्येनारोपितोदरबोधेन तन्मूलाल्पत्वादौ पर्यवसानम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुब्ग्रहणं विशेष्यमेकवचनान्तमेव। किं चानेकशब्दाद् द्विवचनोपादाने बहूनां बहुवचनोपादाने द्वयोर्बहुव्रीहिर्न सिध्येदित्युभयसंग्रहायैकवचनं जात्यभिप्रायमौत्सर्गिकं वा। सेव्यतेऽनेकयेत्यत्रापि योषयेतिविशेष्यानुरोधात्प्रत्येकं सेवनान्वयबोधनाय चैकवचनं, न तूत्तरपदार्थप्राधान्यप्रयुक्तम्। अत एव[1] "पतन्त्यनेके जलधेरिवोर्मयः" इत्यादिकमपि सूपपादम्।

अत्वं भवसीत्यादौ युष्मदस्मदोस्तद्भिन्ने लक्षणा। नञ् द्योतकः। तथा च भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्यात्पुरुषव्यवस्था। त्वद्भिन्नाभिन्नाश्रयिका भवनक्रियेति शाब्दबोधः। एवं न त्वं पचसीत्यत्र त्वद्भिन्नाश्रयकपाकानुकूलभावनाऽभावः। घटो नास्तीत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति रीत्या बोधः। असमस्तनञः क्रियायामेवान्वयबोधात्। स चाभावोऽत्यन्ताभावत्वान्योन्याभावत्वादिरूपेण शक्यस्तत्तद्रूपेण बोधादित्यन्यत्र विस्तरः॥ २॥ (४१)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे नञर्थनिर्णयः समाप्तः॥

अथ निपातार्थनिर्णयः।

अथ प्रादयो द्योतकाः चादयो वाचका इति नैयायिकमतमयुक्तं वैषम्ये बीजाभावादिति ध्वनयन्निपातानां द्योतकत्वं समर्थयते—

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।
उपास्येते हरिहरौ लकारो दृश्यते तथा॥ १॥ (४२)

ते तथोक्ताः॥२॥ (४१॥

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां नञर्थनिर्णयः समाप्तः॥

---

१. अत एवेति—पूर्वपदार्थप्राधान्यादेवेत्यर्थः।

इति सुबोधिन्यां नञर्थनिर्णयः।

---

२. ब्राह्मणवशिष्ठन्यायेन नञर्थं निरूप्य निपातार्थविषये तार्किकमतं खण्डयन् स्वमतं युक्त्या स्थापय निपातार्थप्रकरणमारभते—प्रादय इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

येन हेतुना प्रादयो द्योतकास्तेनैव हेतुना चादयो निपातास्तथा द्योतका इत्यर्थः। अयं भावः—ईश्वरमनुभवतीत्यादावनुभवादिः प्रतीयमानो न धात्वर्थः, भवतीत्यत्राप्यापत्तेः। नोपसर्गार्थः, तथा सत्यप्रकृत्यर्थतया तत्राऽऽख्यातार्थानन्वयापत्तेः। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्व-व्युत्पत्तेः, [1]अनुगच्छतीत्यादावनुभवादिप्रत्ययापत्तेश्च। न विशिष्टार्थो [2]गौरवात्। तथा च धातोरेव विद्यमानत्वादिवाचकस्यास्तु [3]लक्षणा। उपसर्गस्तात्पर्यग्राहक इत्यस्तु। तथा च तात्पर्यग्राहकत्वमेव द्योतकत्वमिति।

एतच्चादिष्वपि तुल्यम्। चैत्रमिव पश्यतीत्यादौ सादृश्यविशिष्टं चैत्रपदलक्ष्यम्, इवशब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वात् इति। स्वयं युक्त्यन्तरमाह—उपास्येते इति। अत्र ह्युपासना किमुपसर्गार्थो विशिष्टस्य धातुमात्रस्य वा? नाऽऽद्यः। तथा सति स्वार्थफलव्यधिकरणव्यापार-वाचकत्वरूपसकर्मकत्वस्याऽऽस्धातोरुपासनरूपफलवाचकत्वाभावादनापत्तेस्ततः कर्मणि लकारो न स्यात्। न द्वितीयो गौरवात्। तृतीये त्वागतं द्योतकत्वं तात्पर्यग्राहकत्वलाभादिति भावः। दृश्यत इति। अत्र कर्मणीति शेषः॥ १॥ (४२)

तच्चादिष्वपि तुल्यमित्याह—

> तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः।
> विशेषणाद्यप्रयोगोऽपि प्रादिवच्चादिके समः॥ २॥ (४३)

आख्यातार्थाश्रयस्य अन्वर्थानुभवेऽनन्वयेऽपि तस्य अन्वर्थान्वितव्यापारे धात्वर्थे प्रकृत्यर्थत्वेनान्वये बाधकाभावादाश्रयवृत्तिरनुभवानुकूलो व्यापार इति बोधस्य सिद्धिः। कर्मणि प्रत्ययेऽपि व्यापारस्यैव प्राधान्याभ्युपगन्तॄणामभीप्सितोक्तार्थलाभ इत्यत आह—अनुगच्छतीति। गौरवात्—शक्ततावच्छेदकगौरवात्। लक्षणेति। तत्तदुपसर्गसमभिव्याहारे प्रतीयमानो योऽर्थस्तत्र लक्षणेत्यर्थः॥ १॥ (४२.)

---

१. नन्वेतावतोपसर्गाणां तात्पर्यग्राहकत्वमेवायातं न द्योतकत्वमत आह—तथा चेति। २. तात्पर्यग्राहकत्वमेवेति—एवकारेण द्योतकत्वस्य वृत्त्यन्तरत्वव्यवच्छेदः। ३. गौरवादिति—विशिष्टस्य भ्वादिगणे पाठाभावाद्धातुत्वानापत्तिरूपदोषस्यापीदमुपलक्षणम्। न च विशिष्टस्य गणे पाठः कल्प्यते इति वाच्यम्, द्विर्वचनाडाद्यव्यवस्थाऽनुपपत्तेः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अन्यत्र साक्षात्क्रियते, अलंक्रियते ऊरीक्रियते शिव इत्यादौ। अत्रापि धातोस्तदर्थे *कर्मणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमित्युपसर्गवदेव द्योतकत्वममीषामपीत्यर्थः। यद्यपि कृधातोः सकर्मकत्वमस्त्येव तथाऽप्येष्वर्थेषु सकर्मकता न स्यात्। अन्यथा वायुर्विकुरुते, सैन्धवा विकुर्वत इत्यत्रापि* स्यादिति भावः। अथोपासनासाक्षात्कारादिर्निपातार्थोऽस्तु "साक्षात्प्रत्यक्षतुल्ययोः" इति कोशस्वरसात्। तदनुकूलो व्यापार एव धात्वर्थोऽस्तु स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वमपि सुवचमिति दृष्टान्तदार्ष्टान्तिकायुक्ताविति नेदं साधकमिति चेत्? न, नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयासंभवान्निपातार्थधात्वर्थयोरन्वयस्यैवासंभवात्। अन्यथा *तण्डुलः पचतीत्यत्रापि कर्मतया तण्डुलानां धात्वर्थेऽन्वयापत्तेरिति।

किं च प्रादीनां वाचकत्वे भूयान्प्रकर्षः, कीदृशो निश्चय इतिवद् भूयान्प्र, कीदृशो निरित्यपि स्यात्। अस्मन्मते प्रादेरनर्थकत्वान्न तदन्वय इति। अत एव द्योतकता तेषां स्यादिति। साधकान्तरमभिप्रेत्याऽऽह—विशेष इति। शोभनः समुच्चयो द्रष्टव्य इतिवच्छोभनश्च द्रष्टव्य इत्यस्याऽऽपत्तेस्तुल्यसमाधेयत्वादिति भावः। अपि च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वयासंभवः। अन्यथा राजा पुरुष इत्यस्य राजसम्बन्धिपुरुष इत्यर्था *पत्तेरित्यभिप्रेत्याऽऽह—आदीति। धवखदिरयोः समुच्चय इतिवद्धवस्य च खदिरस्य चेत्येव स्यादिति भावः॥ २॥ (४३)

ननु प्रातिपदिकार्थयोर्भेदेनान्वयबोधे विरुद्धविभक्तिजन्योपस्थितिर्हेतु-

---

तदर्थे—साक्षात्काराद्यर्थे। स्यादितीति। 'सकर्मकता' इति शेषः। तथा च "अकर्मकाच्च" इति विहितात्मनेपदानुपपत्तिरिति भावः। तण्डुलः पचतीति। अत्र नामार्थः कर्मैव। आपत्तेरिति। षष्ठ्यर्थस्वस्वामिभावसम्बन्धेनान्वयापत्तेरित्यर्थः॥ २॥ (४३॥

---

१. धवस्य चेति—अत्र धवनिरूपितसमुच्चयः खदिरे, खदिरनिरूपितसमुच्चयो धवे इति भेदाऽन्वयं बोधयितुं धवस्य चेति षष्ठ्येव स्याद् न तु प्रथमा, तथा सति धवाभिन्नः समुच्चय इति स्यात्। द्योतकत्वे तु धवपदस्यैव धवसमुच्चयबोधकत्वेनादोषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रिति कार्यकारणभावो निपातातिरिक्तविषय एवेति नोक्तदोष इत्याशङ्क्याऽऽह—

पदार्थः सदृशाऽन्वेति विभागेन कदाऽपि न ।

निपातेतरसंकोचे प्रमाणं किं विभावय ॥ ३ ॥ (४४)

संदृशा सदृशेन *समानाधिकरणेनेति यावत् । अन्वेति, अभेदेनेति शेषः । विभागेन असदृशेन, असमानाधिकरणेनेति यावत् । अयमर्थः—समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिर्निपातातिरिक्तविषयेति कल्पने मानाभावो गौरवं च । अस्माकं निपातानां द्योतकत्वादन्वय एव नास्तीति नायं दोषः । अत एव घटो नास्तीत्यादौ घटपदं तत्प्रतियोगिके लाक्षणिकमिति नैयायिकाः ॥ ३ ॥ (४४)

अपि च निपातानां वाचकत्वे काव्यादावन्वयो न स्यादिति साधकान्तरमाह—

शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ।

इत्यादावन्वयो न स्यात्सुपां च श्रवणं ततः ॥ ४॥ ॥(४५)

अत्रोस्रसदृशैः शरैः रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः । *अयं चोस्रादिशब्दानां तत्सदृशपरत्व इवशब्दस्य च द्योतकत्वे संगच्छते । अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः । तथाहि-उस्रैरिति करणे तृतीया । न चोस्रोऽत्र करणमिवार्थसदृशस्य करणत्वेऽपि तस्य करणत्वं नानेन*बोधयितुं शक्यमप्रकृत्यर्थत्वात्* । इवशब्दस्य वाऽसत्त्वार्थकतया तदुत्तरं तृतीयाया*असंभवात्, *संभवे वा श्रवण-

---

समानाधिकरणेनेति । भिन्नविभक्तिरहितेनेत्यर्थः । तथा च "ज्योतिष्टोमेन यजेत" इत्यादौ 'यज' धात्वर्थयागे ज्योतिष्टोमस्याभेदेनान्वयः ॥ ३ ॥ (४४)

अयम्—उक्तार्थान्वयबोधः । अनेन—उस्रशब्दोत्तरप्रत्ययेन । अप्रकृत्यर्थत्वादिति । सदृशस्य 'इव' पदार्थतया उस्रपदार्थत्वाभावात् असम्भवादिति । अव्ययोत्तरं सर्वविभक्तीनां प्राप्तेः "अव्ययादाप्सुपः" इति सुब्लुग्विधानसामर्थ्यादेव

---

१. सदृशेति—वाचा विशेत्यादिवदावन्तत्वभ्रमवारणायाह—सदृशेनेति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रसङ्गात्, उक्तपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह—सुपां चेति। *सुपां श्रवणं चेत्यर्थः। चकारादुक्तपदोत्तर*तृतीयाऽनन्वयः समुच्चीयते। इत्यादावित्यादिपदात् "वागर्थाविव संपृक्तौ" "पार्वतीपरमेश्वरौ वन्दे" इत्यत्र वागर्थयोर्वन्दिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वय इव वागर्थस्य कर्मत्वबोधकासंभवश्च संगृह्यते। यदि च विशेषणविभक्तिरभेदार्थिका* साधुत्वमात्रार्था वा तदाऽपीवशब्दस्य वाचकत्वेऽनन्वय एव। उक्तसदृशां शराणां समानाधिकरणपदोपस्थाप्यतया भेदेनान्वयायोगात्। बाधादभेदेनापि न सः। न ह्युक्ताभिन्नसदृशाभिन्नः शर इत्यर्थो द्रष्टव्यः॥ ४॥ (४५)

ननु त्वन्मतेऽब्राह्मण इत्यादौ तत्पुरुषलक्षणाव्याप्त्यापत्तिः पूर्वपदस्यानर्थकत्वेनोत्तरपदार्थप्राधान्याभावात्। *उपसर्गस्यार्थवत्त्वाभावेन प्रातिपदिकत्वाभावाद्विभक्तिश्च ततो* न स्यादित्यत आह—

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः॥ ५॥ (४६)

वर्णिततयाऽनर्थकत्वेन करणत्वार्थकतृतीयाया असम्भवादित्यर्थः। अत एव निपातानां कारकत्वेनान्वयोऽप्यपास्तः। ननु 'पृथिव्यामेव गन्धः' इत्यादौ एवपदोत्तरलुप्तसप्तम्यर्थाधेयत्वे एवार्थस्य अन्यस्यान्वयं स्वीकृत्यापरस्मिन्नेवशब्दार्थेऽभावे तदन्वयमुपगम्य पृथिवीसमवेतः पृथिवीतरासमवेतो गन्ध इत्यर्थो दीधितिकारेण वर्णितः, तथैवात्रापीवशब्दोत्तरकरणत्वार्थकतृतीयासम्भव इत्याशङ्क्याह—संभवे वेति। इवशब्दार्थस्य कारकत्वेनान्वये तस्यासत्त्वार्थकत्वाभावेन निपातत्वाभावेऽव्ययसंज्ञाया अप्राप्तौ ततः परस्या विभक्तेः "अव्ययादाप्सुपः" इति लुगप्राप्त्या श्रवणं स्यादिति भावः। 'पृथिव्यामेव गन्धः' इत्यत्र पूर्वोक्तो बोधस्तु एवशब्दस्याधेयत्वार्थकत्वं स्वीकृत्योपपादनीय इति दिक्।

सुपां चेत्यत्र चकारो भिन्नक्रमस्तदाह—सुपां श्रवणं चेति। तृतीयानन्वय इति। एवं च तस्या असाधुत्वापत्तिः। अभेदार्थिकेति। "न केवला प्रकृतिः प्रयोक्तव्या, नापि केवलः प्रत्ययः" इतिन्यायेन साधुत्वानुशासनाय क्रियमाणा विभक्तिः विशेष्यवाचकपदोत्तरविभक्तिसजातीयैव कर्तुमुचिता उपस्थितत्वादिति विरुद्धविभक्तिराहित्यस्याभेदान्वयकारणस्य सत्त्वात्तथैवान्वय इति भावः॥ ४॥ (४५)

उपसर्गस्येति। इदं निपातमात्रोपलक्षणम्। न स्यादिति। ततश्च सुबन्त

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नञ्समासादौ योत्तरपदार्थप्रधानता सा द्योत्यमर्थमादायैव । तमेवार्थमादायार्थवत्त्वात्प्रातिपदिकत्वमित्यर्थः । वस्तुतस्तु "अव्ययादाप्सुपः" इति ज्ञापकात्सुबुत्पत्तिः । "निपातस्यानर्थकस्य" इति वार्तिकाद्वा प्रातिपदिकत्वम् । *"कृत्तद्धितसमासाश्च" इत्यनुक्तसमुच्चयार्थकचकारेण निपातानां संग्रह इति बोध्यम् । तस्माद्युक्तं निपातानां द्योतकत्वम् ।

*उक्तं चाऽऽकृत्यधिकरणवार्तिके—

*चतुर्विधे पदे चात्र *द्विविधस्यार्थनिर्णयः ।
क्रियते *संशयोत्पत्तेर्नोपसर्गनिपातयोः ॥
*तयोरर्थाभिधाने हि *व्यापारो नैव विद्यते ।
*यदर्थद्योतकौ तौ तु वाचकः स विचार्यते ॥ इति ।
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ॥

इति वृद्धोक्तावुपसर्गपदं निपातोपलक्षणम् । धातुपदं *पदान्तरस्येति बोध्यम् ॥ ५ ॥ (४६)

नन्वन्वयव्यतिरेकाभ्यां निपातानां तदर्थवाचकत्वमेव युक्तं बोधकतारूपशक्तेरबाधाच्च । *किं चोक्तरीत्या पचतीदौ धातोरेव कर्तृविशिष्टभावनायां लक्षणाऽस्तु, तात्पर्यग्राहकत्वमात्रं तिङादेः स्यादित्यरुचेः पक्षान्तरमाह—

त्वाभावेन पदत्वाभावाततः परस्य तिङन्तस्य "तिङ्ङतिङः" इति निघातानापत्तिरिति भावः । सूत्रकारमते तत्सिद्धिमाह—कृत्तद्धितेति ।

मीमांसकसम्मतिमाह—उक्तं चेति । चतुर्विधे—नाम—आख्यात—उपसर्ग—निपातरूपे । द्विविधस्य—नाम—आख्यातरूपस्य ।

संशयोत्पत्तेरिति । जातिः, व्यक्तिः, विशिष्टं वेति; व्यापारः फलं च, फलमात्रं वेति क्रमेण नामाख्यातस्थले संशयस्य उत्पत्तेरित्यर्थः । तयोः—उपसर्गनिपातयोः । व्यापारः—शक्तिः । यदर्थेति । यन्नामाख्यातान्यतरार्थगतविशेषद्योतकौ तौ निपातोपसर्गौ । तत्रेति शेषः । सः—नामाख्यातान्यतरशब्द एव वाचक इत्यर्थः । पदान्तरस्य—नामरूपस्य ॥ ५ ॥ (४६)

ननु स्वसमभिव्याहृतपदनिष्ठविशेषार्थनिरूपितशक्त्युद्बोधनमात्रेणापि तद्बोधकत्वमक्षतमेवेत्यरुचेराह—किञ्चेति । उक्तरीत्या—द्योतकतास्वीकारेणाप्यन्वयव्यतिरेकबोधजनकतास्वारस्यत्युपपत्तिरूपोपयुक्तयेत्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।
युक्तं वा न तु तद्युक्तं परेषां मतमेव नः ॥ ६ ॥ (४७)

एवं च धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयबोधो न व्युत्पन्न इति निपातातिरिक्तविषयं, समानाधिकरणप्रातिपदिकार्थयोरभेदेनान्वय इत्यपि *तथेत्यगत्या कल्पनीयमिति भावः । न त्विति । नैयायिकोक्तं *प्रादिचादिवैषम्यमित्यर्थः । *यत्तु सर्वेषां निपातानां वाचकत्वेऽर्थवत्सूत्रेणैव तेषां प्रातिपदिकत्वसंभवात् "निपातस्यानर्थकस्य" इति विधिवैयर्थ्यं, सर्वेषां द्योतकत्वे *चानर्थकस्येति व्यर्थम्, तथा च केचिद् द्योतकाः केचिद्वाचका इत्यभ्युपेयमिति । तन्न, एवं हि चादयो द्योतकाः प्रादयो वाचका इति वैपरीत्यावारणात् । सर्वथाऽनर्थकानां पादपूरणमात्रार्थमुपात्तानां* संग्रहाय वार्तिकारम्भस्य कैयटादौ स्पष्टत्वाच्च, तस्य प्रत्याख्यातत्वाच्च । परेषामिति बहुवचनं मीमांसकसंग्रहाय । केवलवृत्तशब्दात्समुच्चयाबोधाच्चकारश्रवणे तद्बोधाच्चकार एव तद्वाचको न द्योतकः । किं च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या चकारादेर्द्योतकत्वशक्तिश्च कल्प्येति गौरवं स्यादिति हि समुच्चयाधिकरणे स्थितं, तदपि न युक्तमिति भावः । तथा हि—अन्वयव्यतिरेकौ तात्पर्यग्राहकत्वेनाप्युपयुक्तौ* घटादिपादानामेव समुच्चिते लक्षणा तात्पर्यग्राहकः प्रकरणादिवच्चादिरिति स्वीकारान्न शक्तिद्वयकल्पनाऽपि । अस्माकं *लक्षणाग्रहदशायां बोधात्तत्कार्यकारणभाव आवश्यकः, एवं शक्तिग्रहस्यापीति पक्षद्वयेऽपि कल्प्या-

---

तथा—निपातातिरिक्तविषयमित्यर्थः ।

प्रादिचादिवैषम्यमिति । प्रादीनामुपसर्गसंज्ञकानां द्योतकत्वं चादीनां वाचकत्वमिति वैषम्यमित्यर्थः । तदेवोपपादयति—यत्त्वित्यादिना । अनर्थकस्येति । 'वार्तिके' इति शेषः । उपात्तानाम्—'तुह्यिचेत्यादीनाम्' इत्यग्रे शेषः ।

उपयुक्ताविति । तथा चान्वयव्यतिरेकयोरन्यथासिद्धतया तौ न शक्तिसाधकाविति भावः । लक्षणाग्रहेति । समभिव्याहृतपदस्य विशिष्टार्थे लक्षणायां गृहीतायां

---

१. द्योतकत्वशक्तिश्चेति—अत्र "अपूर्वा" इत्यस्यादौ शेषो बोध्यस्तेन अपूर्वा द्योतकत्वशक्तिः कल्प्येति भावः । २. उपयुक्ताविति—य त्वयाऽन्वयव्यतिरेकाभ्यां निपाते द्योतकत्वशक्तिः कल्प्येति कथ्यते, तन्न युक्तं यतो हि तात्पर्यग्राहकत्वेन तयोरुपक्षी-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न्तराभावेन गौरवाभावादुभयमपि युक्तमित्यभिमतम् । अत एव—

"स वाचको विशेषाणां संभवाद् द्योतकोऽपि च"

इति वाक्यपदीयं संगच्छते । दर्शनान्तररीत्या वाचकत्वमेव द्योतकत्वमेवेति नियमस्तु न युक्त इति ध्वनयन्नाह—मतमेवेति ॥ ६ ॥ (४७)

पर्यवसितमुपसंहरन्नाह—

निपातत्वं परेषां यत्तदस्माकमिति स्थितिः ।
व्यापकत्वाच्छक्तताया स्त्ववच्छेदकमिष्यते ॥ ७ ॥ (४८)

परेषां यन्निपातत्वमसत्त्वार्थकत्वे सति चादिगणपठितत्वं, शक्तिसंबन्धेन निपातपदवत्त्वं वोपाधिर्जातिर्वा तदेवास्माकमपि; परंतु सामान्यधर्मे प्रमाणानां पक्षपाताच्छक्तता द्योतकता वा *तदवच्छेदेनैव कल्प्येति नैयायिकोक्तं प्रादिचाद्योर्वैषम्यमयुक्तमित्यर्थः । व्यापकत्वात् । सामान्यत्वात् । शक्तताया इत्युपलक्षणं द्योतकताया वेत्यपि द्रष्टव्यम् ॥ ७ ॥ (४८)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे निपातानां द्योतकत्वादिनिर्णयः समाप्तः ।

अथ भावप्रत्ययार्थनिर्णयः ।

भावप्रत्ययार्थमाह[1]—

कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम् ।
त्वतलोरर्थकथनं टीकायां हरिणा कृतम् ॥ १ ॥ (४९)

लक्ष्यार्थस्य बोधात् लक्षणाग्रहशाब्दबोधयोः कार्यकारणभाव इत्यर्थः ॥६॥ (४७)

*तदवच्छेदेनैवेति । निपातत्वावच्छेदेनैवेत्यर्थः । सकलनिपातेषु, न तूत्कालितोपसर्गकनिपातेष्विति तात्पर्यम् ॥ ७ ॥ (४८)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां निपातार्थनिर्णयः ।

णतया अपूर्वद्योतकत्वशक्तेः कल्पकाभावात् । एवं च निपातानां द्योतकत्वमीदृशमेवास्मन्मते इति न तत्रापूर्वशक्तिकल्पनमिति भावः ।

१. सामान्यतो नामार्थं तद्विशेषनिपातार्थं च निरूप्य नामघटककृत्तद्धितामर्थं-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनान्यत्र रूढ्यभिन्नरूपाव्यभिचरितसंबन्धेभ्यः" इति वार्तिकवचनमिति मीमांसकादीनां भ्रममपाकुर्वन्नाह—टीकायामिति । भर्तृहरिणा महाभाष्यटीकायामित्यर्थः । त्वतलोरिति भावप्रत्ययमात्रोपलक्षणम् । अयमर्थः—समासादौ शक्तिः कल्प्यमाना राजादिसंबन्धविशिष्टे कल्प्यत इत्युक्तम् । तथाच तदुत्तरभावप्रत्ययः संबन्धं वदतीत्यर्थः ।

एतदपि भेदः संसर्ग उभयं वेत्युक्तेषु पक्षेषु भेदपक्षे न संभवतीत्यत आह मतभेदेति । पक्षभेदेनेत्यर्थः । एवं च राजपुरुषत्वमौपगवत्वं पक्तृत्वमित्यादौ स्वस्वामिभावः, अपत्यापत्यवत्संबन्धः, क्रियाकारकभावसंबन्ध इत्यन्वयबोधः । औपगवादावव्यभिचरितसंबन्धे *त्वर्थान्तरवृत्तिस्तद्धित उदाहार्यः । दामोदरत्वं कृष्णसर्पत्वमित्यादौ जातिविशेषबोधादाह—*अन्यत्रेति । रूढेरभिन्नरूपादव्यभिचरितसंबन्धेभ्यश्चान्यत्रेत्यर्थः । रूढिरुक्ता । द्वितीयं यथा—शुक्लत्वम् । अत्र "तदस्यास्त्यस्मिन्" इति मतुपो "गुणवचनेभ्यो मतुपो लुगिष्टः" इतिलुप्तत्वात्तद्धितान्तत्वेऽपि घटः शुक्ल इत्यभेदप्रत्ययाद् गुणस्यैव प्रकारत्वेन भानं जायते । तृतीये—सतो[1] भावः सत्तेति । अत्र जातावेव प्रत्यय इति दिक् ॥ १ ॥ (४९)

दण्डीत्यादौ प्रकृत्यर्थविशिष्ट*द्रव्यमात्रवाचकता तद्धितस्येति वदन्तं मीमांसकंमन्यं प्रत्याह—

अत्रार्धजरतीयं स्यादर्शनान्तरगामिनाम् ।
सिद्धान्ते तु स्थितं पक्षद्वयं त्वादिषु तच्छृणु ॥ २ ॥ (५०)

अत्र—भावप्रत्ययविषये । तथा हि—दामोदरत्वं घटत्वमित्यादौ

अर्थान्तरवृत्तिरिति । 'ऐन्द्रत्वम्' इत्यादौ देवताद्यर्थकतद्धित उदाहार्य इत्यर्थः । अन्यत्रेतीति । 'वार्त्तिके' इति शेषः ॥ १ ॥ (४९)

द्रव्यमात्रवाचकतेति । न तु तदाकाङ्क्षितसम्बन्धवाचकतेत्यर्थः ।

सुपोद्घातसङ्गत्या निरूपयिष्यन्नादौ प्रकृत्यर्थप्रकारतया भावप्रत्ययार्थं निरूपयति—भावेति ।

१. सतो भाव इति—सच्छब्दजन्यबोधे शब्दार्थकर्त्रंशे सत्तायाः प्रकारतया भानात्तदुत्तरतल्प्रत्ययेन तस्या एव भानमिति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भावप्रत्ययस्य संबन्धानभिधायकत्वेन मीमांसकानां दण्डित्वमित्यादिष्वपि *तदभिधानं न स्यात् । प्रकृतिजन्यबोधे प्रकारः प्रकृत्यर्थसमवेतो हि तदुत्तरभावप्रत्ययेनाभिधीयते । *अन्यथा घटत्वमित्यादौ दण्डादेश्च तदुत्तरभावप्रत्ययवाच्यतापत्तेः । *न च तन्मते दण्डीत्यादिबोधे संबन्धः[1] प्रकारः । यत्तु—

*यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः ।
तदा गत्यन्तराभावात्सम्बन्धो वाच्य आश्रितः ॥

इति । तन्न, इनादेः संबन्धावाचकत्वेनोपपत्तावगत्यभावात् । *प्रपञ्चितं

तदभिधानमिति । सम्बन्धाभिधानमित्यर्थः । अन्यथा उभयस्यावाच्यत्वे । द्रव्यत्वादेरिति । तस्य घटसमवेतत्वेऽपि तज्जन्यबोधे प्रकारतया भानं नास्तीति न घटत्वपदवाच्यत्वम्, एवं दण्डिपदजन्यबोधे दण्डस्य प्रकारतया भानेऽपि तत्समवेतत्वं नास्तीति न दण्डस्य दण्डित्वपदवाच्यत्वमिति भावः । न चेति । चो हेत्वर्थः । अतस्तन्मते दण्डीत्यादितो बोधे सम्बन्धो न प्रकारतया भासते अतो दण्डित्वमित्यादिषु तदभिधानं न स्यादिति योजना ।

यदेति । यदा यत्र (दण्डित्वमित्यत्र) स्वसमवेतः प्रकृत्यर्थे समवायसम्बन्धेन विद्यमानः वाच्यः प्रकृतिजन्यबोधे प्रकारः अपरो गुणः सम्बन्धातिरिक्तो नास्ति, तदा तत्रस्थले सम्बन्धो वाच्यः प्रकृतिजन्यबोधाप्रकारोऽपि स्वसमवेतः संयोगादिसम्बन्धस्त्वादिभावप्रत्ययवाच्य आश्रितो गत्यन्तराभावादित्यर्थः । प्रपञ्चितमिति । दण्डीत्यादौ सम्बन्धावाच्यत्वे दण्डित्वमित्यत्रापि सम्बन्धस्य वाच्यत्वं न स्यात्, प्रतीतेस्तद्वदेवोपपत्तेः । न च त्वादेर्वैयर्थ्यापत्त्या सम्बन्धे वाच्यत्वं कल्प्यते इति वाच्यम्, घटत्वमित्यादौ क्लृप्तपदार्थतावच्छेदकशक्त्यैव निर्वाहात् । अनुभवानुरोधात् सम्बन्धे त्वादिशक्तिकल्पनमिति चेन्न, शक्त्यन्तरकल्पनामपेक्ष्य इनादीनां क्लृप्तशक्तौ धर्मिवत् सम्बन्धविषयकत्वेनोपपत्तौ पृथक्शक्तिकल्पनाऽयोगात् । तथा सति क्लृप्तपदार्थतावच्छेदकशक्त्यैव तद्भानसम्भव इत्यादि बृहद्भूषणे प्रपञ्चितं तत एवावगन्तव्यम् ।

---

१. सम्बन्धः प्रकार इति—अस्याग्रे 'येन तस्य त्वादिप्रत्ययवाच्यता स्यादिति शेषो बोध्यः । मीमांसकमतं खण्डयति–यत्त्विति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चैतदादावेव वैयाकरणभूषणे। ननु तत्रापीदं[1] वैषम्यं*[2] कथमित्यत आह-*सिद्धान्ते त्विति॥ २॥ (५०)

तौ पक्षावाह—

प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम्।
धर्म[3]—मात्रं वाच्यमिति यद्वा शब्दपरा अमी॥ ३॥ (५१)
जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञिते।

प्रयोग उपाधिर्निमित्तं प्रकृत्यर्थप्रकारतां प्रकारतया भासमानं ध[1] वाच्यतयाऽऽश्रित्य त्वादयो जायन्ते। प्रकृतिजन्यबोधेप्रकारस्त्वाद्यर्थ इति यावत्।

ननु घटत्वमित्यत्र प्रकारत्वात्तदुत्तरत्वप्रत्यये घटत्वत्वस्यापि वाच्यता स्यादित्यत्रेष्टापत्तिमाह—धर्ममात्रमिति। न त्वत्र लघुगुरुविचार इत्यभिप्रायः। *तत्तद्व्यक्ति[4]विशिष्टब्रह्मसत्ताया एव घटत्वघटत्वत्वादिरूपत्वात्।

संबन्धिभेदात्सत्तैव भिद्यमाना गवादिषु।
जातिरित्युच्यते, तस्यां सर्वे शब्दा व्यवस्थिताः* ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः॥

इदं वैषम्यमिति। 'दामोदरत्वम्' इत्यादौ सम्बन्धस्यावाच्यत्वं 'दण्डित्वम्' इत्यादौ तस्य वाच्यत्वमिति वैषम्यमित्यर्थः। सिद्धान्ते त्विती ति। एतदग्रे "जायन्ते इति वक्ष्यमाणशेषेणान्वितं, सिद्धान्ते प्रकृतिजन्यबोधप्रकारे त्वादयो जायन्ते इत्यर्थः, स प्रकृतिजन्यबोधप्रकारः क इत्यत्र पक्षद्वयं स्थितमिति योजना" इति पाठो मुम्बापुरीस्थमुद्रितपुस्तकेऽधिक उपलभ्यते ॥ २ ॥ (५०)

तत्तद्व्यक्तिविशिष्टब्रह्मसत्ताया इति। वैशिष्ट्यं च स्ववृत्तित्वेन बोध्यम्। व्यवस्थिता इति। वाच्यवाचकसम्बन्धेनेति भावः।

---

१ तत्रापि—शाब्दिकस्याऽपि। २. वैषम्यमिति—क्वचिज्जात्यादिवाचकत्वं क्वचिच्च सम्बन्धवाचकत्वमित्येवं वैषम्यमित्यर्थः।

३. धर्ममात्रमिति—धर्मत्वेन वाच्यता न तु तत्तद्रूपेण, शक्तीनामानन्त्यापत्तेः, शक्यतावच्छेदकानामानन्त्यादिति भावः।

४. वस्तुतस्तु गौरवमेव नेति दर्शयति—तत्तद्व्यक्तिविशिष्टेति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति वाक्यपदीयात्। उक्तं च "तस्य भावस्त्वतलौ" इति सूत्रे वार्तिककारैः—"यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ" इति। यस्य गुणस्य विशेषणतया भासमानस्य भावादाश्रयत्वात् द्रव्ये विशेष्ये शब्दनिवेशः शब्दप्रवृत्तिस्तस्मिन्वाच्ये त्वतलावित्यर्थः। तथा च रूपादिशब्देभ्यो जातौ, शुक्लाणुदीर्घमहदादिभ्यो गुणे, पाचकादिशब्देभ्यः क्रियायाम्, घटादिशब्देभ्यो जातौ प्रत्ययः, रूपादिशब्दानां जातिप्रकारकबोधजनकत्वात्। पाचकादिशब्दानां क्रियाप्रकारकबोधजनकत्वे तस्यां प्रत्ययः, संसर्गप्रकारकबोधजनकत्वमिति मते च संसर्ग इति व्यवस्था सूपपादेति[1] भावः। *तत्र जातिवाचकानां *व्यक्तय एव शक्यतावच्छेदिकाः। तथा च घटत्वमित्यत्र घटवृत्तिरसाधारणो धर्म इति बोध इत्यादि द्रष्टव्यम्।

पक्षान्तरमाह—यद्वेति। "यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति स तेषां भावः" इति वार्तिकोक्तो यद्वाशब्दस्तत्सूचनप्रयोजनकोऽपि*। भवन्ति वाचकत्वेन प्रवर्तन्त इति भावाः शब्दाः स्वेन स्वरूपेणार्थेन भवन्ति प्रवर्तन्तेऽतः स तेषां भावः प्रवृत्तिनिमित्तमित्यर्थः। अयं भावः—अर्थवच्छब्दोऽपि द्रव्ये प्रकारः हरिहरनलेदवाकुयुधिष्ठिरवसिष्ठादिशब्देभ्यस्तत्तद्वाच्यः कश्चिदासीदिति[2] शब्दप्रकारकबोधस्य सर्वसिद्धत्वात्। *अन्यथा वनौषधिवर्गादेर्नागरिकान्प्रत्यबोधकत्वापत्तेश्च। *एवमेवाप्रसिद्धार्थकपदेष्वनुभवः*सर्वसिद्धः, न तु घटादिपदेष्विव *तत्तज्जात्यादिरूपेण। तथा चो*भयमवच्छेदकम्*। यस्य *तथाशक्तिग्रहस्तस्य जात्यादिरूपेण-

---

तत्र—जात्यादिवाचकभावप्रत्ययमध्ये। व्यक्तय इति। भावप्रत्ययप्रकृत्यर्थरूपा इत्यर्थः।

प्रयोजनकोऽपीति। 'यद्वा' इत्यादेर्वार्तिकसूचना[ने]त्यर्थः। तद्वार्तिकप्रतीकमिदमिति तात्पर्यम्। अन्यथा-शब्दानां प्रकारतया भानस्यानङ्गीकारे। एवमेव-शब्दस्य प्रकारत्वेनैव। अनुभवः-बोधः। तत्तज्जात्यादिरूपेणेति। अत्र 'अनुभवः सिद्धः' इत्यनुषङ्गेण सम्बध्यते। उभयम्-जात्यादिः शब्दश्च। अवच्छेद-

---

१. सूपपादेति—जातावेव भावप्रत्ययो भवतीति नियमाभावादित्यर्थः।
२. कश्चिदासीदिति—अनेन तत्र जात्यादिप्रकारकबोधो न सम्भवतीति सूचितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कोपस्थितिः। पदप्रकारकः शक्तिग्रहस्तु *विशिष्य नापेक्षितः किं तु इदं पदं क्वचिच्छक्तं साधुपदत्वादित्यादिरूप एवापेक्ष्यत इति विशिष्यागृहीतशक्तिकेभ्यः* तथैव बोधः। तथा च शब्दोऽपि त्वप्रत्ययार्थ इति प्रपञ्चितं भूषणे ॥ ३३ ॥ (५१३)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे भावप्रत्ययार्थनिर्णयः।

अथ देवतादिप्रत्ययार्थनिर्णयः।

सोऽस्य देवतेत्यत्र *देवताविशिष्टं देयं प्रत्ययार्थः। ऐन्द्रं वैश्वदेवीत्यादाविन्द्रादे*र्देवतात्वोपस्थापकान्तराभावात्तेन रूपेणोपस्थितये शक्तिकल्पनावश्यकत्वात्।

*अत एव—आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।

कम्–शक्यतावच्छेदकम्। एतदग्रे 'एवमेव प्रसिद्धपदार्थेषु' इत्यधिकं क्वचित्पुस्तके दृश्यते। तथा–जात्यादिपुरस्कारेण। विशिष्य–विशेषरूपेण। तथैव–पदप्रकारक एव। शक्तिग्रहवैलक्षण्याद्बोधवैलक्षण्यमिति भावः ॥ ३३ ॥ (५१३)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां भावप्रत्ययार्थनिर्णयः समाप्तः।

देवताविशिष्टं देयमिति। वैशिष्ट्यं च स्वोद्देश्यत्वसम्बन्धेन। तथा च देवतोद्देश्यकदानकर्मभूतं द्रव्यमिति तदर्थः। देवतात्वोपस्थापकेति। देवतात्वेन रूपेण इन्द्रादीनामुपस्थापकम् इन्द्रादिपद नास्ति किन्तु इन्द्रत्वादिनेति तेन रूपेण देवतात्वेन इन्द्रादीनामुपस्थितये तद्धितस्य देवतांशेऽपि शक्तिकल्पनमावश्यकमित्यर्थः। अत एव—देवताविशिष्टद्रव्यार्थकत्वादेव।

१. तथैव बोध इति—पदवाच्यत्वप्रकारक एवेत्यर्थः, एवकारेण जात्यादिप्रकारकबोधस्य व्यावृत्तिः। एतत्कथनम्, कश्चिदर्थो तत्तादिपदवाच्यः, अर्थत्वादित्यानुमानिकशक्तिग्रहाऽभिप्रायेणेति भावः। इति भावप्रत्ययार्थनिर्णयः।

२. मीमांसकमतं निरस्यन् प्रसङ्गसङ्गत्या देवताद्यर्थकतद्धितानामप्यर्थं स्वमतेन दर्शयति—साऽस्येति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आमिक्षापदसांनिध्यात्तस्यैव *विषयार्पणम् ॥ इति,
*केवलाद्देवतावाची तद्धितोऽग्नेः समुच्चरन् ।
नान्ययुक्ताग्निदैवत्यं प्रतिपादयितुं क्षमः ॥

इति च मीमांसकैरप्युक्तमित्याशयेनाऽऽह—

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् । (५२)
अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः ॥ १ ॥
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा ॥ (५३)

एकदेशे देवतारूपे । तच्च विशेषणमभेदेनेत्याह—अभेदश्चेति । ननु देवतायाः *प्रत्ययार्थैकदेशत्वान्न प्रकृत्यर्थस्य तत्राभेदे[1]नाप्यन्वय इत्याशयेनाऽऽह—देवतायामिति । तथा च पदार्थैकदेशतैव नास्तीति भावः ॥१३॥

नन्वग्न्यादिदेवस्य प्रकृत्यैव लाभान्न तत्र शक्तिः कल्प्या । न च देवतात्वेन रूपेणोपस्थितये सा कल्प्यते प्रकृतेर्लक्षणयैव तथोपस्थितिसंभवात् । उपसर्गाणां द्योतकत्वनये प्रजयतीत्यत्र प्रकृष्टजयप्रत्ययवदित्यभिप्रेत्याऽऽह—

प्रदेये[2] एव वा शक्तिः प्रकृतेर्वाऽस्तु लक्षणा ॥ २ ॥
देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः । (५४)

तस्यैव–तद्धितस्यैव । विषयार्पणमिति । 'साऽस्य देवता'' इति सूत्रेण अस्येत्यर्थे तद्धितविधानात्सर्वनाम्नो बुद्धिविषयविशेषबोधकतया 'कोऽसौ विशेषः' इत्याकाङ्क्षायामामिक्षापदसान्निध्यादामिक्षारूपो विशेष इति लभ्यते इत्यर्थः ।

केवलादिति । आग्नेय इत्यादावग्निशब्दमात्रादुच्चार्यमाणो देवतावाची ढक् प्रत्ययस्तद्धितसञ्ज्ञकः सोमदेवताविशिष्टाग्निदेवता–सम्बन्धं बोधयितुं न समर्थः । तथा–सति अग्निशब्दस्य सोमसापेक्षत्वेन "सापेक्षमसमर्थं भवति" इति असामर्थ्यात्तद्धित एव न स्यादित्यर्थः । प्रत्ययार्थैकदेशत्वादिति । "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति न्यायेनेति भावः ॥ १३ ॥ (५३)

---

१. अभेदेनाऽपीति—भेदसम्बन्धस्य बाधितत्वेन न तेनाऽन्वयः सम्भवतीति सूचयितुमपिशब्दः प्रयुक्तः ।

२. प्रदेये एवेति—एवशब्दो देवतारूपार्थस्य व्यवच्छेदकः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न चैन्द्रं दधीत्यादौ द्रव्यस्य पदान्तराल्लाभात्कुतः पुनः प्रत्ययस्य तत्र शक्तिः कल्प्यत इति वाच्यम्। पदान्दराश्रवणेऽपि तत्प्रतीतेरैन्द्रं दधीति सामानाधिकरण्याच्च। *अन्यथाऽऽख्यातस्यापि कर्तृकर्मवाचित्वं न स्यात्*। *मीमांसकानां पुनः प्रत्ययस्य देवतात्वमेवार्थोऽस्तु। द्रव्यं पदान्तराल्लभ्यते एवेति आख्यातस्य कर्तृवद्वाच्यत्वं माऽस्त्विति कुतो न शक्यते वक्तुमिति दिक्। देवतायां देवतात्वरूपेण। निरूढेति। अनुपपत्तिज्ञानापूर्वकत्वमनादिप्रयोगावच्छिन्नत्वं वा तत्त्वमिति भावः॥ २३॥

अनयैव रीत्याऽन्यत्राप्यवधेयमित्याह—

क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता॥ ३॥
वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते॥ (७५)

"तदस्यां प्रहरणमिति क्रीडायां णः" इत्यत्र प्रहरणविशिष्टा क्रीडा *प्रहरणक्रीडे, क्रीडामात्रं वार्थः। आदिना "सोऽस्य निवासः" "साऽस्मिन्पौर्णमासीति संज्ञायाम्" "तदस्यास्त्यस्मिन्निति मतुप्" इत्यादिकं संगृह्यते। वृत्तिमात्रेऽतिरिक्तशक्तेः "समर्थः पदविधिः" इति सूत्राल्लाभादुक्तो विचारः शास्त्रान्तरीयैः सह *तद्रीत्यैवोक्तः, आरोपितप्रकृतिप्रत्यार्थमादाय वा, वस्तुतो विशिष्टशक्त्यैवार्थोपस्थितिरित्याह—वस्तुत इति।

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे देवतादिप्रत्ययार्थनिर्णयः॥

अन्यथा—समभिव्याहृतपदेनैवार्थलाभात् तत्र शक्त्यस्वीकारे। न स्यादिति। तत्रापि 'देवदत्तः' 'ओदनम्' इत्यादिसमभिव्याहृतपदैरेव कर्तृकर्मलाभसिद्धेस्तत्रापि शक्तिकल्पनं न स्यादित्यर्थः। मीमांसकानामिति। इदं दूषणं मीमांसकानामाख्यातस्य कर्तृकर्मावाचकत्वस्वीकारे प्रतिबन्दीरूपमिति तात्पर्यम्॥ २३॥ (५४)

प्रहरणक्रीडे—प्रहरणं च क्रीडा च ते इत्यर्थः। तद्रीत्यैव—शास्त्रान्तररीत्यैव।

---

१. ननु तात्पर्याऽनुपपत्तिज्ञानं गङ्गायां घोष इत्यादौ वर्तते एव तत्रापि निरूढत्वव्यवहारो दृश्यतेऽत आह—अनादीति। लक्ष्ये योऽनादिः प्रयोगस्तदवच्छिन्नत्वमित्यर्थः। अत्र कर्मतासम्बन्धेन प्रयोगस्य अवच्छेदकत्वमिति।

२. लाघवमाहत्याह—क्रीडामात्रमिति मात्रपदेन प्रहरणरूपार्थस्य व्यावृत्तिः। अत्र कल्पे दण्डपदस्य दण्डप्रहरणे निरूढा लक्षणा। इति देवतादिप्रत्ययार्थनिर्णयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथाभेदैकत्वसंख्यानिर्णयः ।

वृत्तिप्रसङ्गात्तत्राभेदैकत्वसंख्या प्रतीयत इति सिद्धान्तं दृष्टान्तेन प्रतिपादयति—

अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः ।
कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते ॥ १ ॥ (५६)

*संख्याविशेषाणामविभागेन सत्त्वमभेदैकत्वसंख्या ।

उक्तं च वाक्यपदीये—

यथौषधिरसाः सर्वे मधुन्याहितशक्तयः ।
अविभागेन वर्तन्ते तां* संख्यां *तादृशीं विदुः ॥ इति ।
परित्यक्तविशेषं वा *संख्यासामान्यं तत् ।

उक्तं च—*भेदानां वा परित्यागात्संख्यात्मा स तथाविधः ।

विशिष्टशक्तिस्वीकारमनभ्युपगम्येत्यर्थः ॥ ३३ ॥ (५५)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां देवतादिप्रत्ययार्थनिर्णयः ।

संख्याविशेषाणामिति । एकत्वद्वित्वत्रित्वादीनाम् । **अविभागेन**—अभेदेन संख्यात्वेनेत्यर्थः । **सत्त्वं** बोधविषयतयेति शेषः, न तु एकत्वत्वादिनेति भावः । **ताम्**—वृत्तिघटकपदार्थगतामित्यर्थः । **तादृशीम्**—अभेदैकत्वसंख्याम् । **संख्यासामान्यं तदिति** । अस्मिन् मते च संख्यात्वेन संख्यासामान्यस्यैव भानं, न संख्याविशेषस्य; पूर्वमते तु संख्यात्वेनैव रूपेण एकत्वादिसंख्याविशेषाणां भानमिति तात्पर्यम् । न च "निर्विशेषं न सामान्यम्" इति न्यायेन तत्तद्विशेषानालिङ्गितसामान्यस्यासत्त्वाद् द्वितीयपक्षोऽसम्भवीति वाच्यम् । वन्ध्यासुतः, राहोः शिरः इतिवद्विकल्पात्मकस्य संभवेनादोषाद् ।

अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि ।

इत्युक्तेः । अत्र प्रमाणमाह—**भेदानामिति** । भेदानाम् एकत्वादिकृतानाम् । परित्यागात् **सः** वृत्तिभास्यः **तथाविधः** **संख्यात्मा**—अभेदैकत्वसंख्यारूपः

---

१. ननु प्रातिपदिकघटकप्रत्ययार्थनिरूपणप्रस्तावे तद्घटकस्यैव निरूपणं न्याय्यमित्यभेदैकत्वनिरूपणमनुचितमतः सङ्गतिं दर्शयितुमाह—वृत्तिप्रसङ्गादिति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्यापाराज्जातिभागस्य भेदापोहेन वर्तते ॥
*अगृहीतविशेषेण यथा रूपेण रूपवान् ।
प्रख्यायते न *शुक्लादिः, भेदापोहस्तु गम्यते ॥ इति ।

अस्या वृत्तौ समासादौ भानं न्यायसिद्धमिति शेषः । इति मतस्थिति-वैयाकरणानाम् । अयं भावः-राजपुरुष इत्यादौ राज्ञः राज्ञोः राज्ञां वाऽयं पुरुष इति जिज्ञासा जायते । विशेषजिज्ञासा च सामान्यज्ञानपूर्विकेति सामान्यरूपेण तत्प्रतीतिः शब्दादावश्यकी । अतस्तस्यां शक्तिरिति ।

तस्या एकत्वेन प्रतीतौ न्यायमाह— कपिञ्जलेति । बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात्तद्रूपेणैव भानवदेकत्वस्य सर्वतः प्रथमोपस्थि-

---

जातिभागस्य संख्यात्वस्य व्यापारात् तेन रूपेण भानात् भेदापोहेन भेदस्य विशेषस्यैकत्वादेरपोहोऽग्रहस्तेन वर्तते । एकत्वत्वाद्यग्रहकालिकसंख्यात्वप्रकारकप्रतीति-गोचरः संख्यापदार्थोऽभेदैकत्वपदव्यपदेश्य इति समुदायार्थः । तत्र दृष्टान्तमाह—अगृ-हीतेति । अस्य 'दूरस्थघटादिः' इत्यादि । यथा शुक्लादिगुणानालिङ्गितरूपस्यासत्वेऽ-पि रूपत्वेनैव हि तद्गतरूपस्य भानं न तु शुक्लत्वकृष्णत्वादिना तथा प्रकृतेऽपीति बोध्यम् । शुक्लादिः—शुक्लत्वादिरूपेण तत्तद्रूपविशिष्टः न प्रख्यायते ज्ञायते किं तु भेदापोहः भेदाग्रहो गम्यते इत्यर्थः । सामान्यरूपेणेति । तथा च संख्याव-द्राजसम्बन्धी पुरुष इति बोधः ।

तस्याः संख्याया एकत्वत्वेनैव भानं न तु संख्यात्वसामान्येनेति मतान्तरमाह— तस्या इति । एकत्वेनेति । एकत्वत्वेनेत्यर्थः । कपिञ्जलेतीति । अश्वमेधे हि "वसन्ताय कपिञ्जलानालभते" इति श्रुतम् कपिञ्जलः चातकस्तित्तिरिर्वा । तत्र कपिञ्जलानिति बहुत्वश्रुत्या किं त्रित्वसंख्योपादेया चतुष्ट्वादिरपि वेति संशये त्रित्व-चतुष्ट्व-पञ्चत्वादीनां बहुत्वाविशेषादिच्छया या काचिदेका संख्या ग्राह्येति पूर्वपक्षे त्रित्वमनुपादाय चतुष्ट्वादीनामुपादातुमशक्यतया प्रथमं त्रित्वे गृहीते तावतैव शास्त्रस्य कृतार्थत्वान्न तदन्यसंख्याग्रहणं ततोऽधिकपक्षिहिंसायां प्रत्यवायादिति मीमां-सकैः सिद्धान्तितं कपिञ्जलाधिकरणे (जै० न्या० ११-अध्या०; १-पादः, ८-

---

१. यथा रूपेणेति—यथा दूराद्रूपत्वेन रूपं गृह्यते न तु शुक्लत्वरक्तत्वादिना, तथा प्रकृतेऽपि सङ्ख्यात्वेन सङ्ख्यासामान्यमेव ज्ञायते न तु द्वित्वादिसंख्याविशेष इति भावः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्वमस्तीति भावः । वस्तुतस्तु * जिज्ञासैव नानुभवसिद्धा । तथात्वे वा ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावात्तत्तद्रूपेणैव[1] वाच्यता स्यादिति ध्येयम् ।। १ ।। (५६)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारेऽभेदैकत्वसंख्याया वृत्तौ भाननिर्णयः समाप्तः ।।

अथ संख्याविवक्षादिनिर्णयः ।

सं[2]ख्याप्रसङ्गादुद्देश्यविधेययोः संख्याविवक्षाविवक्षे निरूपयति—

लक्ष्यानुरोधात्संख्यायास्तन्त्रातन्त्रे मते यतः ।
पश्वेकत्वादिहेतूनामाश्रयणमनाकरम् ।। १ ।। (५७)

ग्रहं संमार्ष्टीत्यत्रोद्देश्यग्रहगतमेकत्वम्*अविवक्षितमितिवन्नास्माकमुद्देश्यविशेषणाविवक्षानियमः, धातोरित्येकत्वस्य विवक्षितत्वात् ।

उत्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ।
तदा सर्वैर्विशिष्येत द्वन्द्वोत्पन्नसुबर्थवत् ।।

अधि०) । जिज्ञासेति । राज्ञः राज्ञोः राज्ञां वा पुरुषः इति जिज्ञासेत्यर्थः ।। १ ।।
इति श्रीसरलानामकवैयाकरणभूषणसारटीकायामभेदैकत्वसंख्याया वृत्तौ भाननिर्णयः ।

*अविवक्षितमिति । ग्रहसंमार्जनाधिकरणे (पू० मी० अध्या० ३ पाद० १ अधि० ७) हि "दशापवित्रेण ग्रहं संमार्ष्टि" इति श्रुतौ 'ग्रहम्' इति द्वितीयैकवचनार्थैकत्वं विवक्षितं 'पशुना यजेत' इत्यत्रानेकपशुकरणकत्ववारणाय विधेयपशुगतैकत्वविवक्षणवद् उद्देश्यगतस्यापि तस्य तथात्वौचित्यात्, ग्रहशब्दस्य जातिवा-

१. तत्तद्रूपेणैवेति—एकत्वत्वादिरूपेणेत्यर्थः । एवपदेन संख्यासामान्यधर्मस्य व्यावृत्त्या तेन रूपेण वाच्यता न युक्तेति तत्त्वम् ।। इति भाननिर्णयः ।

२. अभेदैकत्वसङ्ख्यानिरूपणावसरे कपिञ्जलानालभेतेत्यत्र विधेयविशेषणत्वेन त्रित्वसंख्याया विवक्षया संख्यास्मरणं जातमतः सामान्यरूपेण तस्या विवक्षाविवक्षे निरूपयितुं प्रसङ्गसङ्गतिं दर्शयति—संख्याप्रसङ्गादिति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इति शब्दान्तराधिकरणे भट्टपादैरभिधानाच्च। "आर्धधातुकस्येड् वलादेः" इत्यत्रानुवाद्यार्धधातुकविशेषणस्य वलादित्वस्य विवक्षितत्वाच्च। एवं पशुना यजेतेतिवद्विधेयविशेषणं विवक्षितमित्यपि न। "रदाभ्यां निष्ठातो नः पूर्वस्य च दः" इत्यत्र नकारद्वयविधानानापत्तेः। तथा च भिन्न इत्यत्र नकारद्वयलाभो न स्यात्। "आद् गुणः" इत्यादावेकत्वविवक्षयैवोपपत्तौ "एकः पूर्वपरयोः" इत्यत्रैकग्रहणवैयर्थ्यापत्तेश्चेति भावः। शब्दार्थस्तु—संख्याया लक्ष्यानुरोधात्तन्त्रातन्त्रे * यतो मते, अतः * पश्वेकत्वाधिकरणोक्तहेतूनामाश्रयणं नास्मत्सिद्धान्तसिद्ध-

---

त्वेन नस्यः एव संस्कार्यताप्रतीत्या तदाश्रयभूतस्य कस्यचिदपिद्रव्यस्य संस्कारेण सर्वगतजातेरेकत्वेन संस्कारसिद्धेरेकत्वाविवक्षणे बीजाभावाच्चेत्याशङ्क्य 'ग्रहम्' इति द्वितीयाश्रुत्या ग्रहस्योद्देश्यत्वावगतेः प्रयोजनत्वाच्च प्राधान्येन प्रतिप्रधानं गुणावृत्तिः इति न्यायेन प्रधानसंख्यानुरोधिगुणावृत्तेः सर्वसंमतत्वेन संमार्जयितव्यग्रहेयत्ताया अबुभुत्सितत्वात् श्रूयमाणस्याप्येकत्वस्याविवक्षणमेव।

किञ्च ग्रहैकत्वविवक्षायां संमार्गोद्देशेन ग्रहत्वस्य एकत्वस्य च विधाने वाक्यभेदापत्तिः। "प्राजापत्या नवग्रहाः" इत्यादिवाक्यविहितग्रहानुवादेन सम्मार्गविधाने ग्रहं संमार्ष्टि तं चैकमितिवचनव्यक्तौ तस्य स्पष्टत्वात्। पशुदृष्टान्तस्त्वत्र न संघटते। न हि पशोस्तत्र प्राधान्यं किन्तु यागस्य। तथा च तत्रैकत्वेऽविवक्षिते गुणभूतपश्वनेकत्वानुरोधेन प्रधानस्य यागस्याऽऽवर्तनीयतापत्तिरिति तत्रैकत्वमविवक्षितम्। नाप्यत्र ग्रहशब्दो जातिवाची। जातेरमूर्तत्वेन संस्कार्यत्वासम्भवात्। तस्मादिहैकत्वमविवक्षितमिति **मीमांसकैः** सिद्धान्तितम्।

तन्त्रातन्त्रे—विवक्षाऽविवक्षे। **पश्वेकत्वाधिकरणेति**। तत्र हि "अग्नीषोमीयं पशुमालभेत" इत्यत्र पशोरेकत्वं यागाङ्गं न भवति। तस्य श्रुत्या पशुसम्बन्धावगमात्। 'पशुम्' इत्येतस्मिन्नेव पदे पशुतदेकत्वयोः श्रवणात् पदान्तरनैरपेक्ष्येण तयोः परस्परसम्बन्धोऽवगम्यते। यागस्तु 'आलभेत' इत्यनेन पदान्तरेणोपात्त इति तत्र वाक्येन सम्बन्धावगतिः वाक्याच्च श्रुतिर्बलीयसी। तत एकत्वस्य

---

१. पशुना यजेतेति—यथा तत्र वाक्यान्तरप्राप्तयागमनूद्य पशोर्विधानात्पशुगतमेकत्वं विवक्ष्यतेऽतश्चानेकपशुकरणकयागान्नादृष्टसिद्धिरेवं विधेयगतविशेषणं विवक्ष्यत एवेति यो मीमांसकनियमः सोऽपि अत्र शाब्दिकमते नाङ्गीक्रियते इति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मिति। *आदिना *ग्रहैकत्वसंग्रहः ॥ १ ॥ (५७)

ननु विधेयविशेषणविवक्षाऽऽवश्यकी। अन्यथा सुध्युपास्य इत्यत्राऽनन्तयकाराद्यापत्तेः, भिन्नमित्यत्र नकारद्वयवद*न्येषामप्यापत्तेः, "एकः पूर्वपरयोः" इत्यत्रैकग्रहणं च स्थानिभेदादादेशभेदवारणायेत्यभिप्रेत्याऽऽह–

विधेये भेदकं तन्त्रमन्यतो नियमो न हि।

ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् ॥ २ ॥ (५८)

भेदकं—विशेषणं तन्त्रं-विवक्षितम्=विधेयविशेषणं विवक्षितमि*त्यस्तु, तथाऽप्यन्यतः-*अनुवाद्यस्य नियमो न हि। कचित्तन्त्रं कचिन्नेत्यर्थः। ग्रहैकत्वादौ यो हेतुर्वाक्यभेदादिस्तस्यात्राऽऽश्रयणम*नाकरम्। एकत्वविशिष्टं धातुं वलादित्वविशिष्टमार्धधातुकं चोद्दिश्य प्रत्ययेडागमादे*र्विधिसंभवादिति भावः ॥ २ ॥ (५८)

यागाङ्गत्वाभावाद् द्वाभ्यां बहुभिर्वा यागोऽनुष्ठातुं शक्यते इत्याशङ्क्य—'पशुम्' इति पदं यद्यप्येकम्, तथापि प्रकृत्या पशुर्निर्दिष्टः, प्रत्ययेन च कारकम्, एकत्वञ्च। तत एकत्वस्यासन्नतरे कारके प्रथमं सम्बन्धो भवति। कारकत्वं च क्रियाहेतुत्वम् तथा सति कारकद्वारा क्रियायामपि सम्बन्धः प्रत्ययेनैवावगतः। क्रियाविशेषश्च सन्निहितपदान्तरोपात्तो याग इति यजनाङ्गत्वमेकत्वस्य सिद्धयति। तच्चैकत्वं स्वयममूर्ततया यागक्रियां निष्पादयितुमसमर्थं सत्तत्र समर्थं पशुद्रव्यं पश्चादवच्छिनत्ति। तत एकत्वस्य यागाङ्गत्वान्न द्वाभ्यां त्रिभिर्वा यागसिद्धिरित्युक्तम्। तथा च तत्राधिकरणे [जै० न्या० अ० ४ पा० १ अधि० ५] उक्तानां हेतूनां समानप्रत्ययोपात्तत्वादीनामित्यर्थः। आदिना—'पश्वेकत्वादि' इति कारिकास्थादिपदेन। ग्रहैकत्वेति। तदधिकरणोक्तहेतूनां वाक्यभेदादीनामाश्रयणं नास्मत्सिद्धान्तसिद्धमिति भावः ॥ १ ॥ (५७)

अन्येषाम्—तृतीयादिनकाराणाम्। अस्तु इति। अस्य 'इत्यर्थः' इति शेषः अनुवाद्यस्येति। विशेषणविवक्षणे इत्यग्रे शेषः। 'अन्यत' इति सप्तम्यर्थे सार्वविभक्तिकस्तसिल्। अनाकरमिति। असमत्सिद्धान्तसिद्धं नेत्यर्थः। विधिसम्भवादिति। विधेः-विधानस्य संभवाद् वाक्यभेदाभावादित्यर्थः ॥ २ ॥ (५८)

---

१. उद्दिश्येति—एवं च तत्रैकत्वादिविशिष्टधातुत्वाद्यनुवादसामर्थ्यादेव एकत्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नन्वेवं* भिन्न इत्यत्र नकारद्वयलाभो न स्यादित्यत आह—

रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः ।
क्षतिर्नैवास्ति तन्त्रत्वे विधेये भेदकस्य तु ॥ ३ ॥ (५९)

चकारसूचितं–'निष्ठातस्य नः, पूर्वेदस्य च नः' इति वाक्यभेदमादाय नकारद्वयलाभ इत्यर्थः ॥ ३ ॥ (५९)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे उद्देश्यविधेययोः संख्याविवक्षानिर्णयः समाप्तः ॥

अथ क्त्वाद्यर्थनिर्णयः ।

क्त्वाप्रत्ययादेरर्थं निरूपयति—

अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः ।
समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः ॥ १ ॥ (६०)

तुमादयस्तुमुन्नादयः । प्रकृत्यर्थे–भावे । आदिना क्त्वादेः संग्रहः । भावे इत्यत्र मानमाह–अव्ययकृत इति । *"अव्ययकृतो भावे" इति वार्तिकादित्यर्थः । ननु "समानकर्तृकयोः पूर्वकाले" इत्यादि *सूत्राणां *का गतिस्तत्राह—समानकर्तृकत्वादीति । अयं भावः—भोक्तुं पचति,

---

एवं—विधेयविशेषणविवक्षानियमे ॥ ३ ॥ (५९)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायाम् उद्देश्यविधेयगतसंख्याविवक्षानिर्णयः समाप्तः ।

अव्ययकृतो भावे इति । अव्ययसंज्ञाप्रयोजकाः कृत्प्रत्ययाः भावेऽर्थे भवन्तीति तदर्थः । सूत्राणामिति । 'क्त्वादिप्रत्ययानां पूर्वकालादिरूपार्थकत्वमितिबोधकानाम्' इति शेषः । का गतिरिति । "अव्ययकृतो भावे" इति वार्तिकेन

र्थविवक्षाया असम्भव इति भावः ।

इति भूषणसारे सुबोधिन्यामुद्देश्यविधेययोः संख्याविवक्षानिर्णयः ।

१. पूर्वप्रकरणे उद्देश्यगतैकत्वविवक्षायां भ्रातोरित्येकत्वस्य इत्युक्तं तत्र तत्प्रकृतिकक्त्वादीनामर्थं प्रसङ्गसङ्गत्याऽवसरसङ्गत्या च निरूपयति–क्त्वाप्रत्ययेति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भुक्त्वा व्रजतीत्यादावेकवाक्यता सर्वसिद्धा भोजनपाकक्रिययोर्विशेषणविशेष्यभावमन्तरेणानुपपन्ना। *अन्यथा *भुङ्क्ते व्रजतीत्यादावप्येकवाक्यतापत्तेः। तथा च *तयोर्विशेषणविशेष्यभावनिरूपकः संसर्गो जन्यत्वं, *सामानाधिकरण्यं, *पूर्वोत्तरभावो, *व्याप्यत्वं चेत्यादिरनेकविधः। तथा च भोक्तुं पचति, भुक्त्वा तृप्त इत्यादौ भोजनजनिका पाकक्रिया, भोजनजन्या तृप्तिरिति बोधः। *अत एव जलपानानन्तर्यस्य तृप्तौ सत्त्वेऽपि पीत्वा तृप्त इति *न प्रयोगः। सामानाधिकरण्यस्यापि संसर्गत्वेन अर्थात् समानकर्तृकत्वमपि लब्धम्। भुक्त्वा व्रजतीत्यादौ पूर्वोत्तरभावः सामाधिकरण्यं च संसर्ग इति भोजनसमानाधिकरणा तदुत्तरकालिकी व्रजनक्रियेति बोधः*।

*अधीत्य तिष्ठति, मुखं व्यादाय स्वपितीत्यादौ चाध्ययनव्यादानयोरभावकालेऽप्रयोगाद्यदा यदाऽस्य स्थितिः, स्वापश्च; तदा तदाऽध्ययनं मुखव्यादानं चेति*कालविशेषावच्छिन्नव्याप्यत्वबोधाद्व्याप्यत्वं सामा

भावस्यैव तदर्थत्वबोधनादिति भावः। **अन्यथा**—विशेष्यविशेषणभावं विनाऽप्येकवाक्यत्वोपगमे। **भुङ्क्ते व्रजतीति**। अत्र द्वयोरप्याख्यातयोः। (तिङन्तयोः) "भावप्रधानमाख्यातम्" इति सिद्धान्ताद्विशेष्यत्वमिति न विशेष्यविशेषणभाव इति बोध्यम्। **तयोः**—'भोक्तुं पचति' 'भुक्त्वा व्रजति' इत्यादौ भोजनपाकव्रजनान्यतरक्रिययोः। **सामानाधिकरण्यम्**। एककर्तृवृत्तित्वम्। **पूर्वोत्तरभावः**-विशेषक्रियापूर्वोत्तरकालिकत्वम्। **व्याप्यत्वम्**—अविनाभावित्वम्। **अतएव**-जन्यत्वस्य संसर्गत्वस्वीकारादेव। **न प्रयोग इति**। जलपानमात्रेण तृप्तेरदर्शनात् तृप्तौ जलपानजन्यत्वस्यासम्भवात्। **बोध इति**। भोजनक्रियाश्रयवृत्तिनी भोजनोत्तरकालिकी च व्रजनक्रियेत्यर्थः। व्याप्यत्वस्य संसर्गत्वे मानमाह—**अधीत्येति**। **कालविशेषावच्छिन्नव्याप्यत्वबोधादिति**। स्थितौ तत्कालिकाध्ययनव्यापारव्याप्य-

---

१. भुङ्क्ते व्रजतीति—एककर्तृका वर्तमानकालपरिच्छिन्ना भोजनक्रिया, एककर्तृका वर्तमानव्रजनक्रियेति क्रियाद्वयमुख्यविशेष्यताको बोधस्तत्रानुभवसिद्धो न तु एकार्थमुख्यविशेष्यकबोधकत्वमेकवाक्यत्वं तत्र प्रामाणिकमिति भावः।

२ सामानाधिकरण्यं चेति—ननु व्याप्यतायाः सामानाधिकरण्यघटितत्वेनेदमसङ्गतमिति चेन्न, सामानाधिकरण्यघटितमेवात्र व्याप्यत्वं ग्राह्यमित्यत्र तात्पर्यग्राह-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाधिकरणं च संसर्गः। एवं चा*न्यलभ्यत्वान्न सूत्रात्*तेषां *वाच्यतालाभ इति युक्तमव्ययकृतो भाव इति। एवं च प्रकृत्यर्थक्रिययोः संसर्गे तात्पर्यग्राहकत्वरूपं द्योतकत्वं क्त्वादीनाम्। *अत एव "समानकर्तृकयोः" इति सूत्रे 'स्व[1]शब्देनोपात्तत्वान्न' इति *भाष्यप्रतीकमादाय पौर्वापर्यकाले द्योत्ये क्त्वादिर्विधीयते न तु विषय इति भाव इति कैयटः।

यत्तु—समानकर्तृकयोरिति सूत्रात्समानकर्तृकत्वं क्त्वावाच्यम्। अन्यथा "ओदनं पक्त्वाऽहं भोक्ष्ये" इत्यत्र मयेति तृतीयाप्रसङ्गाच्च। नचाऽऽख्यातेन कर्तुरभिधानान्न *सेतिवाच्यम्। भोजनक्रियाकर्तुरभिधानेऽपि पाकक्रियाकर्तुस्तदभावात्*। अनभिहिते भवतीति*पर्युदासाश्रयणात्। *अत एव प्रासादे आस्त इत्यत्र प्रसादनक्रियाधिकरणस्याभिधानेऽप्यास्तिक्रियाधिकरणस्यानभिधानात्सप्तमीतिः—तन्न, *सूत्रात्तस्य* वाच्यत्वबोधादित्यर्थः। अन्यलभ्यत्वादिति। आकाङ्क्षाभास्यत्वादित्यर्थः। तेषाम्—जन्यत्वादीनाम्। वाच्यतेति। क्त्वादिप्रत्ययवाच्यतेत्यर्थः। अत एव—जन्यत्वसमानकर्तृकत्वादीनामन्यलभ्यत्वादेव। भाष्यप्रतीकमिति। इह कस्मान्न भवति 'पूर्वं भुङ्क्ते पश्चात् व्रजति' इति? "स्वशब्देनोपात्तत्वान्न भवति" इत्यत्रत्यभाष्यप्रतीकमित्यर्थः।

सा तृतीया। तदभावादिति। पाकक्रियाकर्तृत्वशक्तेरभिधानाभावादित्यर्थः। एवं पूर्वत्रापि भोजनक्रियाकर्तृत्वशक्तेरित्येवार्थः। तेन द्वयोरपि क्रिययोः कर्त्रैक्येन नासङ्गतिरिति भावः। पर्युदासाश्रयणादिति। "अनभिहिते" इति सूत्रस्य कर्तृत्वादावनभिहिते तत्तद्विभक्तिरित्यर्थेन 'पच' धात्वर्थक्रियानिरूपितकर्तृत्वशक्तेरनभिधानस्य सत्त्वेन सूत्रप्रवृत्तौ तृतीयाप्रसङ्ग इति तदाशयः। ननु प्रसज्यप्रतिषेधे कर्मत्वादेरभिधाने न द्वितीयादिविभक्तिरिति सूत्रार्थस्य सत्त्वेन वस्तुतो भोजनक्रियाकर्तुरेव पाककर्तृत्वेऽपि तस्याऽऽख्यातेनोक्ततया निषेधप्रवृत्तेर्न तृतीयाप्रसङ्ग इत्यभिप्रेत्य पर्युदासत्वमेव "अनभिहिते" इति सूत्रस्याऽऽश्रयणीयमिति द्रढयति—अत एवेत्यादिना। सूत्रात्—"समानकर्तृकयोः पूर्वकाले" इति सूत्रात्। तस्य—क्त्वात्।

1. स्वशब्देनेति—इह कस्मान्न भवति पूर्वं भुङ्क्ते पश्चाद् व्रजतीति? पूर्वपक्षस्य समाधानभूतं भाष्यमिदं 'स्वशब्देनोपात्तत्वान्ने' ति। तथा चात्र समानकर्तृकत्वेन पूर्वकालत्वेन च क्त्वाऽपत्तिरिति तत्त्वम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वालाभात् । समानकर्तृकयोः क्रिययोः पूर्वकाले क्त्वेत्येव तदर्थात् । अन्यथा समानकर्तरीत्येव सूत्रन्यासः स्यात् । *तृतीयापादनं त्वाख्यातार्थक्रियायाः प्रधानभूतायाः कर्तुरभिधानात्प्रधानानुरोधेन* गुणे कार्यप्रवृत्तेर्न संभवति ।

उक्तं च वाक्यपदीये—

*प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् ।
शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥
*प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते ।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते ॥ इति ।

*किं चान्यथा कर्मणोऽपि क्त्वार्थतापत्तिः "पक्त्वौदनो मया भुज्यत"

कर्तुः । **तृतीयापादनन्तु**—तृतीयाप्रसङ्गरूपापत्तिरपीत्यर्थः । अप्यर्थस्तुरित्याशयः । **प्रधानानुरोधेनेति** । क्त्वातुमुनाद्यन्वयिक्रियानिरूपितशक्तेः स्वसमानाधिकरणगुणभूतक्त्वातुमुनादिप्रकृत्यर्थनिरूपितशक्तेः स्ववदभिहितत्वेनानभिहितत्वेन वा प्रकाशकत्वस्वाभाव्यात् तदनुरोधेनैव विभक्तिरिति भावः ।

प्रधानेतरयोरिति । प्राधानाप्रधानक्रियानिरूपितशक्तिद्वयं यत्रैकस्मिन् द्रव्ये तत्र **गुणाश्रया**—गुणक्रियानिरूपिता शक्तिः **प्रधानं**—प्रधानक्रियानिरूपितां शक्तिमनुरुणद्धि' इति पूर्वकारिकाऽर्थः । तमेवानुरोधं दर्शयति—**प्रधानविषयेति** । यदा **प्रधानविषया** प्रधानक्रियानिरूपिता **शक्तिः** कर्तृत्वादिरूपा **प्रत्ययेन** आख्यातेनाभिधीयते, तदा **गुणे** गुणक्रियानिरूपिताऽनुक्ताऽपि **तद्वत्** उक्तवत् **प्रतीयते** भासते । उपलक्षणमेतत—यदा प्रधानक्रियानिरूपिता शक्तिरनुक्ता तदा गुणक्रियानिरूपितोक्ताऽप्यनुक्तवद् भासते इत्यर्थस्य । तृतीयापत्तिभिया कर्तुर्वाच्यत्वाङ्गीकारे तत्तुल्यन्यायेन 'पक्त्वौदनो मया भुज्यते' इत्यत्र प्रधानभुजिक्रियाकर्मण आख्यातेनाभिधानेऽपि पचिकर्मणोऽनुक्ततया ओदनपदाद् द्वितीयावारणाय कर्मणोऽपि क्त्वावाच्य-

---

१. प्रधानेतरयोरिति—इदं हरिपद्यद्वयं स्वादुमि णमुलितिसूत्रस्थभाष्यानुवादभूतमिति ।

२. प्रधानविषयेति—प्रधानं विषयो निरूपकं यस्याः सा शक्तिः कर्तृत्वा-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्यत्र द्वितीयायाः प्रकारान्तरेणावारणात्, इत्यास्तां विस्तरः ॥ १ ॥(६०)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे क्त्वाद्यर्थनिर्णयः समाप्तः

अथ स्फोटनिर्णयः ।

*सिद्धान्तनिष्कर्षमाह—

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः ।
साधुशब्देऽन्तर्गता हि बोधका न तु तत्स्मृताः ॥ १ ॥ (६१)

यद्यपि *वर्णस्फोटः पदस्फोटो वाक्यस्फोटो *ऽखण्डपदवाक्यस्फोटौ

त्वापत्तिरित्याह—किञ्चेति ॥ १ ॥ (६०)

इति श्री सरलानामकवैयाकरणभूषणसारटीकायां क्त्वाद्यर्थनिर्णयः ॥

अथ पूर्वं धात्वर्थादिनिर्णयेषु प्रकृतिप्रत्ययान्यतरस्य पृथग्वाचकत्वमुक्तं, तदनुपपन्नम् । क्रमिकाशुविनाशित्वेन वर्णसमूहरूपे तत्र शक्तिग्रहस्यासम्भवात् । तथा च तत्र तत्र शक्तिग्राहकव्याकरणशास्त्रस्यैतस्याप्रामाण्यप्रसङ्ग इत्याशङ्कां निराकर्तुमाह—सिद्धान्त इति । वर्णस्फोट इति । स्फुटति प्रकाशतेऽर्थोऽस्मादिति स्फोटः । वर्णानां स्फोटः वाचकः शब्दो वर्णस्फोटः । एवं पदस्फोट इत्यादीनामप्यर्थो बोध्यः । एतेन श्रावणप्रत्यक्षविषयककारादिवर्णातिरिक्तस्तदभिव्यञ्जकः कश्चित् स्फोटशब्दाभिलप्यमानो वर्तते इति ध्वनितम् । एतदुपपादनं चान्यत्र स्पष्टम् इति विस्तरेणालम् । अखण्डपदवाक्यस्फोटौ—अखण्डपदस्फोटः अखण्डवाक्यस्फोटश्चेत्यर्थः ।

दिरूपेति भावः ।

इति क्त्वाद्यर्थनिर्णयः ।

१ धात्वर्थनिर्णयादारभ्य क्त्वाद्यर्थनिर्णयं यावत् प्रकृतिविशेषप्रत्ययविशेषाणां चार्थाः "उपायाः शिक्षमाणानाम्" असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते, इत्यादिहर्युक्त्यनुसारेण सत्यसमीहयैव निर्णीता न तु तेषु वास्तविकता । एवं च किं तत्सत्यं यदुद्दिश्येयान् प्रयासः इति जिज्ञासायां शब्दब्रह्मोपासकानां सिद्धान्तं दिदर्शयिष्यन्, नैयायिकमीमांसकादीनां च मतं प्रौढयुक्तिभिश्च खण्डयिष्यन् स्फोटनिरूपणमुपोद्घातसङ्गत्या प्रस्तौति—सिद्धान्तेति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकं दुरर्थकं *च, तथाऽपि वाक्यस्फोटातिरिक्तानामन्येषामवास्तवत्वबोधनाय तदुपादानम्* । एतदेव ध्वनयन्नाह—अतिनिष्कर्ष इति । मतस्थितिर्वैयाकरणानां महाभाष्यकारादीनाम् । तत्र क्रमेण सर्वांस्तान्निरूपयन्वर्णस्फोटं प्रथममाह—साधुशब्द इति । *साधुशब्दानन्तर्गता वाचका न वेति *विप्रतिपत्तिः । *विधिकोटिरन्येषां*, नेति वैयाकरणानाम् । साधुशब्दे पचति राम इति प्रयुज्यमानेऽन्तर्गतास्तिब्विसर्गादय एव बोधका वाचकास्तेषामेव[1] शक्तत्वस्य प्राग्व्यवस्थापितत्वान्न तु तैः स्मृता लादयः स्वादयश्चेत्यर्थः ॥ १ ॥ (६१)

ये—तु प्रयोगान्तर्गतास्तिबादयो न वाचकास्तेषां *बहुत्वेन शक्त्या-

---

वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इति। वर्णजातिस्फोट-पदजातिस्फोट-वाक्यजातिस्फोटा इत्यर्थः । अनर्थकमिति। सर्वेषां स्फोटानां सिद्धान्तसिद्धत्वेन वाक्यपदस्य व्यावर्त्यालाभादिति भावः । दुरर्थकमिति। वाक्यग्रहणेनेतरस्फोटव्यावृत्त्यापत्तेश्च विरुद्धार्थकमित्यर्थः । तदुपादानमिति । परे तु वाक्ये वाक्यैकदेशन्यायेन 'पिण्डम्' 'पिधेहि' इत्येतन्मात्रादपि लोकेऽर्थबोधदर्शनात्पदस्फोटस्यापि वाक्यस्फोटवद्वास्तवत्वानुभवेन कारिकायां वाक्यपदस्य पदोपलक्षणपरत्वमेव । अत एव सर्वेषां तेषां क्रमेण निरूपणं संगच्छते । न हि मिथ्यापदार्थानां शशशृङ्गादीनां निरूपणं क्वचिद् दृश्यते इति, इत्याहुः ।

साधुशब्दानन्तर्गता इति । साधुशब्दघटकस्मारिता इत्यर्थः । अन्यैरपि घटादिसाधुशब्दान्तर्गतघकारादीनां वाचकत्वाभ्युपगतत्वेन साधुशब्दानन्तर्गतत्वं पक्षतावच्छेदकं विवक्षितमित्याशयः । विप्रतिपत्तिरिति । संशयजनकं वाक्यमित्यर्थः । विधिकोटिरिति । वाचका इति तदर्थः । अन्येषां—नैयायिकादीनाम् ॥ १ ॥ (६१)

बहुत्वेनेति । लकारस्वाद्यपेक्षया बहुत्वेनेत्यर्थः । ननु तिबादिस्मृतस्थानिनां

---

१. तेषामेवेति—बोधकतिबादीनामित्यर्थः । तस्यैवेति पाठे तु बोधकस्वरूपविशेषणीभूतधर्मस्य परामर्शः । यद्यपि सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शितया तेषामेवेति पाठस्तिबादीनां परामर्शश्च समुचितस्तथाऽपि दर्पणादिसम्मत्या तस्यैवेति पाठस्याऽपि प्राचीनाभिमतत्वमिति संक्षेपः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नन्त्यापत्तेः। *एधांचक्रे *ब्रह्मेत्यादावादेशभूतलुगादेरभावरूपस्य बोधकत्वासंभवाच्च, किन्तु तैः[2] स्मृता लकाराः स्वादयश्च वाचकाः। लत्वस्य *जातिरूपतया शक्ततावच्छेदकत्वौचित्यात्, *अव्यभिचाराच्च। आदेशानां भिन्नतया परस्परव्यभिचारित्वात्*। *"लः कर्मणि" इत्याद्यनुशासनानुगुण्याच्च। न ह्यादेशेष्वर्थबोधकमनुशासनमुपलभामह इत्याहुः,

---

वाचकत्वस्वीकारे शक्त्यानन्त्याभावेऽपि स्मृतिजनकानां तिवादीनामानन्त्येन ततो जायमानस्मृतीनामानन्त्यापत्तिस्तवाप्यस्त्येवेत्यत आह—एधांचक्रे इति। अत्र हि लिडादेशानाम् "आमः" इति सूत्रेण लुक्। लुकश्चाभावरूपतया जनकतायाश्च अभावेन क्वचिदपि बोधादर्शनाद् भावनिष्ठत्वेन अभावादेशोऽसम्भवादित्यर्थः। ननु एधांचक्रे इत्यत्र अनुप्रयुज्यमानकृञ्धातूत्तरलिडादेशेनैव एधधात्वर्थाश्रयस्य बोध इति प्रकृते आदेशानां वाचकतापक्षेऽपि न दोषः। स्पष्ट चेदम्—"आमः" इति सूत्रे भाष्ये। तत्र हि "किं पुनर्लुग् आदेशापवाद आहोस्वित् कृतेष्वादेशेषु भवति?" लुग् आदेशानामपवादः। (एवं तर्हि) तिङ्कृतस्य पदत्वस्याभावः प्राप्नोति। सुबन्तत्वात्सिद्धम्" इत्युक्तम्। तथा च आदेशोत्तरं लुकि कारकसंख्यावगमो न ततः प्राग् इति फलभेदस्य सत्त्वेऽपि अपवादत्वबोधकभाष्यप्रामाण्यादनुप्रयुज्यमानधातूत्तरप्रत्ययेन तदर्थावगतिरिति कल्पनादिति तात्पर्यमित्युच्यते। तथा च प्रकृते न दोष इति दोषान्तरमाह—ब्रह्मेति।

जातिरूपतयेति। लडादिसर्वलकारेषु 'ल' इत्यनुगतप्रतीत्या लत्वजातिसिद्धिर्बोध्या। आदेशानां वाचकत्वपक्षे तु तेषां नानात्वेन शक्ततावच्छेदकतत्तदानुपूर्वीणामपि नानात्वं स्पष्टमेव। **अव्यभिचाराच्चेति**। 'एधांचक्रे' 'ब्रह्म' इत्यादौ प्रत्ययस्य लुका लुप्तत्वेऽपि तत्र स्थानिस्मरणेन प्रत्ययार्थबोधात्पूर्वं लकारादिज्ञानस्य नियमेन सत्त्वाद्व्यभिचाराभाव इति बोध्यम्। **परस्परव्यभिचारित्वादिति**। सर्वेषामपि आदेशानां तत्तदर्थबोधे कारणत्वे तदन्यतमादेशेनार्थबोधस्थलेऽन्येषामसत्त्वात्तत्र व्यभिचार इत्यर्थः। ननु तद्दोषवारणाय तदादेशज्ञानाव्यवहितोत्तरकालिकतदर्थबोधं प्रति तदादेशः कारणमित्यव्यवहितोत्तरत्वस्य कार्यतावच्छेदककोटौ प्रवेशेन

---

१. ब्रह्मेत्यादाविति—अत्रादिपदेन लिङ् धुगित्यादिसंग्रहः।

२. तैरिति—आदेशैरित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तान् *स्वसाधकयुक्तिभिर्निराचष्टे—

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा ।
किं चाऽऽख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि ॥ २ ॥
कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय । (६२)

व्यवस्थानुरोधात्प्रयोगान्तर्गता एव वाचका न तत्स्मृता इत्यर्थः। *तथा हि, पचतीत्यादौ लकारम* विदुषो *बोधान्न* तस्य वाचकत्वम्। न च तेषां तिङ्क्षु शक्तिभ्रमाद् बोधः, तस्य भ्रमत्वे* मानाभावात् *आदेशिनामपि तत्त*द्वैयाकरणैः स्वेच्छया *भिन्नभिन्नाना* मभ्युपगमात्कः *शक्तः को नेति व्यवस्थानापत्तेश्च। सर्वेषां शक्तत्वे* गौरवं *व्यभिचारश्चास्त्येव। आदेशानां प्रयोगान्तर्गततया नियतत्वाद् युक्तं तेषां शक्तत्वम्। तथा चाऽऽदेशिस्मरणकल्पना नेति लाघवम्। साधकान्तरमाह—व्यहृतेरिति। व्यवहारस्तावच्छक्तिग्राहकेषु *मुख्यः। स

नोक्तव्यभिचार इत्यरुचेराह—लः कर्मणीति। स्वसाधकेति। स्वपक्षसाधकेत्यर्थः।

व्यवस्थां दर्शयति तथा हीति। अविदुषः—अजानतः। बोधात्—आश्रयरूपार्थविषयकबोधात्। तस्य—लकारस्य। मानाभावादिति। तथा बोधोदयेन तिङ्क्षु वाचकत्वस्याबाधितत्वात्। बाधज्ञानं विना भ्रमत्वस्य वक्तुमशक्यत्वात्। आदेशिनाम्—लकारस्वादीनाम्। वैयाकरणैः—शाकटायनप्रभृतिभिः। भिन्नभिन्नानाम्—सुः रुः सिः इत्यादीनाम्। अभ्युपगमात्—स्थानित्वेन स्वीकारात। कः शक्त इति। सुः शक्तः, रुः शक्तः, सिः शक्तो वेत्यर्थः। गौरवमिति। विसर्गादीनामादेशानां वाचकत्वपक्षापेक्षया प्रत्यादेशनिरूपितस्थानिनां बहुत्वाद्गौरवं स्पष्टमेव। व्यभिचार इति। सुस्थानितोऽर्थजननवेलायां रुस्थानिनः सिस्थानिनो वा अभावाद् व्यभिचारः। एवं क्रमेण सर्वेषां व्यभिचारः स्थानिनां वाचकत्वपक्षे बोध्यः। आदेशानां तु नियतत्वान्न व्यभिचार इति। एवं चात्र पक्षे आदेशानामेव वाचकतया न ततः स्थानिकल्पनागौरवमपि। मुख्य इति। इतरानपेक्षत्वरूपमुख्यत्वं व्यवहारस्य बोध्यम्। व्याकरणादीनां तु न तथात्वम्। कर्मण्यणित्यादिनाऽणादिप्रत्ययस्य शक्तिग्रहे कर्मादिशब्दशक्तिग्रहोऽपेक्ष्यते, स चेच्छब्दान्तरेण, तस्यापि शब्दस्य शब्दान्तरेणैव शक्तिग्रह इत्यभ्युपगमेऽनवस्थाप्रसङ्ग इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च श्रयमाणतिङादिष्वेवेति॥ त एव वाचका इत्यर्थः।॥ किं च—तद्धेतुन्यायत इति। ॥लकारस्य बोधकत्वे 'भू-ल' इत्यतोऽपि बोधः स्यात्। ॥तादृशे बोधे भवतीति॥ समभिव्याहारोऽपि कारणमिति चेत्तर्ह्यावश्यकत्वादस्तु॥तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः।॥अन्यथा लकारस्य वाचकत्वं ॥समभिव्याहारस्य कारणत्वं चेत्युभयं कल्प्यमिति गौरवं स्यात्। न च तादृशसमभिव्याहारः समभिव्याहृता वर्णा वेत्यत्र विनिगमकाभावात् ॥प्रयोगान्तर्गता वर्णा वाचका इति सिध्यतीति भावः। अपि च लकारस्यैव वाचकत्वे कृत्तिङोः॥ कर्तृभावनावाचकव्यवस्था त्वत्सिद्धान्तसिद्धा न स्यादित्याशयेनाऽऽह–किं चेति। आदेशानां वाचकत्वे तिङ्-

त एव—तिङादय एव। ननु व्यवहारेण तिङ्क्षु गृह्यमाणाऽपि शक्तिर्लाघवादादेशिनि व्यवस्थाप्यते, न तु तिङ्क्षु, गौरवात्, वाक्ये गृहीतशक्तेः पदे व्यवस्थापनवत्। अनेककारणकल्पनागौरवं तु फलमुखत्वान्न दोषावहमित्यस्वरसादाह—किं चेति। लाघवमूलकश्चायं न्यायः तद्धेतोरेव तत्त्वे किं तेनेति। तमेव व्युत्पादयति—लकारस्येति। तादृशे। एककर्तृकवर्तमानकालिकसत्तारूपे इत्यर्थः। समभिव्यवहारोऽपीति। अव्यवहितोत्तरत्वसम्बन्धेन भूधातुविशिष्टशब्विशिष्टतिशब्दरूपसमभिव्याहार इत्यर्थः। तथा च भूल् इत्यत्र तादृशसमभिव्याहारस्यासत्त्वान्न दोषः। न च असाधुत्वज्ञानेनैवादोषसिद्धिः, शक्तत्वरूपसाधुताया अपि सत्त्वादपभ्रंशादपि बोधोदयेन तदीयज्ञानस्य बोधेऽप्रतिबन्धकत्वाच्चेति भावः। 'भवति' इति समुदायः कारणमिति तत्त्वम्।

तादृशसमभिव्याहारस्यैवेति। तथा च समभिव्याहारस्य चाऽऽदेशरूपत्वादादेशानामेव वाचकत्वं फलितम्।

अन्यथा—आदेशानां बोधकत्वाऽनङ्गीकारे। समभिव्याहारस्य—उक्तसमूहस्य। प्रयोगान्तर्गता वर्णा इति। न च वर्णानां वाचकत्वे प्रत्येकं वर्णाद् बोधापत्तिरिति वाच्यम्, समभिव्याहृतयावद्वर्णेषु वाचकताऽभ्युपगमेनादोषात्। एकस्मिन्नेव वर्णे अकारादौ शक्त्यनुशासने तु तावन्मात्राद् बोधो भवतीति तस्य शक्तत्वमपीष्टमेवेति दिक्। कर्तृभावनेति। कृतः कर्तृवाचकत्वं तिङो भावनावाचकत्व-

१ त एवेति—लिङादय एवेत्यर्थः। अत्रैवकारेण स्थानिभूतलकारादीनां व्यावृत्तिर्बोध्या। २. ननु समभिव्याहारस्य वाचकत्वं सिध्यतु तावताऽपि साधुशब्दान्तर्गतवर्णत्वाऽवच्छेदेन न वाचकत्वसिद्धिरर्थात् साधुशब्दान्तर्गता वर्णा वाचका इति तु नैवायातमित्याशङ्कां निराकरोति–तथा चेति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वेन भावनायां, मानत्वादिना कर्तरि शक्तिरित्युपपद्यते विभाग इति भावः । न च शानजादौ कृतिर्लकारार्थ आश्रयः शानजर्थ इत्यस्तु 'कर्तरि कृत्' इत्यनुशासनादिति शङ्क्यम्, स्थान्यर्थेन निराकाङ्क्षतया शानजादौ "कर्तरि" इत्यस्याप्रवृत्तेः । अन्यथा घञादावपि प्रवर्तेत ॥ २३ ॥ (६२३)

देवदत्तः पचमान इत्यादिसामानाधिकरण्यानुरोधाच्छानचः कर्ता वाच्यः स्यादित्याशङ्क्याऽऽह—

तरवाद्यन्ततिङ्क्ष्वस्ति नामता कृत्स्वव स्फुटा ॥ ३॥ (६३)

नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्यताम् ॥

पचतितरां मैत्रः, पचतिकल्पं मैत्र इत्यादिषु नामार्थत्वाभेदान्वययोः संभव एवेति कर्तृवाचकता स्यादिति भावः । न च पचतिकल्पमित्यत्र सामानाधिरण्यानुरोधात्कर्तरि लक्षणा । पचमान इत्यत्राप्यापत्तेः, इति लः कर्मणीत्यनुशासनं च लाघवाय कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादायेत्युक्तम् ॥ ३३ ॥ (६३३)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे स्फोटवादे वर्णस्फोटनिर्णयः समाप्तः ।

मिति व्यवस्थेत्यर्थः । कृतिर्लकारार्थ इति (लकारस्य) स्थानिन एव वाचकत्वाभ्युपगमेऽपि 'कर्तरि कृत्' इत्यनुशासनबलाच्छानजाद्यादेशानामेवात्र कर्तृरूपोऽर्थ इति तदाशयः । निराकाङ्क्ष्येति । अस्य 'अर्थांशे' इति शेषः । २३ ॥ (६२३)

नामार्थत्वाभेदान्वयेति । तद्धितान्तत्वेन "कृत्तद्धित" इति प्रातिपदिकत्वेन तदर्थस्य नामार्थत्वं, 'नामार्थयोरभेदसंसर्ग' इति व्युत्पत्तेश्चाभेदान्वय इति । सामानाधिकरण्यस्य कर्तृवाचकताया तन्त्रत्वेऽत्राप्याख्यातस्य कर्तृवाचकता स्यात् । न चेयं सम्मतेति सामानाधिकरण्यस्य तंन्त्रत्वं वक्तुमशक्यमित्यर्थः ॥ ३३ ॥ (६३३)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां स्फोटवादे वर्णस्फोटनिर्णयः ।

---

१. पचमान इति–प्रथमान्तपदसमभिव्याहृताख्यातस्य यथा भावनायां शक्तित्वैवाऽन्यपदसमभिव्याहृतस्य शानचोऽपि तत्र शक्तिस्वीकारण शक्यसम्बन्धरूपलक्षणायाः पचमान इत्यत्राप्यापत्तेरिति हृदयम् । इति वर्णस्फोटनिर्णयः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्थाऽऽदेशा वाचकाश्चेत्पदस्फोटस्ततः स्फुटः ॥ ४ ॥ (६४)[1]

एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्ध एवेत्याह-अथेत्यादि। आदेशास्तिब्विसर्गादयः। अयं भावः—समभिव्याहृतवर्णानां वाचकत्वे सिद्धे *तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिध्यति। प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात्प्रत्येकं वर्णानामर्थवत्त्वेन प्रातिपदिकत्वापत्तौ "नलोपः प्रातिपदिकान्तस्य" इत्यादिभिर्धनं वनमित्यादौ *नलोपाद्यापत्तिश्च। *एतच्च* चरमवर्ण एव वाचकत्वशक्तिः, शक्ते*र्व्यासज्यवृत्तित्वे * मानाभावात्, पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणा र्थधीजनने सहकारिण इति न तन्मात्रोच्चारणाद *र्थधीरिति वर्णस्फोटवादिनां मतान्तरदूषणायोक्तम्। रामोऽस्तीति वक्तव्ये रामित्यनन्तरं घटिकोत्तरमकारो-

---

तादृशवर्णसमभिव्याहारेति। वाचकताश्रयवर्णसमुदायेत्यर्थः। नलोपाद्यापत्तिश्चेति—स्वादिविभक्तिश्रवणं तु न सम्भवति, समुदायस्य प्रातिपदिकत्वेनावयवेभ्य उत्पन्नस्वादीनां तदवयवत्वेन "सुपो धातु" इति लुक्सम्भवात्। वस्तुतस्तु नलोपापत्तिरपि नापादयितुं शक्या, सुबन्तस्य पदत्वेन "द्व्येकयोः" इत्याद्येकवाक्यतया स्वादीनां संख्यार्थप्रातिपदिकादेव विधानसम्भवेन प्रतिवर्णं संख्याया अनुपस्थितेस्तदवाचकत्वेन ततः सुबनुत्पत्तेः पदत्वाभावात्। किन्तु अनुभवविरुद्धार्थस्मरणापत्त्या वर्णव्यत्ययोपजनादिसत्त्वेऽपि 'तर्कुः' 'रज्जुः' इत्यादौ अर्थान्तरानवगत्या गौरवेण च न प्रत्येकं वर्णानां वाचकत्वमिति। स्पष्टं चेदं "अइउण्" सूत्रे भाष्ये।

एतच्च—तद्वाचकपुरःसरं समभिव्याहारवाचकत्वसमर्थनं चेत्यर्थः। चरमवर्ण एवेति। प्रकृत्यादिघटकचरमवर्णोच्चारणे पूर्ववर्णानामसत्त्वादिति भावः। व्यासज्यवृत्तित्वे-समुदायवृत्तित्वे। मानाभावादिति। चरमवर्णानुभवोत्तरमेवार्थबोधोदयेन तत्रैव वाचकत्वविश्रान्तिरिति भावः। अर्थधीरिति। एतदग्रे 'नापि तेषां वैयर्थ्यम्'

---

१. वर्णस्फोटनिरूपणानन्तरं, पदस्फोटनिरूपणे उपजीव्योपजीवकभावस्याऽपि सङ्गतित्वमिति ध्वनयन् ग्रन्थमारभते-अथेति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

च्चारणे *ऽर्थबोधापत्त्या* तादृशानुपूर्व्या एव शक्ततावच्छेदकत्वौचित्या-दिति दिक् ॥ ४ ॥ (६४)

"सुप्तिङन्तं पदम्" इति *परिभाषितपदस्य[1] वाचकत्वस्वीकर्तॄणां मतमाह—

घटेनेत्यादिषु न हि प्रकृत्यादिभिदास्थिता ।
वस्नसादाविवेहापि संभ्रमोहो हि दृश्यते ॥ ५ ॥ (६५)

घटेनेत्यादौ 'घटे' इति प्रकृतिः, 'न' इति प्रत्ययः; 'घट्' इति प्रकृतिः, 'एन' इति प्रत्यय इति* विभागस्य "सर्वे सर्वपदादेशाः" इति स्वीकारे *विशिष्य प्रकृतिप्रत्यययोर्ज्ञानासंभवान्न वाचकत्वमित्यर्थः ! वैयाकरणै-र्विभागः सुज्ञेय इत्यतो दृष्टान्तव्याजेनाऽऽह—वस्नसादाविति । "बहुवच-नस्य वस्नसौ" इति *समुदायस्याऽऽदेशविधानान्नात्र तद्विभागः संभव-तीत्यर्थः ॥ ५ ॥ (६५)

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह—

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु ।
अर्थे विशिष्य सम्बन्धाग्रहणं चेत्समं पदे ॥ ६ ॥ (६६)
लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत्तथा ।

हरेऽव विष्णोऽवेत्यादौ पदयोः "एङ पदान्तादति" इत्येकादेशे सति

इति शेषः । अर्थबोधापत्त्येति । तत्पक्षे हि बोधं प्रति पूर्वपूर्ववर्णाहितसंस्कारस-हकृतान्तिमवर्णप्रत्यक्षस्य कारणत्वेनात्रापि तथाविधस्य सत्त्वादिति भावः । तादृशा-नुपूर्व्या इति । राम' इत्यादिपदगताया इत्यर्थः ॥ ४ ॥ ६४ ॥

परिभाषितेति । पाणिन्यादिमुनिपरिभाषितेत्यर्थः । विभागस्येति । अस्य-ज्ञानासम्भवादित्यनेनान्वयः । तस्य च निर्णयासम्भवादित्यर्थः । ननु कश्चिदत्र प्रकृति-भागः काश्चन प्रत्ययभाग इति ज्ञानं सम्भवतीत्यत आह—विशिष्येति । अयं प्रत्य-यभागः अयं प्रकृतिभाग इति विशेषरूपेण निश्चयासम्भवान्न प्रकृतिमात्रस्य प्रत्यय-मात्रस्य च शक्तरूपपदस्य वाचकत्वं किं तु सुबन्तस्य प्रकृतिप्रत्ययसमुदायस्येति तात्पर्यम् । समुदायस्य—युष्म् आकम् इत्यादिरूपस्य ॥ ५ ॥ (६५)

---

१. परिभाषितेति—पूर्वं तु प्रकृत्यन्तर्गतवर्णसमुदायरूपस्य प्रत्ययान्तर्वर्तिवर्ण-समूहरूपस्य च शास्त्रकृत्संकेतितस्य वाचकत्वं दर्शितं, साम्प्रतं तूभयसमुदायस्य तत्त्वं बोध्यते इति विशेषः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न *तद्विभागः सुज्ञानः। तथा च प्रत्येकपदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात्समुदायेऽप्यावश्यिका शक्तिः। *एवं प्रकृतिप्रत्ययेषु* विशिष्याज्ञायमानेष्वपि *समुदायव्युत्पत्त्या बोधात्तत्राप्यावश्यिकैव शक्तिरिति भावः। *वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्यार्थबोध इति पदार्थशक्तिः पदेष्विव *वाक्यार्थशक्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ। *अन्यथा घटः कर्मत्वमानयनं कृतिरित्यादौ* तादृशव्युत्पत्तिरहितस्यापि *बोधप्रसङ्गः। *घटमानयेत्यत्रैव पदार्थानामुपस्थितौ सत्यपि तात्पर्यज्ञाने *बोधाभावाच्च। *तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्मत्ववाचकविभक्तेस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः, घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूपवाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात्। *अर्थो-

---

तद्विभागः—'हर् एव' इति, 'हरे व' इति वा विभाग इत्यर्थः। ननु यत्र प्रकृतिप्रत्ययविभागो न सम्भवति तत्र पदे वाच्यत्वसिद्धावपि 'लिहौ' इत्यादौ यत्र तद्विभागज्ञानं सुलभं, तत्र तत्र सिद्ध्येदित्यत आह—**एवं प्रकृतीति। विशिष्याज्ञायमानेऽप्वपीति।** अपिशब्देन विशिष्य ज्ञायमानसंग्रहः। **समुदायव्युत्पत्त्या**—समुदायनिष्ठशक्तिज्ञानेन। सकलपदेषु वाचकत्वं प्रसाध्य तथैव विशिष्य ज्ञायमानविभागकवाक्येष्वपि साधयति—**वस्तुतइति।**

वाक्यार्थशक्तिरिति। पदार्थसंसर्गबोधकत्वशक्तिरित्यर्थः। **अन्यथा**—वाक्यशक्तेरनभ्युपगमे। **तादृशव्युत्पत्तिरहितस्यापीति।** पदार्थसंसर्गबोधकत्वरूपवाक्यशक्तिज्ञानरहितस्यापीत्यर्थः। **बोधप्रसङ्ग इति।** घटकर्मकमानयनमिति शाब्दबोधप्रसङ्ग इत्यर्थः।

ननु शाब्दबोधे प्रत्याकाङ्क्षायाः सहकारिकारणत्वेन तस्या अत्राभावेन न तत्प्रसङ्ग इति दूषणान्तरमाह—**घटमानयेति।** अत्र तादृशव्युत्पत्तिरहितस्येत्यनुषज्यते। **बोधाभावाच्चेति।** अस्य 'किं पुनर्घटः कर्मत्वमानयनं कृतिरित्यत्र वक्तव्यम्' इति शेषः। **तत्रैव**—'घटमानय' इत्यत्रैव। **तज्ज्ञानमपीति।** समभिव्याहारनिष्ठबोधजनकत्वज्ञानमपीत्यर्थः। **अर्थोपस्थापकेति।** अयं शब्दः एतदर्थोपस्थापक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पस्थापकज्ञानविषयशब्दवृत्तिज्ञान ारणत्वस्यैव शक्तित्वात्। युक्तं[1] चैतत्, विषयता[2]संबन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य[3] लाघवेन हेतुत्वसिद्धेः। विवेचितं चैतद् भूषणे।

ननु वाक्यार्थस्या *पूर्वत्वात्कथं तत्र शक्तिग्रह इत्याशङ्क्याऽऽह–अर्थ इति। वाक्यस्येति शेषः। वाक्यस्य वाक्यार्थे विशिष्य शक्त्यग्रहणं चेत्तर्हि पदेऽपि समम्। पद एवान्वयांशे *शक्तिरिति पक्षेऽपि* तद्ग्रहासम्भवस्तुल्य इत्यर्थः। यदि च पदशक्तिः पदार्थांशे ज्ञाता अन्वयांशे चाज्ञातोपयुज्यते इति कुब्जशक्तिवादस्तदा ममापि वाक्यशक्तिरज्ञातैवोपयुज्यत इति वादाभ्युपगमस्तुल्य इति भावः। ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थवद्वाक्यार्थेऽपि तद्ग्रह इति चेत्तुल्यमित्याह—लक्षणादिति। लक्ष्यते तर्क्यतेऽनेनेति लक्षणं मनस्तस्मात्। अपिः पदपदोत्तरं बोध्यः। पदेऽपि लक्षणात्तद्ग्रहश्चेत्तर्ह्यस्तु, वाक्येऽपीति शेषः। वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं तद्ग्रहः। आवापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति बोध्यम्॥ ६ १/२॥ (६६ १/२)

सर्वत्रैव हि वाक्यार्थो लभ्य एवेति ये विदुः॥७॥ (६७)
भाट्टास्तेऽपीत्थमेवाऽऽहुर्लक्षणाया ग्रहे गतिम्।

भाट्टा इति तदनुयायिनां वाचस्पतिकल्पतरुप्रभृतीनामुपलक्षणम्।

ननूक्तपक्षद्वयमनुपपन्नम्, उत्पत्तेरभिव्यक्तेर्वैकदाऽसंभवेन वर्णसमूहरूपपदज्ञानासंभवात्। तथा च सुतरां तत्समूहरूपवाक्यज्ञानासंभव इति चेन्न, उत्तरवर्णप्रत्यक्षसमयेऽव्यवहितोत्तरत्वसंबन्धेनोपस्थितपूर्ववर्णवत्त्वं-

---

इति ज्ञानविषयकोः यः शब्दस्तन्निष्ठं यज्ज्ञानकारणत्वं बोधजनकत्वं तस्यैवेत्यर्थः। अपूर्वत्वात्—शाब्दबोधात्प्रागज्ञानेन तत्त्वात्। अन्वयांशे—वाक्यार्थांशे। तद्ग्रहासम्भव इति। अन्वयांशे पदनिष्ठशक्तिग्रहासम्भवः। शाब्दबोधात् प्रागन्वयांशस्याज्ञानादित्यर्थः॥ ६ १/२॥ ५६ १/२॥

---

१. युक्तं चैतदिति—अत्रैतत्पदेन वाक्यनिष्ठबोधकत्वस्य शक्तित्वं-परामृश्यते। २. युक्तिं दर्शयति—विषयतासम्बन्धेनेति। ३. वृत्तिज्ञानस्येति—वृत्तिज्ञानजन्यपदार्थोपस्थितेरित्यर्थः। तां विना शाब्दबोधाऽनुदयात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथा तदुत्तरप्रत्यक्षकाले *उपस्थितविशिष्टतद्वर्णवत्त्वं तस्मिन्सुग्रहमिति तादृशानुपूर्वीघटितपदत्वस्येव वाक्यत्वस्यापि सुग्रहत्वात् ॥७१/२॥ (६७१/२)

*इदानीम*खण्डपक्षमाह—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ॥ ८ ॥ (६८)
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ।

पदे पचतीत्यादौ न वर्णाः । नातो वर्णसमूहः पदमिति शेषः । *दृष्टान्तव्याजेनाऽऽह—वर्णेष्विति । एकारौकारलृकारऋकारादिवर्णेष्ववयवाः प्रतीयमाना अपि यथा नेत्यर्थः । *क्वचिद् 'इव' इत्येव पाठः । एवं वाक्येऽप्याह—वाक्यादिति । पदानामपि वाक्याद्विवेको* भेदो नास्तीत्यर्थः । अयं भावः—वाक्यं पदं चाऽखण्डमेव; न तु वर्णसमूहः, अनन्तवर्णकल्पने मानाभावात् । तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकताया व्यञ्जकताया वाऽवच्छेदकं *वैजात्य* मादायैव ककारो गकार इत्यादिप्रतीतिवैलक्षण्यसंभवात् । स्पष्टं हि भामत्याम्—"तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यते" इत्युक्तं देवताधिकरणे । न चैवं वायुसंयोग एव वाचकोऽपि किं न स्यादिति वाच्यम्, प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात् । तथा च वाचकत्वान्यथानुपपत्त्या तदेवेदं पदं तदेवेदं वाक्यं सोऽयं गकार इति प्रतीत्या च स्फोटोऽखण्डः सिध्यति । एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवाच्छ्रूयमाणवर्णानामेव वाचकत्वमस्त्वित्यपास्तम ,तेषां स्फोटातिरिक्तत्वाभावात् ।

उपस्थितविशिष्टतद्वर्णवत्त्वमिति । अव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णस्मृतिविशिष्टोत्तरवर्णप्रत्यक्षमेव पदज्ञानमिति भावः ॥ ७१/२ ॥ (६७१/२)

इदानीम्—वर्णस्फोट–सखण्डपदवाक्यस्फोटनिरूपणानन्तरम् । अखण्डपक्षम्–अखण्डपदस्फोटाखण्डवाक्यस्फोटपक्षम् । अखण्ड–वाक्य–स्फोटमात्रकथनसमये वर्णानामखण्डत्वकथनं प्रकृतानुपयुक्तमत आह–दृष्टान्तेति । तदेव स्पष्टप्रदर्शनायाह–क्वचिदिवेत्येव पाठ इति । "वर्णेष्ववयवा इव" इति पाठ इत्यर्थः । विवेको भेद इति । 'विचिर् पृथग्भावे' इति धात्वर्थानुसारात् प्रविवेकपदं भेदार्थकमित्याशयः । वैजात्यं—कत्वादि । आदाय—पदादिस्फोटे आरोप्य । तेषाम्—कत्वादीनाम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः । समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसंभाव्यमेव । पूर्वपूर्ववर्णानुभवसंस्कारेणैकदा समूहालम्बनरूपसकलज्ञानसंभवस्तु सरोरसोजराराजनदीदीनादिसाधारण इत्यतिप्रसङ्ग इति स्फोट एवा *खण्डो नादाभिव्यङ्ग्यो वाचक इति कैयटः, तत्तुच्छम्, पदज्ञानसंभवस्योपपादितत्वाद्वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेत्यादिविकल्पग्रासाच्च ।

ननु त्वन्मतेऽप्येष दोप । तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पस्य संभवादितिचेत् ? उच्यते— प्रत्येकमेव संयोगाभिव्यञ्जकाः, परं तु केचिदत्वेन केचिदौत्वेन केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः । *अत एव वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते । एव चाव्यवहितोत्तरत्वसंबन्धेन घवत्त्वं टकारे गृह्यते*, एतादृशपदज्ञानकारणताया अविवादात । परं त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं[1] वाच्यम् । अत एव घज्ञानानन्तरटज्ञानविषयत्वरूपानुपूर्वीत्यादिर्नैयायिकवृद्धानां व्यवहारः । एवं च न कश्चिद् दोपः । *एतेन पर्यायस्थलेष्वेक एव स्फोटः, नाना वा ? । नाऽऽद्यः, घटपदे गृहीतशक्तिकस्य कलशपदाद्बोधप्रसङ्गात् । न च, तत्पर्यायाभिव्यक्ते शक्तिग्रहस्तत्पर्यायश्रवणेऽर्थधीहेतुरिति वाच्यम्, एवंसति प्रतिपर्यायं शक्तिग्रहावश्यंभावेन तत्तत्पर्यायगतशक्तिग्रहहेतुताया उचितत्वात् । तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवाच्च । अन्यथा तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात्[2] । न द्वितीयः, अनन्तपदानां तेषां शक्तिं चापेक्ष्य क्लृप्तवर्णेष्वेव

अखण्डः—वर्णाद्यघटित इत्यर्थः । अत एव—स्फोटातिरेकत्वस्यासत्त्वादेवेत्यर्थः । गृह्यते इति । अस्याग्रे 'अतो न रसात् सरोभानम्' इति शेषः । एतेन— वर्णानुपूर्व्यनच्छिन्नस्फोटस्य वाचकत्वव्यवस्थापनेन । अस्य 'अपास्तम्' इत्यनेन

---

१. स्वज्ञानाधिकरणेति—स्वं कत्वादिना भासमानः स्फोटस्तज्ज्ञानाधिकरणे उत्पत्तिर्यस्य तादृशं ज्ञानं तद्विषयत्वमित्यर्थः । एवं च वर्णानां नित्यत्वेऽपि तदभिव्यक्तेरनित्यतायाः सर्वसम्मततया तदव्यवहितोत्तरत्वस्यान्यवर्णाभिव्यक्तौ सत्त्वेन तद्बलेनैव घटादिप्रत्यय उपपद्यते । अभिव्यक्तिर्ज्ञानम् ।

२. गौरवादिति—अस्मिन्कल्पे तत्तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन हेतुतेति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तम्, पर्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वात्त *दवच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक्।

* शब्दकौस्तुभे तु * वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः। * अन्यथा * कपालातिरिक्तघटाद्यसिद्धिप्रसङ्गश्चेति प्रतिपादितम् ॥ ८३ ॥ (६८३)

नन्वेवं * शास्त्राप्रामाण्यप्रसङ्गः पदस्याखण्डत्वात्, शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वादित्याशङ्क्यां समाधत्ते—

पञ्चकोशादिवत्तस्मात्कल्पनैषा समाश्रिता ॥ ६ ॥ (६६)
उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः।

[1]उपेयप्रतिपत्त्यर्था इत्यन्तेनान्वयः। * अयं भावः-यथा भृगुवल्ल्यां "भृगुर्वै वारुणिर्वरुणं ब्रह्म पृष्टवान्। स उवाचान्नम्" इति तस्योत्पत्त्यादिकं

सम्बन्धः। **तदवच्छेदकेति**—शक्ततावच्छेदकेत्यर्थः। अतिरिक्तस्फोटसाधिकां युक्तिमाह—**शब्दकौस्तुभे इति। वर्णमालायाम्**—आनुपूर्वीयुक्तायाम्। पदमित्युपलक्षणं वाक्यस्य। **अन्यथा**—प्रतीतेः पदार्थासाधकत्वे। **कपालातिरिक्तेति**—कपाले घटः' इति भेदेन प्रतीयमानकपालातिरिक्तेत्यर्थः ॥८३॥ (६८३)

एवं—कौस्तुभोक्तरीत्यातिरिक्तस्फोटस्वीकारे। **अयंभाव इति**। तत्र हि भृगुर्वै वारुणिः, वरुण ब्रह्म पृष्टवान्। स उवाचान्नं ब्रह्मेति। तस्य अनित्यत्वं बुध्वा-पृष्टो मनो ब्रह्मेत्युवाच। तस्यापि अशितमन्नं त्रेधा भवति—यत्स्थूलं तत्पुरीषं, यन्मध्यमं तन्मांसं, यदणीयस्तन्मनः, इति श्रवणादनित्यत्वमवधार्य पुनः पृष्टो 'विज्ञानं ब्रह्म' इत्युवाच। तस्यापि वृत्त्युपहितत्वं ज्ञात्वा पुनः पृष्टोऽब्रवीत्—'आनन्दो ब्रह्म' इति। ततश्च वस्तुतत्त्वं प्राप्य स्थितो भृगुरिति। एवं च तत्र यथा पञ्चकोशव्युत्पा-

---

अभिव्यक्तांशप्रवेशे गौरवं, तत्पर्यायगतेत्यादिकल्पे तु तदप्रवेशेन लाघवमिति तत्त्वम्।

१. तस्मात्पञ्चकोशादिवदेषा समाश्रिता कल्पना किमर्थेस्यत आह—उपेयप्रतिपत्त्यर्थेति-उपेयप्रतिपत्त्यर्थेति उत्तरकारिकायाः पूर्वार्धेनाऽन्वये सति प्रयोजनजिज्ञासानिवृत्तिः। उपेयस्य प्राप्यलक्ष्यस्य प्रतिपत्तिः प्राप्तिस्तदर्था। तत्र यद्यपि उपेयप्रतिपत्त्यर्था इति उपाया इत्यस्य विशेषणं-पुंल्लिङ्गबहुवचनान्तं तथाप्यत्र-स्त्रीलिङ्गैकवचनान्तता लिङ्गवचनयोर्विपरिणामेन बोध्या। अत्रोपेयो वास्तवस्फोट एव, तद्व्युत्पादनायैवैषा प्रकृतिप्रत्ययादिकल्पनेति हृदयम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बुध्वा पृष्ठे प्राणमनोविज्ञानाऽऽनन्दात्मकपञ्चकोशोपदेशोत्तरं "ब्रह्म पुच्छं प्रतिष्ठा" इति ज्ञेयं ब्रह्म प्रतिपादितम् । तत्र कोशपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय । यथा वाऽऽनन्दवल्लीस्थपञ्चकोशव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय । एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति । ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोधसंभवान्न शास्त्रं तदुपाय इत्यत आह—उपाया इति । उपायस्योपायान्तरादूपकत्वात् । तथा च व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते मन्त्रजन्यमिवार्थस्मरणे, वेदान्तजन्यमिव ब्रह्मज्ञाने । तस्य च ज्ञानस्य यज्ञादीनामन्तःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वं च ।

तदुक्तं वाक्यपदीये—

*तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ॥
*इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥
अत्रा *तीतविपर्यासः* केवलामनुपश्यति ॥ इति ।

न चालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः, तस्यालीकत्वासिद्धेर्वक्ष्यमाणत्वात् । एवं रेखागवयन्याय आदिना गृह्यते ॥६९॥(६९)

ननु स्फोटस्य वर्णजातीनां च नित्यतया ककार उत्पन्न इति न स्यात् । वायुसंयोगनिष्ठजातेः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापत्तिश्चेत्यत आह—

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि ॥ १० ॥(७०)

दनं वास्तवं यत् शुद्धं सर्वाधारभूतं ब्रह्म तत्प्रतिपत्तये, एवमिदं व्याकरणमपि प्रकृतिप्रत्ययादिप्रतिपादनद्वारा वास्तवाखण्डस्फोटप्रतिपत्त्यर्थमेवेति भावः

तदिति—वाङ्मलानां चिकित्सा सञ्जाता यत्रेति चिकित्सितमपनयनहेतुः तद् व्याकरणमपवर्गस्य मोक्षस्य द्वारमित्यर्थः । वाङ्मलापकर्षणेन परावाणीदर्शनेन मोक्षसिद्धिरिति तत्तात्पर्यम् । तदेव स्पष्टयति—**इदमाद्यमिति** । **अतीतविपर्यास इति** । अतीतः नष्टः विपर्यासो भ्रमो यस्येत्यर्थः । **केवलां**—पराख्यां वाचम् ॥

---

१. कल्पितानामिति—समवायसम्बन्धेन वायुसंयोगनिष्ठानामपि स्वाश्रयाभिव्यङ्ग्यत्वसम्बन्धेन स्फोटे प्रतीतानामित्यर्थः । २. उपाधित्वमिति—उदात्तत्वादिप्रकारकप्रतीतिजनकत्वमित्यर्थः । ३. परैरिति—मीमांसकैरित्यर्थः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्योऽन्यस्य मन्वते ।

स्वीकारस्थलमाह—स्वरदैर्घ्याद्यपीति । आदिनोत्पत्तिविनाशादिसंग्रहः । उदात्तत्वादिति न वर्णनिष्ठं तस्यैकत्वान्नित्यत्वाच्च । तच्च स एवायमिति प्रत्यभिज्ञानात् । न च *गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयो व्यक्त्यंशाभेदस्यापि भासमानस्य विना बाधकं त्यागायोगात् । न चोत्पत्तिप्रतीतिर्बाधिका, प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्वर्णेष्वनुभवविरुद्धत्वात् । अत एव वर्णमुच्चारयतीति प्रत्ययो न तूत्पादयतीति प्रत्ययो व्यवहारश्च । उच्चरितत्वं च ताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम् । किंच व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परया वर्णनिष्ठत्वविषयत्वेनाप्युपपत्तेर्न साऽतिरिक्तवर्णसाधिका । परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम् ।

साक्षात्संबन्धांशे भ्रम इत्यवशिष्यते । तदपि सोऽयमित्यत्र व्यक्त्यभेदांशे *तव भ्रमत्ववत्तुल्यम् । परं तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते । न च वर्णस्थले ध्वनिसत्त्वे मानाभावः, तदुत्पादकशङ्खाद्यभावेन तदसंभवश्चेति वाच्यम्, ककाराद्युच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्तेर्ध्वन्युत्पत्तेश्च दर्शनाज्जिह्वाभिघातजवायुकण्ठसंयोगादेर्ध्वनिजनकत्वकल्पनात् । तस्य च वर्णोत्पत्तिस्थलेऽपि सत्त्वात् *तवैव प्रतिबध्यप्रतिबन्धकभावकल्पना निष्प्रमाणिका स्यादिति विपरीतं गौरवम् । एवं परस्परविरोधादुदात्तत्वानुदात्तत्वह्रस्वत्वदीर्घत्वादिकमपि न वर्णनिष्ठं युक्तमिति तेषामभिप्रायः । एवं चोत्पत्त्यादिप्रतीतीनां तत्प्रमात्वस्य च निर्वाहः परेषामपि समान इति प्रतिबन्द्यैवोत्तरमिति भावः ॥

गत्वावच्छिन्नेति—'स एवायम्' इति प्रत्यभिज्ञा धर्मैक्यमादायेति भावः । तव भ्रमत्ववदिति । वर्णनित्यत्ववादिनस्तव मते यथा "स एवायं गकारः" इति प्रत्यभिज्ञायां व्यक्त्यभेदप्रतीतिर्भ्रमविषया, एवमस्मिन्मतेऽपि साक्षात्सम्बन्धे भ्रम इति भावः । वर्णोत्पादकसामग्र्याः प्रतिबन्धकत्वान्न वर्णोत्पत्तिस्थले ध्वन्युत्पादसम्भव इत्याशङ्कापरिहाराय आह—तवैवेति ॥ १०३ ॥ (७०३)

---

१. प्रतिबन्द्यैवेति—पराभिमतसमाधिना कृतं समाधानं प्रतिबन्दिस्तया । एवं च तत्रोत्पत्त्यादिप्रतीतेः प्रमात्वे मीमांसकैर्यादृशं समाधानं स्वीकृतं-तदेव मयाऽपि स्वीक्रियते । तथा चाखण्डवाक्यस्फोटस्वीकारे न किञ्चिद् बाधकमिति फलतीति तत्त्वम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्थं पञ्च व्यक्तिस्फोटाः । जातिस्फोटमाह—

शक्यत्व इव शक्तत्वे जातेर्लाघवमाश्रयताम् ॥११॥ (७१)
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत् ।

अयं भावः—वर्णास्तावदावश्यकाः उक्तरीत्या च सोऽयं गकार इतिवद् योऽयं गकारः अतः सोऽयं हकार इत्यपि स्यात्, स्फोटस्यैकत्वात्, गकारोऽयं न हकार इत्यनापत्तेश्च । किं च स्फोटे गत्वाद्यभ्युपेयं न वा ? आद्ये तदेव गकारोऽस्तु, वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात् । तथा चातिरिक्तस्फोटकल्पन एव गौरवम् । अन्त्ये गकारादिप्रतीतिविरोधः । वायुसंयोगवृत्ति ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेत् ? न, प्रतीतेर्विना बाधकं भ्रमत्वासंभवात् । अस्तु वा *वायुसंयोग एव गकारोऽपि, तस्या *तीन्द्रियत्वं दोष इति चेद्—

*धर्मवदुपपत्तेरिति * कृतं स्फोटेन । तस्मात्सन्त्येव वर्णाः, परं तु न वाचकाः, गौरवात् । *आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च । 'इदं हरिपदम्' इत्यनुगतप्रतीत्या हर्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन * हेतुत्वात् । *तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात् । न च वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयो-

---

वायुसंयोग एवेति—एवकारेण स्फोटव्यावृत्तिः । **अतीन्द्रियत्वं दोष इति** । संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वमभ्युपेयम् । अन्यथा घटाकाशसंयोगप्रत्यक्षापत्तेः । तथा च वायोरप्रत्यक्षत्वेन वायुतत्तत्स्थानसंयोगस्यातीन्द्रियतया गकारादिप्रत्यक्षानुपपत्तिरित्यर्थः । **धर्मवदिति** । वायुनिष्ठस्पर्शवदित्यर्थः । यथा वायोरप्रत्यक्षत्वेऽपि तन्निष्ठः स्पर्शः त्वगिन्द्रियेण गृह्यते, एवं ताल्वाद्यनुयोगिकवायुसंयोगस्यापि प्रत्यक्षं भविष्यति । तथा च बहिरिन्द्रियजन्यप्रत्यक्षविषयद्रव्यसंयोगप्रत्यक्षे एव यावदाश्रयप्रत्यक्षस्य हेतुत्वं कल्प्यते इति बोध्यम् । **कृतं स्फोटेनेति** । स्फोटेनालमित्यर्थः । तत्तद्वायुसंयोगैरेव तत्तदर्थबोधनात्स्फोटकल्पना निरर्थिकेति भावः । **आकृत्यधिकरणेति** । तत्र हि यथा आनन्त्यव्यभिचाराभ्यां व्यक्तिर्न शब्दवाच्या किं तु जातिरेवेत्युक्तम्, तथैव जातिरेव वाचिका न तु व्यक्तिरित्यर्थः । **हेतुत्वादिति** । हरिविषयकयावदुपस्थितिं प्रति हरिपदज्ञानस्य कारणत्वादित्यर्थः । **तदवच्छेदकतया**—कारणतावच्छेदकतया ॥ ११२ ॥ (७१२)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निर्वाहः, घटघटत्वादेरपि संयोगविशेषविशिष्टमृदाकारादिभिश्चान्यथा-सिद्ध्यापत्तेः[1] । तस्माज्जातिरेव वाचिका, तादात्म्येन तदवच्छेदिका चेति । ननु सरो रस इत्यादौ तयोर्जात्योः सत्त्वादर्थबोधभेदो न स्यादित्यत आह—औपाधिको वेति । वा त्वर्थे उपाधिरानुपूर्वी सैव जातिविशेषाभिव्यञ्जिकेति भेदः कारणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः । उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह—वर्णानामिति ॥ ११½ ॥ (७१½)

ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात्प्रत्येकादर्थबोधः स्यादित्यत आह—

अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता ॥१२॥ (७२)
कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ।

अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता *योगार्थतया बोधिकेति यावत् । एतेन स्फोटस्य नित्यत्वात्सर्वदाऽर्थबोधापत्तिरित्यपास्तम् । अयं भावः--यद्यपि वर्णस्फोटपक्षे कथितदोषोऽस्ति, तथाऽपि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति[2] कैश्चिद् व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्त इति *शेषार्थः । उक्तं[3] हि काव्यप्रकाशे—'बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः" इति ॥ १२½ ॥ (७२½)

---

*योगार्थतयेति—स्फुटत्यर्थोऽस्मादिति स्फोट इति व्युत्पत्त्या स्फोटपदस्य बोधकेत्यर्थ इति भावः । शेषार्थ इति । उत्तरार्धार्थ इत्यर्थः ॥ १२½ ॥ (७२½)

"आत्मैवेदं सर्वम्" "नेह नानाऽस्ति किंचन" इत्यादिश्रुतिदर्शनात् ब्रह्मातिरि-

---

१. अन्यथासिद्ध्यापत्तेरिति—विलक्षणसंयोगविशिष्टमृदादिभिरेव घट इत्याद्यनुगतप्रतीतेर्दण्डादिकार्यताऽवच्छेदकत्वस्य च निर्वाहाद्घटत्वादिजातेरपि सिद्धिर्न स्यात् । संयोगविशेषविशिष्टमृदादिकं प्रति दण्डादेः कारणताया वक्तुं शक्यत्वादिति संक्षेपः ।

२. धर्मिग्राहकेति—धर्मी जातिरूपः पदार्थस्तद्ग्राहकं मानमिदं घटपदमित्यद्यानुगतप्रतीत्यादिरूपं तत्सिद्धत्वादित्यर्थः ।

३ वर्णेषु ध्वनिरिति व्यवहारे काव्यप्रकाशोक्तिमुपस्थापयति—उक्तं हीति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ननु का सा जातिस्तत्राह—

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ॥१३॥ (७३)

सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ।

प्रतिभावं प्रतिपदार्थं सत्यांशो जातिः, असत्या व्यक्तयः *तत्तद्व्यक्ति-विशिष्टं ब्रह्मैव जातिरिति भावः। उक्तं च कैयटेन–" *असत्योपाध्यव-च्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः" इति। *"ब्रह्मतत्त्वमेव शब्द-स्वरूपतया भाति" इति च। कथं तर्हि–"ब्रह्मदर्शने च गोत्वादिजातेरप्य-सत्त्वादनित्यत्वम्, "आत्मैवेदं सर्वम्" इति श्रुतिवचनात्" इति कैयटः संगच्छताम्? अविद्याऽऽविद्यको *धर्मविशेषो वेति पक्षान्तरमादायेति द्रष्टव्यम् ॥ १३½ ॥ (७३½)

तमेव सत्यांशं स्पष्टयति—

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम् ।

ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥ १४ ॥ (७४)

अयं भावः–"नामरूपे व्याकरवाणि" इति श्रुतिसिद्धा द्वयी सृष्टिस्तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम्। प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम्।

उक्तं च वाक्यपदीये—

"शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।
*समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम् ॥

ब्रह्मैवेत्यनेन "अत्रायं पुरुषः स्वयज्योतिः" "तमेव भान्तमनुभाति सर्वम्" "तस्य भासा सर्वमिदं विभाति" इतिश्रुतिसिद्धं स्वपरप्रकाशत्वं

कस्य सर्वस्य मिथ्यात्वात् कथं जातेः सत्यत्वमित्यत आह—तत्तद्व्यक्तिविशि-ष्टेति। असत्येति। पस्पशाह्निके "द्रव्यं नित्यम्" इतिभाष्यमुपादायेदं कैयटेनो-क्तम्। ब्रह्मतत्त्वमेवेति। इदं तु प्रत्याहाराह्निके "चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः" इति भाष्यव्याख्याने उक्तम्। धर्मविशेषो वेति। जातिरित्यर्थः ॥ १३½ ॥ (७३½)

समारम्भ इति। उत्पत्तिरित्यर्थः।

---

१. आविद्यकः=अविद्याकल्पितः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकं स्फोटशब्दाभिधेयत्वं सूचयति । *निर्विघ्नप्रचयान्ते मङ्गलं स्तुतिनतिरूपमाह—पूर्णात्मन इत्यादिना ।

अशेषफलदातारमपि सर्वेश्वरं गुरुम् ।
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥ १४ ॥ (७४)

इति रङ्गोजिभट्टात्मजकौण्डभट्टविरचिते वैयाकरणभूषणसारे पदादिस्फोटनिरूपणं समाप्तम् ।

भट्टोजिदीक्षितैः श्रेष्ठैर्निर्मिताः कारिकाः शुभाः ।
कौण्डभट्टेन व्याख्याताः कारिकास्ताः सुविस्तरम् ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टात्मज-
कौण्डभट्टविरचितो वैयाकरणभूषणसारः समाप्तः ।

---

*निर्विघ्नप्रचयान्त—कारिकावलीरूपग्रन्थान्त ॥ १४ ॥ (७४)

इति श्रीसरलानामकवैयाकरणभूषणसारटीकायां स्फोटनिर्णयः समाप्तः ।
इति श्रीवैयाकरणभूषणसारटीका नेने इत्युपाह्वगोपालशर्म-
विरचिता सरलाऽभिधा समाप्ता ॥

---

१. स्तुतिनतीति—निष्कृष्यमाणं शब्दतत्त्वमित्यादिना स्तुतिः शब्दब्रह्मणः, पूर्णात्मने नम इत्यनेन तस्य नतिर्नमस्कारो बोध्यते इति । इत्थं चान्तिमं मङ्गलमाचरितं कारिकावलीरूपग्रन्थान्ते श्रीमद्भट्टोजिदीक्षितैरिति शम् ।

इति व्याकरणाचार्यपण्डितरामप्रसादत्रिपाठिविरचिता
वैयाकरणभूषणसारटिप्पणी समाप्ता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथ भट्टोजीदीक्षितविरचितवैयाकरणसिद्धान्तकारिकार्धप्रतीकानामकारादि-

वर्णानुक्रमसूची ।

प्रतीकानि	पृष्ठ
अत एव गवित्याह	८३
अतिप्रसङ्गो नोद्धाव्योऽभि-धानस्य	४३
अत्रार्धजरतीयं	११८
अथाऽऽदेशा वाचकार्थेत्	१४०
अनादिरर्थैः शब्दानां	९८
अनेकव्यक्त्यभिव्यङ्ग्या	१५०
अन्यत्राशेषभावात्तु	३२
अन्योन्यसंश्रयः	३१
अन्वेति त्यज्यतां तर्हि	४१
अभावो वा तदर्थोऽस्तु	१०८
अभेदश्चात्र संसर्ग	१२३
अभेदैकत्वसंख्याया	१२५
अर्थे विशिष्य सम्बन्धा	१४१
अविग्रहा गतादिस्था	४२
अव्ययकृत इत्युक्तेः	१३०
अषष्ठ्यर्थबहुव्रीहौ	९१
असाधुरनुमानेन वाचकः	१०४
अस्त्यादावपि धर्म्यंशे	३२
आख्यातं तद्धितकृतो	९५
आख्यातशब्दे भागाभ्यां	२४
आरोपितत्वं नञ्द्योत्य	१०८
आश्रयोऽवधिरुद्देश्यः	५८
इत्थं निष्कृष्यमाणं	१५१
इत्यादावन्वयो न	११३
इन्द्रियाणां स्वविषयेष्वना	९८
उत्सर्गोऽयं कर्मकर्तृविषयादौ	१६
उपास्येते हरिहरौ	११०
उपेयप्रतिपत्त्यर्था	१४६
एकं द्विकं त्रिकं चाथ	७७
औपाधिको वा भेदोऽस्तु	१४९
कथं कर्तुरवाच्यत्व	१३७
कपिञ्जलालम्भवाक्ये	१२५
कर्त्तव्यं ते न्यायसिद्धं	९०
कर्मकर्तर्यन्यथा तु न	२१
क्लृप्तत्यागश्चास्ति तव	९१
कल्पितानामुपाधित्वं	१४७
किं कार्य्यं पचनीयं	२७
किञ्च क्रियावाचकतां	२७
क्रियाऽऽख्यातेन	१३७
किन्तूत्पादनमेवातः	२९
क्रुधोऽकर्मकतापत्तेन	१८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतीकानि	पृष्ठ	प्रतीकानि	पृष्ठ
कृत्तद्धितसमासेभ्यो	११७	नञ्समासे चापरस्य प्राधा	१०८
कृत्वोर्थाः क्त्वातुमुन्त्वस्युरिति	४३	न तु प्राप्ये कर्मणीति	२२
केश्चिद्व्यक्तय एवास्याः	१५०	न प्रातिपदिकं नापि	८३
क्रिया सम्बध्यते तद्वत्कृत	४२	न हि तत्पाठमात्रेण	३०
क्रीडायां णस्तदस्यास्ती	१२४	नामार्थ इति सर्वेऽपि	७७
क्षतिर्नैवास्ति तन्त्रत्वे	१३०	नामार्थयोरभेदोऽपि	१३९
गुणप्रधानभावादौ	९५	निपातत्वं परेषां	११७
ग्रहैकत्वादिहेतूनामा	१२६	निपातानां वाचकत्वं	११६
घटेनेत्यादिषु न हि	१४१	निपातेतरसङ्कोचे प्रमाणं	११३
चकारादिनिषेधोऽथ	९०	निर्वर्त्ये च विकार्ये च	२२
जहत्स्वार्थाजहत्स्वार्थे	८६	नो चेच्छ्रोत्रादिभिः	८२
जायन्ते तज्जन्यबोध	७५	पक्ववान् कृतवान पाकं	२४
तत्र निर्णीत एवार्थः	३	पश्चकोषादिवत्तस्मात्कल्पनैषा	१४६
तथाऽन्यत्र निपातेऽपि	१११	पदार्थः सदृशाऽन्वेति	११३
तथा यस्य च भावेन	३७	पदे न वर्णा विद्यन्ते	१४४
तरबाद्यन्ततिङ्क्ष्वस्ति	१३९	पर्यवस्यच्छाब्दबोधाद	९६
तस्मात्करोतिर्धातोः	२४	पश्वेकत्वादिहेतूनामा	१२७
तस्माद्यथोचितं ज्ञेयं	१७	प्रकल्पिता यथाशास्त्रं	२२
त्वतलोरर्थकथनं टीकायां	११७	प्रत्ययार्थस्यैकदेशे	१२३
देवतायां निरूढेति सर्वे	१२३	प्रदेय एव वा शक्तिः	१२३
देवतायां प्रदेये च	१२३	प्रयोगोपाधिमाश्रित्य	१२०
द्योतकाः प्रादयो येन	११०	फणिभाषितभाष्याब्धेः	३
द्योत्यमेवार्थमादाय	११४	फलव्यापारयोरेकनिष्ठताया	३३
धर्ममात्रं वाच्यमिति	१२०	फलव्यापारयोर्धातुराश्रये	४
धातुसम्बन्धाधिकार	३७	फलव्यापारयोस्तत्र	१६
धातुस्तयोर्धर्मिभेदे	३३	फले प्रधानं व्यापारस्तिङर्थस्तु	४
धात्वर्थत्वं क्रियात्वं	३१	बहूनां वृत्तिधर्माणां	८८
नञ्समासे चापरस्य द्योत्यं	११४	ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै	१५१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रतीकानि	पृष्ठ	प्रतीकानि	पृष्ठ
भाट्टास्तेऽपीत्थमेवा	१४३	शक्तिग्रहेऽन्तरङ्गत्त्र	९६
भेदः संसर्ग उभयं	८६	शब्दोऽपि यदि भेदेन	८२
भेद्यभेदकसम्बन्धो	४४	शरैरुस्रैरिवोदीच्या	११३
भौतपूर्व्यात्सोऽपि	८४	सम्बन्धिशब्दे सम्बन्धो	१०७
यथायथं विभक्त्यर्थः	५८	सम्बोधनान्तं कृत्वोर्थाः	३७
यदि पक्षेऽपि वत्यर्थः	४१	सत्यं यत्तत्र सा जातिर	१५१
युक्तं वा न तु तद्युक्त	११६	सत्यां क्रियातिपत्तौ च	५३
योऽयं पूर्वपदार्थादि	८४	सत्यासत्यौ तु यौ भागौ	१५१
रदाभ्यां वाक्यभेदेन	१३०	समयाद् योग्यता संविन्माता	१०७
लक्षणादधुना चेत्तत्पदे	१४१	समानकर्तृकत्वादि	१३०
लघ्व्यानुरोधात्संख्याया	१२७	समासस्तु चतुर्धेति	८४
वर्तमाने परोक्षे श्वो	४८	समासे खलु भिन्नैव	८८
वस्तुतो वृत्तिरेवेति	१२४	सर्वत्रैव हि वाक्यार्थो	१४३
वस्तुसाद्यविवेहापि	१४१	सर्वनामाव्ययादीनां	३०
वाक्यस्फोटोऽतिनिष्कर्षे	१३४	साधुत्वं तदभावेऽपि	४४
वाक्यात्पदानामत्यन्तं	१४४	साधुत्वमष्टकस्यास्य	२७
वाचकत्वाविशेषे च	१०४	साधुशब्देऽन्तर्गता हि	१३४
विर्धेये भेदकं तन्त्र	१२९	साध्यत्वेन क्रिया तत्र	३६
विध्यादौ प्रार्थनादौ	४८	सिद्धभावस्तु यस्तस्या	३६
विशेषणं विशेष्यो वा	१०८	सिद्धान्ते तु स्थितं	११८
विशेषणाद्ययोगोऽपि	१११	सुपां सुपा तिङा	८४
व्यवस्थितेर्व्यवहृते	१३७	सुबन्तेनेति च ज्ञेयः	८४
व्यापकत्वाच्छक्तताय।	११७	स्यान्महद्गौरवं तस्मादे	८८
व्यापारे शप्श्नमाद्यास्तु	१६	स्वरदैर्घ्याद्यपि ह्यन्ये	१४८
व्यापारो भावना सैवोत्पादना	१८८	हरेऽवेत्यादि दृष्ट्वा	१४१
शक्यत्व इव शक्तत्वे	१४९	ह्यो भूते प्रेरणादौ च	५३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शुद्धिपत्रम् ।

मूलग्रन्थे—

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
५	४	इयादौ	इत्यादौ
२५	११	क्रियान्वयित्वमेव	क्रियात्वमेव
२७	२	तदेव	स एव
५२	५-६	ग्रन्थेऽनद्यतनत्वातीतत्वयोर्विस्तार- क्रियायामसत्त्वेन अनद्यतनातीत- त्वयोरभावेन	ग्रन्थेऽनद्यतनातीत- त्वयोरभावेन
५७	७	वर्तमानत्वे ङ् ।	वर्तमानत्वे लट् ।
५७	११	लडित्यर्थः ।	लडित्यर्थः ।
६६	६	प्राणशरार"	प्राणशरीर"
७६	१०	अर्थनियमः ।	शब्दनियमः
७६	८	शब्दनियमश्च ।	अर्थनियमश्च ।
९०	३	–अतिक्रान्त–	–निष्क्रान्त–
९२	१९	असम्भवे	असम्भवो
१०६	१६	इति विधिः । पापजनन– योग्यत्वमसाधुत्वम्	इति विधिः पाप- जननबोधनाय 'नासा- धुभिः, इति निषेधः । तथा पुण्यजननयो- ग्यत्वं साधुत्वम् । पापजननयोग्यत्वम- साधुत्वम् ।
१०७	८	योग्यवत् ।	योगवत् ।
११८	१	भावअत्ययेन	भावप्रत्ययेन
११९	८	इनादेः	इच्छादेः
१२८	८	वाचकव्यवस्था	वाचकत्वव्यवस्था
१४३	१५	लभ्य एवेति	लक्ष्य एवेति
१४८	२	उदात्तत्वादिति	उदात्तत्वादि

सरलाटीकायाम्—

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१०	११	कर्तृशक्या	कर्तृशक्त्या
४८	१३	प्रये गविशिष्टत्वंव तंमानत्वम् ।	प्रयोगविशिष्टत्वं वर्त- मानत्वम् ।
५९	२	क्रियाजज्य	क्रियाजन्य

Kirtikant Sharma Collection, Najafgarh